A

DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE COLLECTIONS

OF

THE ROYAL ASIATIC SOCIETY OF BENGAL

BY

MAHĀMAHOPĀDHYĀYA HARAPRASĀDA SHĀSTRĪ,
C.I.E., M.A., D.Litt., F.A.S.B.

REVISED AND EDITED BY

CHINTAHARAN CHAKRAVARTI, M.A.

VOLUME VIII, PART I
TANTRA MANUSCRIPTS

PRINTED AT THE BAPTIST MISSION PRESS
PUBLISHED BY THE ROYAL ASIATIC SOCIETY OF BENGAL

CALCUTTA
1939

CATALOGUES OF SANSKRIT MANUSCRIPTS
PUBLISHED BY THE ROYAL ASIATIC SOCIETY OF BENGAL

First Series. Vols. I–IX. By R. L. MITRA and Vols. X-XI. By MM. H. P. SHĀSTRĪ. 1870–1895.

[Vol. I]		(No. 1) (1871),	pp. 10+108=118	Price Rs.	2/8/-
,,		(No. 2) (1870),	,, 4+96=100	,,	1/4/-
,,		(No. 3) (1871),	,, 16+134=150	,,	2/8/-
Vol. II,	Pt. 1	(No. 4) (1872),	pp. 4+96=100	,,	1/4/-
,,	Pt. 2	(No. 5) (1872),	,, 4+96=100	,,	1/4/-
,,	Pt. 3	(No. 6) (1873),	,, 4+96=100	,,	1/4/-
,,	Pt. 4	(No. 7) (1874),	,, 4+12+114=130 and 4 plates	,,	2/8/-
Vol. III,	Pt. 1	(No. 8) (1874),	,, 4+96=100 and 1 plate	,,	2/8/-
,,	Pt. 2	(No. 9) (1875),	,, 2+80+32=114 and 2 plates	,,	2/8/-
,,	Pt. 3	(No. 10) (1876),	,, 4+96=100	,,	1/4/-
,,	Pt. 4	(No. 11) (1876),	,, 94+4+12=110 and 10 plates	,,	3/12/-
Vol. IV,	Pt. 1	(No. 12) (1877),	,, 96+8=104	,,	1/4/-
,,	Pt. 2	(No. 13) (1878),	,, 224+16=240	,,	3/12/-
Vol. V,	Pt. 1	(No. 14) (1879),	,, 152+8=160	,,	2/8/-
,,	Pt. 2	(No. 15) (1880),	,, 318+16+32=366 and 5 plates	,,	6/4/-
Vol. VI,	Pt. 1	(No. 16) (1881),	,, 6+152=158 and 1 plate	,,	2/8/-
,,	Pt. 2	(No. 17) (1882),	,, 164+14+12=190	,,	2/8/-
Vol. VII,	Pt. 1	(No. 18) (1883),	,, 8+154=162	,,	2/8/-
,,	Pt. 2	(No. 19) (1884),	,, 168+16=184	,,	2/8/-
Vol. VIII,	Pt. 1	(No. 20) (1885),	,, 8+160=168	,,	2/8/-
,,	Pt. 2	(No. 21) (1886),	,, 176+18=194	,,	2/8/-
Vol. IX,	Pt. 1	(No. 22) (1887),	,, 10+160=170	,,	2/8/-
,,	Pt. 2	(No. 23) (1888),	,, 16+14+28+156=214	,,	3/12/-
Vol. X,	Pt. 1	(No. 24) (1890),	,, 6+120=126	,,	2/8/-
,,	Pt. 2	(No. 25) (1892),	,, 8+16+248=272	,,	3/12/-
Vol. XI,		(No. 26) (1895),	,, 20+72+24+138+6=260	,,	3/12/-

Second Series. Vols. I–IV. By MM. H. P. SHĀSTRĪ. 1898–1911.

Vol. I,	Pt. 1	(No. 27) (1898),	pp. 160	Price Rs.	2/8/-
,,	Pt. 2	(No. 28) (1898),	,, 160	,,	2/8/-
,,	Pt. 3	(No. 29) (1900),	,, 40+112=152	,,	2/8/-
Vol. II,	Pt. 1	(No. 30) (1898),	,, 160	,,	2/8/-
,,	Pt. 2	(No. 31) (1904),	,, 22+78=100	,,	1/4/-
Vol. III,	Pt. 1	(No. 32) (1904),	,, 160	,,	2/8/-
,,	Pt. 2	(No. 33) (1907),	,, 26+14+94=134	,,	2/8/-
Vol. IV,		(No. 34) (1911),	,, 36+12+264=312	,,	5/-

PREFACE

The preparation of the Descriptive Catalogue of the Sanskrit Manuscripts in the collection of the Royal Asiatic Society of Bengal was undertaken by the late Mahāmahopādhyāya Haraprasāda Shāstrī, M.A., D.Litt., C.I.E., F.A.S.B., in a series of fifteen volumes of which the first six dealing with the Buddhist MSS., Veda, Smṛti, History and Geography, Purāṇa and Vyākaraṇa, appeared during his lifetime. The seventh volume describing the Kāvya MSS. was published in 1934 three years after his death of which the complete MS. was prepared and almost wholly seen by him through the press. The late Mahāmahopādhyāya left in addition the entire MSS. of the remaining eight volumes of the Catalogue which he divided into the following groups, namely, Tantra, Philosophy, Jyotiṣa, Jaina, Vernacular, Vaidyaka, Miscellaneous, Addenda and Supplement.

The materials left by the Mahāmahopādhyāya Shāstrī were complete and systematically arranged in the form of slips. They required however to be checked and verified with the various manuscripts described, a task which the late Mahāmahopādhyāya could not finish, as it was his habit to defer the verification till the last and then embody the necessary corrections in the final proofs. This work of verification was entrusted to Prof. Chintaharan Chakravarti, M.A., in 1933 by the Council of the R.A.S.B. who has thoroughly checked the materials and made corrections wherever necessary. Prof. Chakravarti has made some additions and has omitted portions which he considered unnecessary and redundant. He is also responsible for seeing the entire proofs through the press. In the work of verification and correction he has been ably assisted by Pandit Aghorenath Bhattacharyya, the Head Pandit in charge of the Society's Sanskrit Manuscripts.

The present Part deals with 648 MSS. on Tantra. Originally it was the idea of the late Mahāmahopādhyāya to devote one volume to the entire collection of manuscripts on Tantra numbering

little over one thousand, and the Society planned its publication accordingly. But unfortunately the period of quiescence that intervened and held up the publications of the Society during the last few years prevented the issuing of any further Volume of the Descriptive Catalogue after the appearance of the last Volume in 1934. It has been thought desirable therefore that instead of waiting for another year for the completion of the entire work on the Tantras, the Volume might be issued in two Parts—Part I describing 648 MSS. and numbering 608 pages, and Part II dealing with the rest of some 500 MSS. and of approximately the same size.

The Part I which is now issued deals with the following subjects:—

(1) Original Tantras (Nos. 5804–6165).

(2) Digests:

A. Comprehensive and general works (Nos. 6166–6298).

B. Works dealing with particular deities:

I. Śakti (Nos. 6299–6451).

The work on Part II of the Volume is making satisfactory progress through the press and it is hoped to issue it in about a year's time. This Part will be divided into four sections and will respectively deal with:—

II. Rituals of different aspects of Śiva, Viṣṇu, Kārtavīrya, Gaṇeśa, Guru and Paramahaṃsa;

C. Works on particular rites like initiation, puraścaraṇa, homa, mudrā, yantra, blackrites and other miscellaneous rites;

D. Works on Tantric yoga; and

E. Works on stotra and kavacas; besides an introduction calling attention to the salient features of the MSS. described, a List of Contents, Abbreviations based on the principles adopted in the *Catalogus Catalogorum*, Addenda and Corrigenda and an Index to the entire Volume.

The Society is thankful to Dr. Baini Prashad, D.Sc., for taking a keen interest in the early publication of the work and to Dr. S. K. Chatterji D.Lit., the Philological Secretary, for advice. The Press Clerk, Mr. D. K. Das, has been very helpful during the progress of the work through the press.

To Messrs. P. Knight and N. A. Ellis of the Baptist Mission Press, the Society is very grateful for giving all possible assistance in expediting the printing of the work, and for their whole-hearted co-operation, which has made it possible to issue this Part of the Volume within the present year.

B. S. GUHA,
General Secretary,
Royal Asiatic Society of Bengal.

15th December, 1939.

DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS.

ASIATIC SOCIETY OF BENGAL

VOLUME VIII.

TANTRAS.

I. ORIGINAL TANTRAS.

5804.

8329. **कुब्जिकामतम् ।** *Kubjikāmatam.*

Substance, palm-leaf. 12×2 inches. Folia, 1-239 of which Folia Nos. 49, 56, 69, 72-84, 86-104, 106-132, 134-187, 189-90, 192-229 are missing. Lines, 7 on a page. Extent in ślokas, 1,700 approximately. Character, Later Gupta. Condition, old and dilapidated. Incomplete.

An account of the *Kubjikāmata* literature will be found in Nep. I, Preface, p. LXXVIII. A fairly good number of MSS of *Kubjikāmata* are noticed in Nep. I and Nep. II. The present MS is referred to in Rep. (1895–1900), p. 4.

Beginning.

ॐ स्वस्ति। ॐ नमः शिवाय। श्रीदेव्यै गुरुभ्यः। श्रीक्रम-
गणपतये नमः।

श्रीसंवर्त्तामण्डलान्ते क्रमपदनिहितानन्दशक्तिसुभीमा
सृष्टिन्याये चतुष्कम् अकुलकुलगतं पञ्चकं चान्यषट्कः।
चत्वारः पञ्चकोन्यं पुनरपि चतुरः षोतुशाज्ञभिषेकं
दिव्यौघौमूर्तिमध्ये सह्खटरकला विन्दपुष्पं खमुद्रा।

Colophons of the different chapters :—

Fol. 4B—इति श्रीकुलालिकाम्नाये श्रीकुब्जिकामते श्रीदिव्यौघसद्भावे श्रीषट्साहस्रे संहितायां श्रीश्रीमते प्रथमः पटलः।

Fol. 6B—०द्वितीयः पटलः; Fol. 11A—०तृतीयः पटलः; Fol. 18B—०पञ्चमः पटलः; Fol. 24B—०षष्ठः पटलः; Fol. 36B—सप्तमः पटलः; Fol. 44B—०अष्टमः पटलः; Fol. 46B—०नवमपटलः; Fol. 57B—०दशमः पटलः; Fol. 64A—इति श्रीश्रीमते कुब्जिकाम्नाये ... ... एकादशपटलः; Fol. 67B—०द्वादशपटलः। Seven folia after this without leaf-marks have three colophons:—०मातृचक्रोधारो नाम त्रयोविंशतिः पटलः; ०सप्तत्रिंशतिमः पटलः; ०द्वाचत्वारिंशः पटलः।

The following sub-colophons are found:—Fol. 13A—प्रथमपीठावतारः; Fol. 14A—द्वितीयपीठावतारः; Fol. 15A—तृतीयपीठादिकारः; Fol. 17A—पञ्चमपीठावतारः; Fol. 22B—मन्त्रविधिः; Fol. 26B—मालिन्यन्यास उधारक्रमः; Fol. 27B—शब्दराशिसमुधारः; Fol. 43B—प्रायश्चित्तविधिः।

5805.

4733. कुब्जिकामततन्त्रम्। *Kubjikāmatatantram.*

Substance, Nepalese paper. 12×4¼ inches. Folia, 125. Lines, 9 on a page. Extent in ślokas, 3,250. Character, Newari. Date, N.S. 827. Appearance, discoloured. Complete.

It agrees on the whole with the MS of the work described in Nep. I, pp. 99-100.

5806.

3174. कुब्जिकातन्त्रम्। *Kubjikātantram.*

Substance, country-made paper. 14×5½ inches. Folia, 20. Lines, 12 on a page. Extent in ślokas, 720. Character, Bengali. Date, B.S. 1288. Appearance, fresh. Complete.

It is entirely different from the work with the same title described in L. II. 694.

Beginning :—

श्रीपार्व्वत्युवाच ।

देवदेव महादेव परमेश पुरातन ।
नन्दीश सर्व्वभूतेश निरञ्जन परात्पर ॥
किं त्वया जप्यते नाथ किमर्थं वापि तस्य च ।
केनोपायेन देवेश निरञ्जनपदं लभेत् ॥
सारात्सारतरं ब्रूहि यदि मे विद्यते दया ।
समयाचारमार्गविधिं साधनं च प्रकाशय ॥
चैतन्यं सर्व्वभूतानां शब्दब्रह्मेति यत् पुनः ।
तत्सर्व्वं श्रोतुमिच्छामि साधकानां हिताय च ॥
यदि मे प्राणनाथः स्यात् निगूढार्थं प्रकाशय ।
वासनासिद्धिरूपश्च भावसिद्धश्च यत् पुनः ॥
वेदानां सारगम्यश्च तं सारं मे प्रकाशय ।

श्रीसदाशिव उवाच ।

... ...
... ...

मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः ।
न सिद्ध्यति वरारोहे कल्पकोटिशतैरपि ॥
कथयामि महामन्त्रं मन्त्रस्यार्थानुसारतः ।
येन विज्ञातमात्रेण सर्व्वसिद्धीश्वरो भवेत् ॥
केवलं भावशुद्ध्या च मन्त्रार्थं प्राणवल्लभे ।
केवलं ज्ञानमात्रेण जीवन्मुक्तो ध्रुवं नरः ॥
काली तारा महाविद्या षोडशी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती प्रिये ॥

बगला चैव मातङ्गी कमला च प्रकीर्त्तिता ।
ब्रह्मविष्णुमहेशाद्यैस्तुवै दैर्नमस्कृता ॥
... ...
... ...
मालमण्डपसंस्था च महाकालनिवासिनी ।
अस्याः श्रवणमात्रेण जीवन्मुक्तास्य साधकः ॥

It contains nine chapters. The first chapter is introductory. The second, third and the fourth chapters explain the meanings of *mantras*. The fifth relates to Mantracaitanya. The sixth chapter relates to Yonimudrā. The seventh chapter relates to the purification of the three bhāvas—Divya, Vīra and Paśu. The eighth chapter relates to magical rites and the ninth to Mantrasiddhi.

The Last Colophon :—

इति कुब्जिकातन्त्रे पार्व्वतीपरमेश्वरसंवादे नवमः पटलः ।

Post Colophon :—

इति सन १२८८ तारिख २६शे फाल्गुनमाहे ग्रन्थ समाप्तः ।
श्रीश्रीकृष्णानन्दनाथस्य पुस्तकमिदं ।

5807.

5649. **श्रीमतसारटिप्पनम् ।** *Śrīmatasāraṭippanam.*

Substance, palm-leaf. 13½ × 2¼ inches. Folia, 1-30 of which 4, 5, 8, 14, 27 are missing. Lines, 6 on a page. Extent in ślokas, 470. Character, Nāgara. Appearance, old and mouse-eaten. Incomplete.

The work appears to be a collection of notes on a work called the *Śrīmatasāra*, no MS of which, however, is known to exist.

Beginning :—

श्रीभैरव उवाच ।

श्रीमतसारमन्त्रटिप्पनकं लिख्यते । यथा :—

तुष्णीशना[थ] । मित्रनाथ । उड्डीशनाथ । षष्ठीशनाथ । चर्चिशनाथ । अमग । भट्टा लउंदा । कडा । शक्तिः । मश । रतना । अमोत्रा । माया ।

एकैकस्य तु सिद्धस्य शक्तीनां द्वयं द्वयं । गगनानन्द । कुमुदानन्द । पद्मानन्द । देवानन्द । भैरवानन्द । कमलानन्द । शिवानन्द । रामानन्द । कृष्णानन्द । एवं नव सिद्धा । शोभनानन्दा । संगी-नन्दा । ऊर्ध्वसानन्दा । जयन्तानन्दा । भविचानन्दा । देदयानन्दा । केसमानन्दा । खव्यानन्दा (?) । पूर्व्वानन्दा ॥

नवसिद्धानां नवशक्तयः यथाक्रमेण ज्ञातव्या प्रणवं संयुता । पराविद्या देवानन्द नन्द्रनास ॥ विद्यादिरुद्रान्त(द्ररुत्मा)पर्य्यन्तं गुप्तनामानि ।

ऐं, क्लीं, श्रीं, फ्रें, क्रौं, नमो भगवति म्फ्रों, म्फ्रों, कुब्जिके क्रां, क्रीं, क्रौं, etc. etc.

Colophons :—

10B, इति मतसारे न्यासक्रमो नाम पञ्चमः पटलः, 20B, इति मतसारे सप्तमः पटलः; 26B, इति मतसारे मन्त्रविद्या-कोशोद्धारो नाम अष्टमः पटलः ।

The body of the Supreme Being is described as constituted by the letters of the alphabet.

10B—कथं देवाधिदेवस्य शरीरं परमेश्वर ।
तदहं श्रोतुमिच्छामि कथयस्व मम प्रभो ॥

अ शिरे, आ ललाटे, इ दक्षिणनेत्रे, ई वामनेत्रे, उ दक्षिणकर्णे, ऊ वामकर्णे, ऋ दक्षिणनासापुटे, ॠ वामनासापुटे, ऌ दक्षिणगण्डे, ॡ वामगण्डे,

ए अधरदशनपंक्तिः, ऐ ऊर्द्ध्वदशनपंक्तिः, ओ अधरोष्ठे, औ ऊर्द्ध्वोष्ठे, अं शिरसायां, अः जिह्वा[यां] ।

उत्तमाङ्गे स्मृतं ह्ये[तद्दे]वदेवस्य भैरवि । कवर्गे दक्षिणबाहू । चवर्गे वामबाहू । टवर्गे दक्षिणस्फिच्पादाङ्गुल्यन्तं । तवर्गे(र्ग) वामस्फिचिपादान्तं । पफ दक्षिणवाम-कुक्षि । बभ पृष्ठोदरे । म हृदये । य त्वचायां । र रक्ते । ल मांसे । व स्नायु । श शुक्रे । ष अस्थि । स मज्जायां । ह प्राणे ।

क्षकारे क्रोधमुद्दिष्टं एवं कुलसुरेश्वरि ।

... ...

(Fol. 12B)—

शरीरं देवदेवस्य मायातीतमकर्म्मजं ।
शब्दब्रह्म तदेवं तु मतसारे प्रकाशितम् ॥
इदमभ्यसते यस्तु रुद्रन्यासं सुदुर्लभम् ।
ब्रह्महत्याश्वमेधाद्यैः पुण्यपापैर्न लिप्यते ॥

5808.

5726. पारमेश्वरतन्त्रम् । *Pārameśvaratantram.*

Substance, country-made paper. 9¾ × 6 inches. Folia, 5-138 with several broken fragments at the end. Fol. 19, 20, 91 and 92 are missing. Lines, 12 on a page. Character, Nāgara. Appearance, old. Incomplete.

The work belongs to the order of the Vīra Śaivas. Prof. Bendall notices a MS of a work of this name in his *Catalogue of the Buddhist Sanskrit MSS in the University Library, Cambridge* (p. 27f.). But the latter appears to be different from the present work.

Colophon of Paṭala I (Fol. 8A) :—

इति श्रीपारमेश्वरतन्त्रे शिवाद्वैतसिद्धान्ते वीर-शैव-दीक्षाप्रकरणे मतभेदनिरूपणं नाम प्रथमपटलः ।

Beginnings of the Paṭalas :—

Paṭala II (Fol. 8B):—

पार्व्वत्युवाच ।

त्रियम्बक नमस्तेस्तु त्रिपुरघ्न यमान्तक ।
वद मे करुणासिन्धो लिङ्गधारणलक्षणम् ॥
दीक्षाद क्रमशः सर्व्वं सज्जिकादिगुणाधिकम् ।
शिवाग्निजननं चापि सर्व्वं विस्तरतः प्रभो ॥

Paṭala III (Fol. 15A):—

देव्युवाच ।

नमस्ते रुद्रकोदण्डधारिणे फणिहारिणे ।
वद विश्वेश दीक्षाया विधानं परमेश्वर ॥

Paṭala V (Fol. 26B):—

अथ प्रटण महादेवि दीक्षाबन्धनलक्षणम् ।
सज्जिकागुणलिङ्गानां संयोगक्रममादितः ॥

Paṭala VI (Fol. 33A):—

देव्युवाच ।

कपर्द्दिन् करुणासिन्धो + + + + + हेश्वर ।
वद मे षट्स्थलज्ञानलक्षणं तत्फलं विभो ॥

Paṭala VII (Fol. 39A):—

देव्युवाच ।

निस्तरङ्गसुखाम्भोधौ नौकाक्रीडन शङ्कर ।
नमस्ते निर्व्विकाराय निर्विशेषाय शम्भवे ॥
कथितानि त्वयान्यानि यानि सप्तविधानि मे ।
वीरशैवादिभेदेन शैवं सप्तविधं त्विति ॥
उपक्रमेणानाद्यादिमतानां लक्षणादिकं ।
यज्ज्ञात्वा मनुजः सद्यो वीरशैव[ः] प्रवर्त्तत ॥

Paṭala VIII (Fol. 45B):—

देव्युवाच ।

चिन्मयानन्दविज्ञानगगनाय महात्मने ।
नमस्त्रिशूलहस्ताय पशूनां पतये नमः ॥

कथितं मतभेदास्ते सप्तसंख्या त्वयानघ ।
वीर-शैवमतं तत्र विशेषेणाभिवर्णितम् ॥

वीरत्वं नाम भगवन् विज्ञेयं तु कथं मया ।
प्रविश्य वीर-शैवे तु किं वा कार्य्यं हि लिङ्गिनाम् ॥

भक्त्या मताश्रयं कृत्वा वैराग्यशिथिलेन्द्रियः ।
पुनरागत्य विषयान् कां गतिं+ +गच्छति ॥

एतत् क्रमेण विश्लेषं वद विस्तरतो मम ।
तारतम्येन यत् प्राप्यं प्रवृत्त्यागच्छ वाहरत् (?) ॥

Paṭala IX (Fol. 51B):—

देव्युवाच ।

नमश्चैतन्यरूपाय नमः पञ्चमुखाय ते ।
वद विस्तरतो देव वीरशैवस्य विक्रमम् ॥

Fol. 53A refers to some of the characteristics of the school—

वीर-शैवमतं प्राप्य यः कुर्य्यात् प्राणहिंसनं ।
कर्म्मणा मनसा वाचा स वसेद्रौरवे चिरम् ॥

वीर-शैवमतं प्राप्य यः कुर्य्यात् परपीडनं ।
भोगार्थं संग्रहं मद्यं मांसं स्त्रीं च कलं जनं ॥

स्वर्णस्तेयं दिवानिद्रां सर्व्वदैवान्नभोजनं ।
प्राकृतैः सह सङ्गञ्च सङ्गत्यागञ्च लिङ्गिनां ॥

स कोटिजन्मसु श्वान चाण्डालो भुवि जायते ।
वाहनं जनसङ्गञ्च स्त्रीकथा लौल्यमेव च ।
अनाधरं तथालस्यं वीरशैवो न कारयेत् ॥

यः पश्यत्यन्धवद्रूपं शब्दविद्वधिरोपमः ।
काष्ठवद्दृष्टदेहो यो वीरशैवः स उच्यते ॥
स्वबुद्ध्या चिन्तयेदर्थं वीरशैवव्रते सकृत् ।
संप्राप्य दुःखराशिं वा शनैर्मुक्तो भवेद्ध्रुवम् ॥
न यस्यानीश्वरे चित्तं यस्य चक्षुर्न दूरगं ।
न प्राणिपीडनपरो वीरशैवः स उच्यते ॥
मम विज्ञाय शास्त्रस्य यो बुद्ध्या विषयातुरः ।
तस्य नास्त्येव नास्त्येव मत्पदप्राप्तिरीश्वरि ॥ etc. etc.

The above extract shows that the school is strict and stoical, zealously guarding itself against anything impure and immoral either in thought or deed.

Paṭala X (Fol. 57B):—

देव्युवाच ।

योगिहृत्पद्मवासाय योगिवेद्यस्वरूपिणे ।
ब्रह्मतत्त्वप्रकाशाय शिवाय शिव ते नमः ॥
अनादिशैवनिष्ठस्य मोक्षाचारो विधिः सदा ।
संकल्पोद्दिश्य च फलं शक्त्या जङ्गमपूजनं ॥
नित्यं नैमित्तिकं काम्यं यथोक्तं गुरुशास्त्रतः ।
आचरेत्त्रिविधं कर्म्म यथेष्टसुखभाग्भवेत् ॥
आदिशैवमतस्थस्य यावन्नित्यं समाचरेत् ।
यदि शक्त्याचरेदन्यं नित्यबुद्ध्या तथाचरेत् ॥
अनुशैवमतस्थस्चेत् यावन्नित्यं तथाचरेत् ।
त्यक्त्वा कर्म्मफलासङ्गं काम्यनैमित्तिकानि च ॥
यथाशक्त्याचरेन्नि(नि)त्यं त्यक्त्वाशक्यं स्मरेत् शिवं ।
सर्व्वलिङ्गमयं ध्यायन् महाशैवव्रतिजगत् ॥

\+ \+ \+ \+ \+

निरूपितं महादेव भगवन् भवता प्रभो ।
स्वरूपं योगशैवस्य ज्ञातुमिच्छ[ा]स्ति मे हृदि ॥

यन्नाम ज्ञानशैवं तत् क्व भेदो ज्ञानयोगयोः ।
याभ्यां समन्वितो वीरः शैवव्रतफलं लभेत् ॥
एतत् सर्व्वं सविस्तारं ब्रूहि शङ्कर तत्त्वतः ।
वद तत् प्रियशिष्योऽहं प्रियोऽसि त्वं गुरुर्मम ॥

This chapter on yoga is really lofty and elevating. It describes two types of yoga, Sākāra and Nirākāra and lays stress on truth and control of the senses.

Paṭala XI (Fol. 63A):—

देव्युवाच ।

परमेश्वर सर्व्वज्ञ शुद्धज्ञानमहोदधे ।
पञ्चाक्षरस्य माहात्म्यं श्रोतुमिच्छामि शङ्कर ॥
पञ्चाक्षरीविधानञ्च जपध्यानादिषु प्रभो ।
कथयस्वाभिधेयञ्च तेन मन्त्रेण कृत्स्नशः ॥
देवताश्च ऋषींश्छन्दः तन्मे वद महेश्वर ॥

Paṭala XII (Fol. 70A):—

देव्युवाच ।

देवदेव महादेव महेश मृड शङ्कर ।
ज्ञानयोगस्य म[ा]हात्म्यं वद मे करुणाकर ॥

Paṭala XIII (Fol. 76B):—

देव्युवाच ।

करुणामृतकल्लोल कटाक्षं गणनायकं । (?)
कैवल्यकलनाधारं नमस्ते गिरिधन्विने ॥
कथितञ्च रहस्यं तत् वीर-शैवाभिधं + + ।
श्रुतश्चादिगतं देव मतभेद सविस्तरं ॥
+ + + + + मतभेदा निरूपिताः ।
सर्व्वदा सर्व्वयत्नेन नित्यं लिङ्गार्च्चनं स्थिति ॥

तस्य लिङ्गस्य भगवन् पूजादिषु निरन्तरम् ।
स्थानभेदान् ममाचक्ष्व करपीठादिलक्षणात् ॥
तारतम्येन वा + + फलं + + स्थलादिषु ।
यदि तर्हि समं कि[ं वा] विशेषस्तत्र कथ्यताम् ॥

Patala XIV (Fol. 82A): –

देव्युवाच ।

विज्ञानं घनविज्ञानमयविज्ञानकारणं ।
नमस्ते गुरवे तुभ्यं शम्भवे शशिमौलये ॥
सरहस्यश्च पूजादौ कथितं करपङ्कजं ।
इदानीं श्रोतुमिच्छामि लिङ्गलक्षणमीश्वर ॥

Patala XV (Fol. 88A): –

देव्युवाच ।

सृष्ट्वा तमेकं स्वात्मानमनेकं कुरुते पुनः ।
एकीकृत्य ग्रसति यः तस्मै रुद्र नमोऽस्तु ते ॥

... ...

सरहस्यमुपादिष्टं वीर-शैवाभिधं मतम् ।
अन्यानि चादिशैवादि ह्यानुपूर्व्येण मे प्रभो ॥
इयानेव विशेषोऽत्र यदुक्तं पूर्व्वमध्यमे ।
यद्यस्ति वा विशेषोऽत्र तारतम्येन वा क्वचित् ॥
अस्ति चेदपि भेदो वा तारतम्येन वा समः ।
तत्र तत्र विशेषो वा को वा वद महेश्वर ॥
अथैषां को नवाचारः वीरशैवेपि नान्यतः ।
वीरशैवेषु वा देव विशेषो मम कथ्यताम् ॥
वीरशैवे विभेदेषु स्थितानामधिकारिणां ।
दैवाद्वा बुद्धितो वापि लिङ्गादीनां विनाशने ।
+ + + + +
लिङ्गादिनाशपीठानां वीराणां वद मे हर ॥

Paṭala XVI (Fol. 94A):—

देव्युवाच ।

नमस्ते सच्चिदानन्द विज्ञानघनमूर्त्तये ।

... ...

... ...

इतः पृच्छाम्यहं प्रश्नं स्वसन्देहापनुत्तये ।

पारदादीनि लिङ्गानि तत्प्रमाणं विकल्पकम् ॥

तत्प्रमाणेन कथितं लक्षणं लिङ्गमानकम् ।

... ...

शैलादिसर्व्वलिङ्गानामियदेवान्यदस्ति वा ॥

मयि प्रेयानसि श्रीमान् भक्त्या शिष्योस्म्यहं तव ।

तत् पृच्छामि प्रवक्तव्यमद्य मे परमेश्वर ॥

Paṭala XVII (Fol. 99B):—

देव्युवाच ।

सर्व्वज्ञ सकलाधार ... ...

वद लोकोपकाराय वीरे शैवविशेषकम् ।

इतः परतरं किं वा चास्ति चेद्ब्रूहि मे विभो ॥

Paṭala XVIII (Fol. 105A):—

इदानीं श्रोतुमिच्छामि योगं निर्याणसंज्ञितम् ।

न्येषु लिङ्गिषु जीवत्सु कर्त्तव्यमुदितं त्वया ॥

तेषां निर्य्याणसमये प्राणिनां क्रियते नु किं ।

तेन वान्येन विश्वेश भक्तिशिष्यसुतादिना ॥

निर्याते लिङ्गिनो देही(?) किं वा कार्य्यमतः परम् ।

एतन्मे श्रद्दधानायै श्रोतुमादरतो वद ॥

यच्छ्रुत्वा लिङ्गिनः सर्व्वे भवध्यानपरास्तथा ॥

Paṭala XIX (Fol. 112B):—

उक्तं निर्य्याणयाणान्ते भक्तशिष्यात्मजन्मनां ।

यदौर्द्ध्वदैहिकं कृत्यं सरहस्यं सविस्तरम् ॥

एतावदेव नो किन्तु विशेषो यदि वाच्र तु ।
गृहमेधिन्तप[दी]नां योगिभक्तविरागिणां ॥
सस्त्रीकास्त्रीकधर्म्माणां दरिद्रधनिनामपि ।
+ + + + + किं कार्य्यं पुण्यकालादिषु प्रभो ॥

Paṭala XX (Fol. 119A):—

देव्युवाच ।

... ...

... ...

शैवदीक्षाप्रकारो मे भवत्येवं निरूपितः ।
तदवान्तरभेदाश्च विधानं लक्षणादिकम् ॥
दीक्षाभेदाश्च सर्व्वेपि तारतम्यफलं त्वयि ।
श्रुतं त्वधिगतं एष्ठ[ ] मया देव त्वयाखिल[म्] ॥
अनुशैवादिभेदानां सर्व्वां वीरांततत्मनां ।
एक एवोदिता दीक्षा भेदस्तरतमत्वतः ॥
सम्भवेद्यदि चैवं वा विशेषं तत्र मे वद ।
समानायान्तु दीक्षायां लिङ्गनाशतनुं त्यजेत् ॥
विधिरेकस्य कथितः कथितं वैषम्यमीश्वर ॥
तस्यापि पूर्व्वमुदितो यथास्यां निर्विशेषतः ॥
कृपां कुरु मयि स्वामिन् भक्तोद्धारणदीक्षित ।
भक्तायै चानुरक्तायै प्रपन्नायै निरूपय ॥

Paṭala XXI (Fol. 125A):—

देव्युवाच ।

तिरस्कृतानिमाद्याय अष्टैश्वर्य्यप्रदायिने ।
त्रिपुटीभोगतुष्टाय पुष्टानां पतये नमः ॥

... ...

... ...

त्वया निरूपितं सर्व्वं वीरशैवमतं महत् ।
महदरणवाद्यनादीनि श्रुतान्यधिगतानि मे ॥

कर्म्मादिकारिणतानि सूचितानि स्फुटं महत् ।
इदा[नीं] श्रोतुमिच्छामि स्वरूपं ज्ञानयोगयोः ॥
निरूपय सविस्तारं सर्व्वलोकोपकारकं ।
वेत्ता तव स्वरूपस्य त्वदन्यो नास्ति कश्चन ॥

Patala XXII (Fol. 131A):

ईश्वर उवाच ।

न साधयति मां योगः सांख्यधर्म्मः स्वनुष्ठितं ।
स्वाध्यायोपितयस्तीर्थैर्व्रतानि नियमा यमाः ॥
... ...
ज्ञानं ध्यानं शुश्रूषा च यत्नः सर्व्वोपि साधितः ।
यदि मद्भक्तिरहितं न पनात्यपि वा क्वचित् ॥
अनाचारोपि वाचारवृत्तिः शुद्धोपि वा न वा ।
सुजनो दुर्ज्जनो वापि मद्भक्त्या पदमुच्चरेत् ॥

Patala XXIII (Fol. 137B ff.) is fragmentary. Here Devī puts her question thus:—

वदाद्य विस्तरादीश प्रश्नं सत्प्रश्नगर्भितम् ॥
निर्लेपानङ्गसूक्ष्मस्य जगदाधा(दा)रता विभो ।
स्थूलस्य सविकारस्य कार्य्यकारणताकथाम् ॥

5809.

93. ज्ञानार्णवतन्त्रम् । *Jñānārṇavatantram.*

Substance, country-made paper. $7\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 179. Lines, 8 on a page. Extent in ślokas, 2,100. Character, Nāgara. Appearance, old. Complete.

The work is described in IO. IV. 2552; HPR. I. 124; CS. V. 23. The present MS contains 23 Patalas. The work as printed in the *Anandasrama Sanskrit Series* (No. 69—Poona, 1912) contains 26 Patalas.

The table of contents as given in the last leaf :—

वर्णमालाकथनम्, बालान्यासविधिः, त्रिपुरेश्वरीन्यासः, त्रिपुरेश्वरक्रमविधिः, त्रिपुरायजनवलिविधिः, पूर्व्वसिंहासनम्, द्वितीयसिंहासने पश्चिमसिंहासनम्, सर्व्वसिंहासनम्, त्रिपुराद्वादशभेदाः, षोडशाक्षरीविद्या, त्रिपुरामुद्रानिरूपणम्, श्रीविद्यायजनविधिः, श्रीविद्याप्रयोगविधिः, त्रिपुर्य्यांग्नपुष्या + + त्रिपुराबीजसाधनम्, त्रिपुराजपहोमविधिः, होमविधिः, दूतीयजनविधिः, ज्ञानदूतीयजनम्, दीक्षाविधिः, पवित्रारोपणादि, दमनरोपणम् ।

5810.

3483. *Jñānārṇavatantram.*

Substance, country-made paper. 12 × 5 inches. Folia, 65. Lines, 8 on a page. Extent in ślokas, 1,550. Character, Bengali. Appearance, fresh. Incomplete at the end.

The present MS goes to the end of the 20th Paṭala which is styled दीक्षाविधान. In IO however the 21st Paṭala is given this name.

Attached to the present manuscript there is an index to the work in two leaves. It runs thus: -

अथ नित्यातन्त्रस्य निर्घण्टः ।

अक्षमालानिर्णयः, १ । १ । ३; बीजरूपविन्दुत्रयकथनम्, १ । १ । ८; त्रिपुरात्रिविधमन्त्रादिकथनम्, तत्रादौ बालामन्त्रः, २ । २ । ४; अथ पञ्चवाणनामानि, तेषां मन्त्राः, ४ । २ । ३; अस्य मातृकान्यासादि ४ । २ । ७; अस्य अन्तर्जिनविधि, ६ । १ । ५; अथ बाह्यपूजाक्रम, यन्त्रोद्धारश्च ६ । १ । ८; अथ पूजामण्डलम्, ७ । २ । ७; अथावाहनादि पञ्चमुद्राः, ९ । १ । २; अथ वलिदानादिकम्, ११ । १ । १; अथारात्रिकविधानम्, ११ । १ । ४; अथ पञ्चसिंहासनादि त्रिपुराभैरवीप्रकरणम्, १३ । १ । १; अथ सम्पत्प्रदाभैरवीध्यानम्, १३ । १ । ४; अस्या यन्त्रम्, १३ । २ । ६; अथ द्वितीयसिंहासनविवरणम्, १४ । १ । ८; तृतीयसिंहासने षट्कूटाभैरवी, १५ । १ । ७; भुवनेश्वरभैरवी, १६ । १ । ३; अथान्नपूर्णामन्त्रादि, १६ । २ । ४; अथ महात्रिपुरसुन्दरी तस्या भेदश्च १८ । २ । ७;

अथ कामेश्वरीमन्त्रः, २३ । १ । ६; अथ षोडशाक्षरी श्रीविद्या, २४ । २ । ५; अथ चक्रमण्डलपूजाविधिः २६ । २ । ८; अथ विशेषार्घ्यलक्षणम्, २७ । २ । ४, अथ श्रीविद्यान्यासं, २८ । १ । ८; अथ कामेश्वरी महाविद्या, ३३ । १ । १; अथ सर्व्वमुद्राविवरणम्, ३४ । २ । ६; अथान्तर्यजनं चक्रार्च्चनञ्च, ३५ । २ । ६; अथ श्रीचक्रविधिः, ४३ । १ । ६; मालाप्रकरणम्, ४३ । २ । १; तत्र महापातकनाशन प्रकारं, ४६ । २ । २; अथ श्रीविद्यापूजनम्, ४७ । १ । ३; अथ रत्नपूजाविधानम्, ४८ । १ । १; एतस्याः साधनम्, ४९ । १ । ४; शक्तिबीजसाधनम्, ४९ । २ । ८, जपहोमविधिं, ५० । २ । ४; काम्यहोमविधिं, ५४ । २ । ८; काम्यहोमे द्रव्य परिमाणम्, ५६ । १ । ८; होमान्तरम्, ५६ । १ । ४; कुमारीपूजा तत्फलम्, ५८ । २ । २; अथ द्रव्यभेदविधिः, ५९ । १ । १; स्थूलसूक्ष्मभेदेन द्रव्यपानविधि फलञ्च, ५९ । १ । ७; अथ दीक्षाविधिः, ६२ । १ । ४, तत्र षट्चक्रवर्णना, ६३ । २ । ६; तत्र मासानां गुणदोषः, ६५ । २ । १ ।

5811.

3191. *Jñānārṇavatantram.*

Substance, country-made yellow paper. 14 × 5½ inches. Folia, 66. Lines, 10 on a page. Extent in ślokas, 1,650. Character, Bengali. Appearance, fresh.

The present MS contains 22 Paṭalas.

Post Colophon :—

समाप्तोऽयं ग्रन्थः । ॐ तत्सत् श्रीगुरवे नमः । श्रीदुर्गायै नमः ॥ श्रीमहात्रिपुरसुन्दर्य्यै नमः ॥ श्रीश्रीकृष्णानन्दनाथस्य पुस्तकमिदं ॥ श्रीश्रीमहाकालसहितायै श्रीमहाकालिकायै नमः ॥

5812.

1773. *Jñānārṇavatantram.*

Substance, country-made paper. 10¾ × 4½ inches. Folia, 108. Lines, 7 on a page. Extent in ślokas, 1,750. Character, Nāgara. Appearance, fresh. Complete.

The present MS contains 23 Paṭalas.

5813.

1619. *Jñānārṇavatantram.*

Substance, country-made yellow paper. 12½ × 3½. Folia, 45. Lines, 9, 10 on a page. Extent in ślokas, 1,500. Character, Bengali. Appearance, old. Complete.

This MS contains 23 Paṭalas.

5814.

5861A. *Jñānārṇavatantram.*

Substance, country-made paper. 10¾ × 4¼ inches. Folia, 35. Lines, 13 on a page. Extent in ślokas, 1,800. Character, Nāgara. Date, Samvat 1768. Appearance, discoloured. Complete.

This MS contains 22 Paṭalas.

Post Colophon Statement :-

शुभमस्तु । श्रीकल्याणमस्तु । लिखितमिदं पुस्तकं ब्रह्मचारि-हरिनन्दनेन । महादेवार्पणमस्तु । संवत् १७६८ मार्गशीर्ष शुद्ध १ गुरुवारे ।

5815.

2689. ज्ञानार्णवे त्रैलोक्यमोहनकवचं दीक्षाविधानञ्च ।

Trailokyamohanakavaca and Dīkṣāvidhāna from Jñānārṇava.

Substance, country-made paper. 9¼ × 4 inches. Folia, 15. Lines, 7, 9 on a page. Extent in ślokas, 200. Character, Nāgara. Date, Samvat 1758. Appearance, discoloured. Complete.

This MS contains extracts attributed to but not found in the printed edition of the Jñānārṇavatantra. The colophon of the *Trailokyamohanakavaca* seems to indicate that the *Jñānārṇava* formed a part of *Rudrayāmala*. *Dīkṣāvidhāna*, represented here as the 21st chapter of *Jñānārṇava*, contains only several incantations

16255

pertaining to rites like *Stāmbhana*, *Māraṇa*, *Vaśīkaraṇa*, etc It does not agree either with the 21st chapter of the printed edition of the work which is entitled *Jñānahomavidhi* or with the 24th chapter of it entitled *Dīkṣāvidhāna*.

Beginning :—

श्रीदेव्युवाच ।

श्रीमत् त्रिपुरसुन्दर्य्या या या विद्यास्त्वयोदिताः ।
कृपया कथिताः सर्व्वाः श्रुतास्त्वागमतो मया ॥
प्राणनाथाधुना ब्रूहि कवचं मन्त्रविग्रहम् ।
त्रैलोक्यमोहनं चेति नामतः कथितं पुरा ॥
इदानीं श्रोतुमिच्छामि सर्व्वार्थकवचं स्फुटम् ॥

14B, इति रुद्रयामले उमामहेश्वरसंवादे ज्ञानार्णवे स्तुतिपूज्य त्रैलोक्य मोहनं नाम कवचं संपूर्णम् ।

The Last Colophon.

इति ज्ञानार्णवे नित्यातन्त्रे उमामाहेश्वरसंवादे दीक्षाविधानं नाम एकविंशति पटलः ।

Post Colophon :—

संवत् १७५८ समय कार्त्तिक शुद्ध १ प्रतिपदा लिखितम् ।

5816.

87. ज्ञानार्णव-टीका । *Commentary on Jñānārṇava*.

By Kāśīnātha, son of Jayarāma Bhaṭṭa and Vārāṇasī.

Substance, country-made paper $9\frac{3}{4} \times 4\frac{1}{2}$ inches Folia, 55. Lines, 15, 16 on a page. Extent in ślokas, 2,500. Character, Nāgara. Appearance, fresh. Complete.

The present MS is noticed in L. II. 826. This commentary is entitled गूढार्थादर्श. According to it the work

consists of 23 Paṭalas. The MS has two different paginations, one extends to 18 containing the first nine Paṭalas, and the other to 37, containing the rest.

5817.

2822. **षोडशनित्यातन्त्रम् ।** *Ṣoḍaśanityātantram.*

Substance, country-made paper. 10 × 4 inches. Folia, 5. Lines, 11 on a page. Extent in ślokas, 130. Character, Modern Bengali. Appearance, discoloured.

The present MS contains only the 36th Paṭala of the work. The complete work has been published in the Tantric Texts of Arthur Avalon in two parts under the name *Tantrarāja Tantra* (Calcutta, 1919, 1926).

Post Colophon Statement : –

अष्टमे त्वेकविंशश्च षड्विंशेऽपि चतुष्टयम् ।
पञ्चविंशे नव श्लोकाः द्वात्रिंशद्याकुलाद्धगः ॥

5818.

10727. **नेत्रज्ञानार्णवः ।** *Netrajñānārṇava.*

Substance, country-made paper. 12 × 2 inches. Folia, 197 (marked on one end of the leaf, with letter numerals; on the other, with figures) of which fol. 95 125 are missing. Lines, 6 on a page. Extent in ślokas, 3,500. Character, Newari. Appearance, fresh: with portions of the left-hand sides of a number of Fol. eaten up by mice. Incomplete.

Beginning : –

ॐ नमो मृत्युञ्जय-शिवाय ।
अमृतीश-महेशाय विश्वार्त्तिध्वंसनाय च ।
परापरस्वरूपाय नमस्ते त्र्यलोचने ॥

विधुस्य सूर्य्यस्य हुताशनस्य सत्त्वादिरूपाः प्रभवान्तरीशे ।
सहा च लक्ष्म्याममृतापुरा सा संजीवनी चामृतपूर्ब्बवक्त्रा ॥

... ...

2A, वर्गान्तत्रयदीर्घपौर्ब्बभपरं खण्डेन्दुविन्दुर्युतं ।
तस्याग्रम्पुरहीक्षताग्रदधतं सृष्टिं च संहारतौ ॥
सञ्जीवं नि नवेश्वरं परिकरा पञ्चाष्टभिः संस्थितं ।
श्रीमन्नेत्रमहेश्वरो जयति सव + परि संस्थितं ॥
हिमालये सुखासीनं वाममार्गविनिर्गते ।
आनन्दा सा यदा देवी पप्रच्छ परमेश्वरं ॥
ब्रह्माद्या सर्व्वदेवे च वाल्मीकादिमहर्षयः ।
गणसिद्धिसमाकीर्णे हरपादुत्फुल्ललोचना ॥

श्रीदेव्याह ।

मानवानां हितार्थाय कौतूहलं मम प्रभो ।
कालमृत्युः कथं वञ्चेत कर्म्म सर्व्वादि तत्कथं ॥
गुरुशिष्यपरीक्षा च गुरुमण्डलमेव च ।
अधिवासनदीक्षा च विशिष्टः समयः कथं ॥
सर्व्वाधिकारदीक्षा च निर्व्वाणपदमेव च ।
देवार्चनादिहोमं च विशिभावानि शान्तिकं ॥
प्रतिष्ठाजीर्णमुद्धारं लक्षणं शिवशक्तिकं ।
मन्त्रसर्व्वादिदेवानां शक्तीनां च तथैव च ॥
लयं चैत्रजलादीनां कर्म्म कर्म्मान्तराणि च ।
बीजविन्यासभावानां भूरिते स्वप्रकानि च ॥
उत्क्रान्तियोगभावानामन्त्येष्टिश्च मतम्महत् ।
संग्रामोक्षणकर्म्मेति मूर्त्तिं चोत्तरमेव च ॥
घोराघोर महत् कर्म्ममोषधीनां प्रवर्त्तयं ।
एतादयो महाकर्म्म कथयस्व महेश्वर ॥

Colophons of the different chapters :—

3B, ०इति नेत्रज्ञानार्णवे महातन्त्रे पृच्छाख्यानो नामः प्रथमः ।

7A, ०कालमृत्युर्विवरणो नाम द्वितीयः ।

13B, ०मृत्युञ्जयशान्त्यध्यायो नाम तृतीयः ।

17A, ०नित्याह्निकं चतुर्थः ।

18B, ०गुरुशिष्य पञ्चमः ।

22A, ०गुरुमण्डलविधानो नामः षष्ठः ।

28A, ०दीक्षाधिवासन सप्तमः ।

31A, ०समयदीक्षाष्टमः ।

33A, ०विशिष्टसमयदीक्षा नवमः ॥

34B, ०सर्व्वाह्निकाराद्धिवासन दशमः ॥

38A, ०आचार्य्यपददीक्षा एकादशमः ॥

43A, ०निर्व्वाणदीक्षाविधान द्वादशमः ।

45A, ० + + + त्रयोदशमः ।

47A, ०शोधनदीक्षा चतुर्द्दशः ।

48A, ०मोक्षदीक्षाविधि पञ्चदशः ।

49B, ०नेत्रकर्म्मात्मभाव षोडशः ।

53B, ०ललितस्वच्छन्ददीक्षाविशेष सप्तदशः ।

57B, ०तत्त्वदीक्षाविशेषविधाने अष्टादशः ।

58B, ०तत्त्वदीक्षाप्रकरणोनविंशतिः ।

60A, ०शान्तिकादीक्षाविशेषकरण विंशतिः ।

65A, ०भूमिशोधन-वास्तुस्थापनविधैकविंशतिः ;

66B, ०वनयात्रालिङ्गप्रतिमादिलक्षणविधानो नामैकविंशतिः(?) ।

69A, ०देवदेवीस्थापनविधाने द्वाविंशतिः ।

72B, ०प्रतिष्ठाविधानो नाम चतुर्विंशतिः ।

76A, ०जलप्रतिष्ठाविधानो नामः पञ्चविंशतिः ।

78A, ०जीर्णोद्धारणाक + पञ्चविंशतिः(?) ।

81A, ०हेरम्बार्च्चनविधिः षड्विंशतिः ।

83B, ०मार्त्तण्डार्चनविधिः सप्तविंशतिः ;

88B, ०जयवैष्णवार्चनादि अष्टाविंशतिः

91A, ०शुद्धशिवाद्वैत-नवविंशतिः ।

126A, ०निर्व्वाणपूजासूत्र-सप्तत्रिंशः ।

129A, ०त्रैत्रेशार्च्चन अष्टत्रिंशः

134A, ०श्रीः सिद्धिलक्ष्म्यर्च्चनचालीशः ।

139A, ०स्वच्छ्यादि सप्तादशक्रमार्च्चन एकतालीशः ।

141A, ०त्रैलोक्यविजयार्च्चन द्विचत्वारिंशः ।

144A, ०क्रमकअर्च्चन त्रयचालीशः ।

146B, ०प्रतीत्या महाक्रमार्च्चन चतुश्चालीशः ।

149B, ०सप्तकोटेश्वर्य्यार्च्चन पञ्चचत्वारिंशतिः ।

152B, ०चित्रादिविधाने षष्ठचत्वारिंशः ।

159B, ०सर्व्वोत्तरनिर्व्वाणान्तमूर्त्तिमन्त्रः सप्तचत्वारिंशः ।

175A, ०योगाभ्यास नवचत्वारिंशतिः ।

179A, ०पवित्राधिवासः पञ्चाशः ।

181B, ०पवित्रारोहण एकपञ्चाशः ।

186A, ०सुपवित्रचण्डार्च्चन द्विपञ्चाशः ।

187B, ०कुलान्वयपवित्रारोहणः त्रिपञ्चाशः ।

189B, ०दमनारोहण चतुःपञ्चाशः ।

191A, ०उत्क्रान्तिविधि पञ्चपञ्चाशः ।

192A, ०अंतिष्ठ्यादि नवदिनलिङ्गप्रतिष्ठा षट्पंचाशः ।

193A, ०संडमोक्षणः सप्तपञ्चाशः ।

195A, ०चन्द्रावस्थाष्टपञ्चाशः ।

197A, ०स्वतन्त्रभावने श्रीमन्नवेशस्य मुखनिर्गत-श्रीपरापृच्छाभिधाने श्रीगुर्व्वर्च्चन नाम नवपञ्चाशः समाप्त इति ॥

End : -

देवि देवि तव स्नेहात् प्रकाशोऽयं महेश्वरः ।
सर्व्वाधिकारपौर्व्वादीनुत्तरोत्तरमन्ततः ॥

प्रकाशोऽयं महातन्त्रं ज्ञानार्णव महोत्तमं ।
इति ज्ञात्वा महादेवि न पुनं च प्रकाश्यते ॥

Five injured leaves at the end contain an index.

5819.

10841. **मन्थानभैरव ।** *Manthānabhairava.*

Substance, European foolscap paper of foolscap size. Folia, 199. Lines, 35 on a page. Only on one side of the paper is written. Character, Bengali. Appearance, fresh. Incomplete.

A Tantra of the Kaula Cult. The present MS contains Paṭalas LXXVI–LXXXIX. The name of the work is not clear. It is called चतुर्विंशतिसाहस्रिकायन्त्राभिधान in an inscription on a covering leaf of the MS, recording that it was presented by Mr. Rakhal Das Banerji to MM. H. P. Shastri on 16-11-13. It is further recorded there that the present MS was 'copied from a manuscript belonging to the Mohanta of Bodh Gaya dated Nepal Era 761 – 1641.'

Colophons of the different chapters : –

Fol. 5, इति महामन्थानभैरवयज्ञ-शतकोटिप्रमाणे अन्वये नवकोट्य-(पञ्चा)वतारे श्रीकुलकौलिनीमते श्रीकुलतन्त्रावतारे [चतुर्]विंशतिसाहस्रे तन्त्राविधाने शावर्य्याविधानलक्षिताकथनो नाम षट्सप्ततितमः पटलः ।

Fol. 16, ०वज्रयोगो नाम सप्तसप्ततितमः पटलः ।

Fol. 26, ०त्रिपुरयोग-शिवशक्तिसमरे सत्त्वं महामायास्तवकथनो नाम अष्टसप्ततितमः पटलः ।

Fol. 30, ०पवित्रारोहणविधिर्नाम ऊनाशीतितमः पटलः ।

Fol. 41, ०मण्डलपञ्चात्मविद्याव्रतायुधचर्य्याकुमी (.) द्रव्यकथनं नामाशीतितमः पटलः ।

Fol. 59, ०चतुर्थी-पञ्चमी-षष्ठीवर्णना नाम एकाशीतितमः पटलः ।

Fol. 65, ०तिथिभेदे चक्रनिर्णयो नाम द्वाशीतितमः पटलः

Fol. 69, ०तिथिचक्रवर्णना नाम त्र्यशीतितमः पटलः ।

Fol. 74, ०मासचक्रवर्णना नाम चतुरशीतितमः पटलः ।

Fol. 88, ०शिवराजिवर्णने शिवमायायोगो नाम सप्त(?)पञ्चाशीतितमः पटलः ।

Fol. 96, ०शिवयागविधाने एकवीरयागकारीकर्म्मको धर्म्मकोष नाम षडशीतितमः पटलः ।

Fol. 118, ०शिवरात्रिकुलिक-योगिन्यादय राज्ञदिशाश्रलवर्णनो नाम सप्तादशतितितमः(?) पटलः ।

Fol. 129, ०महाभैरवचक्रनिर्णयो नामाष्टाशीतितमः पटलः ।

Fol. 185, ०उपदेशनिर्णयो नाम एकोननवतितमः पटलः ।

5820.

8110. श्रीतन्त्रम् । *Śrītantram.*

Substance, country-made paper. 13 × 4 inches. Folia, 21. Lines, 6 on a page. Extent in ślokas, 425. Character, Bengali. Appearance, old and discoloured. Complete in six chapters.

Beginnings of the different Paṭalas:—

Paṭala I (Fol. 1):—

देव्युवाच ।

कथयस्व महादेव सर्व्वतन्त्रविशारद ।
माहात्म्यं सुगोप्यं च श्रीतन्त्रं पूर्व्वसूचितं ॥
... ...
श्रीतन्त्रं प्रदया चार्व्वङ्गी हृदये कुरु पार्व्वति ॥
आदौ सर्व्वप्रयत्नेन मन्त्रोद्धारं वरानने ।
श्रीमत्त्रिपुरसुन्दर्य्याः माहात्म्यान्तरं प्रिये ॥
भूमिश्चन्द्रः शिवो माया शक्तिः कृष्णाध्वमादनो ।
अर्द्धचन्द्रश्च विन्दुश्च नवार्णो मेरुरुच्यते ॥

Paṭala II (Fol. 4B) :—

श्रीशिव उवाच ।

मन्त्रान्तरं प्रवक्ष्यामि शृणुष्व कमलानने ।
येन विज्ञातमात्रेण जीवन्मुक्तो भवेन्नरः ॥
परा च कमला कामा वाग्भवं शक्तिरेव च ।
वाग्शक्ती च कमला त्रिकुटा योजयेत्ततः ॥

Paṭala III (Fol. 6B) :—

देव्युवाच ।

भाव-सृष्टि-स्थिति-हृती-निवाख्या पञ्चसुन्दरी ।
कथयस्व प्रभो देव यदि ते रोचते मतिः ॥

ईश्वर उवाच ।

शिवो नादस्च इन्द्रस्च शक्तिस्च भुवनेश्वरी ।
ब्रह्मा शिवेन्द्रौ शक्तिस्च महामाया ततः परा ॥

इयं सृष्टिः ।

शिवेन्द्रौ कामशक्तौ च महामाया ततः परं ।
कामस्चन्द्रो महेशस्च इन्द्रः शक्तिश्च पार्व्वती ॥
ब्रह्मा महेश्वरः शक्तिः शक्रस्च भुवनेश्वरी ।

स्थितिरेषा ।

शिवेन्द्रौ कामशक्तीव तत्परा परमेश्वरी ।
शिवशक्ती मादनेन्द्रौ शिवो वह्निन्दुमायया ॥
शिवः शक्तिस्च कलहा वह्निमायेन्दुभूषिता ।

एषा संहृतिः ॥

देव्युवाच ।

स्वप्नावतीं मधुमतीं कथयस्व मयि प्रभो ।
इदानीं श्रोतुमिच्छामि यदि वास्ति कृपा मयि ॥

Paṭala IV (Fol. 8A) :—

देव्युवाच ।

कथयस्व महादेव [अर्द्ध]चन्द्रविभूषण ।
श्रीमत्त्रिपुरसुन्दर्य्या यन्त्रपूजादिकं च यत् ॥

Paṭala V (Fol. 9A) :—

ईश्वर उवाच ।

शृणु देवि प्रवक्ष्यामि नित्यकर्म्म यथाक्रमं ।
येन विज्ञातमात्रेण जीवन्मुक्तस्तु साधकः ॥
ध्यानं कृत्वा पुनश्चैव पञ्चभूतात्मकैर्यजेत् ।
गन्धं तत्त्वं पार्थिवं कनिष्ठाङ्गुलियोगतः ॥
शब्दमयं महापुष्पं प्रथमाङ्गुलियोगतः ।
वाय्वात्मकं महापुष्पं तर्ज्जनीभ्यां नियोजयेत् ।
तेजोरूपं महादीपं मध्यमाद्वययोगतः ।
अमृतं भोजनं तद्वदमृताङ्गुलियोगतः ॥
नमस्कारेणाञ्जलिना ताम्बूले वाग्भवं स्मृतं ।
षडङ्गान्यपि विन्यस्य तीर्थमङ्कुशमुद्रया ॥
क्रौं[ ] मन्त्रेण समाकृष्य ततः सवितृमण्डलात् ।
शक्तिबीजं समुच्चार्य्य निक्षिपेद्योनिमुद्रया ॥
धेनुमुद्रां योनिमुद्रां ततस्तत्र प्रदर्शयेत् ।
मूलवाग्भवबीजेन मन्त्रयित्वाथ देवतां ॥
आनन्दामृतवारीणां मध्यस्थां परिचिन्तयेत् ।
देवीमुखारविन्दाच्च निर्गतामृतधारया ॥
सप्तकृत्वो.जपेद्विद्यामभिषिञ्चेत् स्वकां तनुं ।
एकविंशतिवाराणि जपेद्विद्यामनन्तरं ॥
देवीपादारविन्दाधो निमज्ज्योत्तीर्य्य साधकः ।
उचिते वाससी पश्चात् परिदध्यादनन्तरं ॥

आचम्य प्राङ्मुखासीनो मूलमन्त्राभिमन्त्रितं ।
धृत्वा भालतले भस्म पूर्व्वं+श्रीगुरुं स्मरेत् ॥
सूर्य्यमण्डलवासिन्यै देवतायै नमः परं ।

Paṭala VI (Fol. 19A):

ईश्वर उवाच ।

शृणु त्वं हि महाभागे पार्व्वतीप्राणवल्लभे ।
श्रीमत्त्रिपुरसुन्दर्य्याः काम्यानुष्ठानमुत्तमं ॥

5821.

1554. मालिनीविजयोत्तरतन्त्रम् ।

Mālinīvijayottaratantram.

Substance, modern Kasmiri paper. $11\frac{1}{2} \times 7$ inches. Folia, 2-40. Lines, 13, 14 on a page. Extent in ślokas, 1,400. Character, modern Kasmiri. Appearance, fresh. Incomplete.

Printed in the *Kashmir Series of Texts and Studies*, No. XXXVII (Srinagar 1922).

Post Colophon Statement:—

मालिनीविजयं देव्यास्तन्त्रं रहसि यत् पुरा ।
परमेशेन सम्प्रोक्तं भक्तानुग्रहकाम्यया ॥
कार्त्तिकेयेन यच्चोक्तं श्रुत्वा संवदतोस्तयोः ।
मुनीनां भक्तियुक्तानां संसारार्णवतारणम् ॥
तदेतद्गुर्व्वनुज्ञातो गोविन्दाश्रमसंज्ञकः ।

5822.

1549. स्वच्छन्दतन्त्रम् । *Svacchandatantram.*

With the commentary of Kṣemarāja.

Substance, Kasmiri paper in book form. $10 \times 6\frac{1}{2}$ inches. Folia, 1-303, of which 172 and 173 are missing. Lines, 24 on a page. Extent in ślokas,

1,100. Character, Śāradā. Date, Samvat 26. Appearance, fresh. Complete.

Nine Paṭalas of the work, in four volumes, have been printed in the *Kashmir Series of Texts and Studies* (Srinagar 1921, 1923, 1926, 1927).

5823.

2899. मातृकाभेदतन्त्रम् । *Mātṛkābhedatantram.*

Substance, country-made yellow paper. 16½ × 4 inches. Folia, 27. Lines, 6 on a page. Character, Modern Bengali. Extent in ślokas, 500. Appearance, fresh. Complete.

The work was published in 15 Paṭalas by Rasik Mohan Chatterji in Bengali script in *Viridhamūlatantra* or *Vividha Tantrasaṁgraha* (Calcutta 1881–6, 1903). The present MS as also the MS described in HPR. I. 284, contain 14 Paṭalas. The present MS was described in L. X. 405.

5824.

3170. *Mātṛkābhedatantram.*

Substance, foolscap paper. 15½ × 3 inches. Folia, 20. Lines, 7 on a page. Extent in ślokas, 560. Character, Bengali. Appearance, discoloured. Written in red ink. Complete.

This MS contains 15 Paṭalas. The end of the 15th Paṭala, however, agrees with the end of the 14th Paṭala of the previous MS. The 15th chapter in Chatterji's edition of the work, already referred to, has at its end a number of verses not found in this and the previous MS.

5825.

4369. *Mātṛkābhedatantram.*

Substance, country-made yellow paper. 18 × 1½ inches. Folia, 9. Lines, 7 on a page. Character, Bengali. Appearance, fresh. Incomplete.

The MS contains the first eight Paṭalas and the beginning of the ninth.

5826.

4667. *Mātṛkābhedatantram.*

Substance, country-made yellow paper. 12½ × 3½ inches. Folia, 30. Lines, 7 on a page. Extent in ślokas, 780. Character, Bengali. Appearance, fresh. Complete.

The number of Paṭalas in this MS is 14.

5827.

3900. कुलचूडामणितन्त्रम् । *Kulacūḍāmaṇitantram.*

Substance, country-made paper. 15 × 4½ inches. Folia, 11 by counting. Lines, 13 on a page. Written in tripātha form, five lines in the middle and four above and four below. Character, Bengali. Appearance, old and discoloured and pasted. Incomplete.

The work, in seven Paṭalas, has been published in the *Tantrik Texts* series (Vol. IV) of Arthur Avalon (Calcutta, 1915). The present MS contains, after the colophon of the 7th chapter, an incomplete extract on the rules of *Yonipūjā*, stated to be taken from the *Kālīkulārṇava.*

5828.

3713. *Kulacūḍāmaṇitantram.*

Substance, country-made paper. 19 × 4 inches. Folia, (by counting) 15, of which 1, 6 8, 10 15 have leaf-marks. Others have lost not only their leaf-marks but a good deal of writing in pasting. Lines, 8 on a page. Extent in ślokas, 180. Appearance, dilapidated and pasted. Character, Bengali. Incomplete.

One of the folia, the third from the end, contains the colophon of the second chapter.

Post Colophon Statement :—

दोर्दण्डोद्दण्डचण्डप्रचलदमिलताखण्डखण्डीकृतद्विट्
काण्डप्रोत्तुण्डमुण्डस्रवदसृगधिकोत्ताण्डवात्तुण्डतुण्डा ।
ब्रह्माण्डोत्खण्डकाण्डयनकलितशिरोमण्डलाखण्डलादेः
तुण्डं पण्डं लषन्ती स्तुतिषु स्तव रिपून् खण्डयेच्चण्डिका + ॥

5829.

4706. **कुलचूडामणितन्त्रे योनिस्तवः ।** *Yonistava in Kulacūḍāmaṇitantra.*

Substance, country made yellow paper. $13\frac{1}{2} \times 1\frac{1}{2}$ inches. Folium, 1 (marked 43). Lines, 8 on a page. Character, Bengali. Appearance, old Complete.

The hymn is complete in four lines of the MS which contains several other hymns as well. The *Stava* is not found in the printed edition of *Kulacūḍāmaṇi*.

Beginning :—

अथ योनिस्तवः ।

त्रिकोणमोहनपीठः मध्यो विन्दुशिवं मयम् ।
भगरूपां महाविद्यां सर्व्वदेवी नमस्तुतम् ॥
त्रिकोणे च त्रयो देवा ब्रह्मा विष्णुः शिवस्तैकं ।
सर्व्वेण(र्व्वा) राधिता योनि जं(ज्व)रमृत्यु(मित्तु)विनाशिनी ॥

Colophon :—

43B, इति कुलचूडामणितन्त्रे योनिस्तवः समाप्तः ।

5830.

5857. **उड्डीशतन्त्रम् ।** *Uḍḍīśatantram.*

Substance, country-made paper. $9\frac{1}{2} \times 4$ inches. Folia, 25. Lines, 9 on a page. Extent in ślokas, 175. Character, Nāgara Appearance, discoloured. Complete.

The work deals with sorcery of different kinds. For a description of it, cf. CS. V. 6, L. II. 989. The work in 20 chapters was printed by Rasik Mohan Chatterji in his *Indrajālādisaṃgraha* (Calcutta, 1879) and by Umācaran Tarkaratna and Tārāpada Nyāyaratna in *Sulabha Tantraprakāśa* (Calcutta, 1887). Though the beginning of the present MS agrees with the beginning of L. II. 989, it is prefaced by a statement giving the name as *Mantracintāmaṇi* (अथ मन्त्रचिन्तामणिर्लिख्यते)। Different chapter colophons of the present MS as well as different MSS of the work refer to it by different names, e.g. उड्डामरेश्वरतन्त्र, उड्डामरमहातन्त्र, उड्डीश, वीरभद्रतन्त्र, वीरभद्रोड्डीश, रावणोड्डीश etc. Save and except the beginning the different MSS greatly differ.

Colophons of the different chapters :—

5B, इत्युडामरे महातन्त्रे प्रथमः पटलः। 11A, इति उडामरेश्वरे महातन्त्रे अञ्जनाधिकारे द्वितीयः पटलः, इत्युडामरे महातन्त्रे तृतीयः पटलः 11B, इति उडामरे महातन्त्रे भूतवादो नाम चतुर्थः पटलः; 12A, इति उडीशे मन्त्र पटलः; 13A, इति उडामरे महातन्त्रे वशीकरण-नारीवराङ्ग-संकोचनलिङ्गपाटल पटलः; 14B, इति उडामरेश्वरे महातन्त्रे + + + नाम स्वरपटलः; 15B, इति उडीशे चाण्डाली पटलः।

Post Colophon :—

शुभं भवतु। इदं पुस्तकं गोविन्दभट्टात्मज-हरिभट्टेन स्वयं वाचनार्थं वा परोपकारार्थं लिखितम्।

5831.

9929. *Uḍḍīśatantram.*

Substance, country-made paper. 10 × 5½ inches. Folia, 19. Lines, 9 on a page. Extent in ślokas, 266. Character, Nāgara. Appearance, tolerable. Incomplete at the end.

This MS has no colophon. On the obverse of the first fol. occurs the title वीरभद्रतन्त्र in a later hand.

5832.

10152 (I). *Uḍḍīśatantram.*

Substance, country-made paper. 9¼ × 5 inches. Folia, 1-16A. Lines, 16 on a page. Extent in ślokas, 320. Character, Nāgara. Date, Samvat 1872. Appearance, old and discoloured. Illustrated with mystic diagrams. Complete.

In all the chapter colophons, of which there are five, the work is called उड्डीशवीरभद्र. On Fol. 13B and 14A there are some verses stated to be taken from the भैरवीतन्त्र.

The last colophon runs as follows :—

इति श्रीविश्वसारोद्धारे रुद्रप्रणीतं श्रीपार्वती प्रदवाद(?)मंत्रावली डामरीतन्त्रसमाप्तं ।

Three lines after the last colophon we have the date :—

संवत् १८७२ मिति भाद्र सुधि दसम्यां सनीवासरे शुक्लपक्षे पुस्तकं समाप्तं ।

5833.

4619. उड्डीशोत्तरखण्डम् । *Uḍḍīśottarakhaṇḍam.*

Substance, country-made paper. 17 × 1½ inches. Folia, 9. Lines, 9 on a page. Extent in ślokas, 350. Character, Bengali. Appearance, old and discoloured. Complete.

Though called उड्डीश this has no concern with sorcery. On the contrary, it expresses many lofty ideas. The present MS, as do also the following two MSS of the work, contains six chapters and a few verses which may be a portion of the seventh chapter.

Beginning :—

ॐ नमो गणेशाय । ॐ नमः परदेवतायै ।
मातर्देवि महेशानि घोररूपे घनप्रभे ।
अनिर्देश्याञ्जनमयि प्रभापूतदिगन्तरे ॥
पूर्व्वं यत् सूचितं देवि ब्रूहि तत्साम्प्रतं मयि ॥
नवा संह+मामेकं किं कुर्व्वाणं विमोहितम् ।
द्वैतेये खादिता लोकाः सा का शक्तिस्तदादिका ॥
त्वमेव परमेशानि वर्त्तसे मोहकारिणि ।
प्रसीद कालिके सौम्ये सर्व्वत्र करुणामयि ॥
ध्वान्तरूपे ध्वान्तहारे सर्व्वेशि कथय स्वतः ।
उड्डीशोत्तरखण्डन्तु स्वसूत्रं भ्रान्तिनाशनम् ॥
उड्डीशं श्रीमहेशानि बहुधा कथितं पुरा ।
परं चोत्तरखण्डस्य माहात्म्यं वर्णितं मम ॥
सर्व्वयोगमयं कौलं ज्ञानमेवञ्च भाषितम् ।
तद्विनानान्धकारस्थेच्छिद्यतेऽतिभयापहः ॥
मम प्रियतरं नान्यत् कारणं मम सुव्रते ।
कृपया वद देवेशि अत आम्रेडयामि ते ॥

श्रीकालिकोवाच ।

साधु पृष्टं महादेव गोप्यं किञ्चिन्न तेऽस्ति मे ।
त्वामेकं पुरतः कृत्वा संहरामि सृजामि च ॥

The characteristics of a follower of the Kaula sect are indicated here as follows :—

Fol. 2A-B, श्रीशिव उवाच ।

... ...

किन्तत् कौलीन्यमाख्यातं ब्रूहि मे परमेश्वरि ॥

श्रीकालिकोवाच ।

शृणु पुत्र परं गुह्यं साधनं सुखमोक्षदम् ।

... ...

श्रीशिव उवाच ।

... ...

साधनं कीदृशं तस्याः सुरायां परमेश्वरि ।
इति संक्षेपतो ब्रूहि येन ध्वान्तं तरास्यहम् ॥

श्रीश्यामिकोवाच ।

... ...

... ...

शृणु भैरव मूलं हि ज्ञानमैक्यं यथोत्तरम् ।
स्त्रियं वीक्षन् स्पृशन् पश्यन् सुराघूर्णितलोचन ॥
अनुद्विग्नमना वत्स केवलं जपमाचरेत् ।
मातृरूपेण ताः पश्येत् ताः पश्येत् परिनिन्दित ॥
जपो हि सर्व्वयज्ञानामहमेव न संशयः ।
मद्भावेन जपन् पुत्र मां द्रक्ष्यसि सुनिश्चयात् ॥
आकाशं लिङ्गमित्याहुः पृथिवी तस्य वीथिका ।
आलयः सर्व्वदेवानां लयनाल्लिङ्गमुच्यते ॥
योनिः संयोजयेत्तेन सा सृष्ट्यादिकारणम् ।
तस्मात्तत्त्वं समाश्रित्य सुगोप्यं जपमाचरेत् ॥
एकाकिना महेशान पुरुषद्वितयेन वा ।
सद्वंशेन स्वरूपेण कर्त्तव्यं पानभोजनम् ॥
अहं सती च कुलटा वेश्यारूपा तपस्विनी ।
बहुजातिस्त्रैकवती जटिलैकाकिनी परा ॥
रक्ताम्बरा क्षणारूपा कुलज्ञा कुलरक्षिणी ।
यथायथं कर्म्म तत्र कर्त्तव्यं पुत्र सादरम् ॥
हिंसासूया घृणा लज्जा वर्ज्जनीया विचारतः ।
मन्त्रमाता च माता च मातृरूपा च मङ्गले ॥
पूजनीयाः सदैवैताः पानभोजनभक्तिभिः ।
सुरादेवीं नमस्कृत्य बद्ध्वा मुद्राञ्च योनिकाम् ॥

अभ्रान्त्या विभ्रमन् वत्स परमानन्दरूपधृक् ।
मयि संन्यस्य सकलं सकले माद्य पुत्रक ॥
ध्यायन् पश्यन् परां सिद्धिं ज्ञानमार्गञ्च लप्स्यति ।

End :—

येषामद्वैतभावो हरिचरणपराः शङ्करासक्तचित्ता
निन्दावादं न तेषां स्पृशति च रसना नित्यपूजातिपूता ।
कारुण्यञ्चापि येषां मनसि च विलयं ये परानन्दसाराः
तेषां लीला मच्छोनी वितरति कुशलं सर्व्वदा सर्व्वदैव ॥

Different chapter colophons of the work :—

2B, इत्युत्तरखण्डे उद्देशकथनं नाम प्रथम पटलः; 4B, इत्युड्डीशोत्तरखण्डीये साधनमूलकथनं द्वितीयः पटलः; 6A, ०शक्तिकथनं तृतीयः पटलः; 7A, ०पूजाकथनं चतुर्थः पटलः; 8B, ०मन्त्रकथनं पञ्चमः पटलः; 9B, ०साधनसूत्रकथनं षष्ठः पटलः—(Then after seven lines on the same page which may be a portion of the seventh chapter of the work) इत्युड्डीशोत्तरखण्डं समाप्तम् ।

After the last colophon occurs the following :—

या शक्तिः सा मता देवी साधको भैरवः स्वयम् ।
जातिसम्बन्धबुद्धिस्तु कदाचिन्नापि साधकः ॥
जातिसम्बन्धबुद्धिश्चेत् रौरवं नरकं व्रजेत् ॥

5834.

8018. *Uḍḍīśottarakhaṇḍam.*

Substance, country-made paper. 17 × 3¾ inches. Folia, 115–127. Lines, 7 on a page. Extent in ślokas, 360. Character, Bengali. Appearance, discoloured. Complete.

Post Colophon :—

सुधायुक्त[ेन] मांसेन भगलिङ्गामृतेन च ।
योनिक्षालनतोयेन सदा तृप्यन्तु कालिका ॥

5835.

4674. *Uḍḍīśottarakhaṇḍam.*

Substance, country-made paper. 16 × 5½ inches. Folia, 9. Lines, 11 on a page. Extent in ślokas, 350. Character, Bengali. Appearance, fresh. Complete.

Not all of the verses found after the sixth chapter in the two previous MSS of the work agree with those found in the present MS.

5836.

5568. वीरभद्रतन्त्रम् । *Vīrabhadratantram.*

Substance, country-made paper. 11 × 5 inches. Folia, 22. Lines, 10 on a page. Extent in ślokas, 550. Character, Nāgara. Date, Saṃvat 1928. Appearance, fresh. Complete.

The beginning agrees with that of Uḍḍīśatantra described above (Nos. 5830–2).

Colophons of the different chapters :—

5B, इति श्रीवीरभद्रे महातन्त्रे कोशो नाम प्रथमः पटलः; 6B, ०मन्त्रकोशे द्वितीयः पटलः; 9A, इतिश्रीवीरभद्रकोशे तृतीयः पटलः; 13A, इति श्रीवीरभद्रे महातन्त्रे मन्त्रकोशश्चतुर्थः पटलः; 16B, इति देवदालीकल्पसाधनं समाप्तम्, 19B, इति श्वेतार्ककल्पं समाप्तम्; इति गुटिकाकल्पं समाप्तम्; 22A, इति श्रीवीरभद्रोक्तं उड्डीशं समाप्तम् ।

Post Colophon Statement :—

श्रीसंवत् १९२८ फाल्गुन-कृष्णातिथौ १४ भृगौ विद्याधरद्विवेदेन लिखितं काश्यां स्वार्थं परार्थञ्च । श्रीरस्तु ॥

5837.

3116. *Vīrabhadratantram.*

Substance, country-made paper. 11 × 5 inches. Folia, 33. Lines, 9 on a page. Extent in ślokas, 600. Character, Nāgara. Date, Samvat 1945. Appearance, fresh. Complete.

Colophons of the different chapters:—

8A, इति श्रीवीरभद्रे महातन्त्रे मन्त्रकोशो नाम प्रथमः पटलः ।

9B, इति श्रीवीरभद्रमहातन्त्रे मन्त्रकोशो द्वितीयः पटलः ।

13B, इति श्रीवीरभद्रमहातन्त्रकोशे तृतीयः ३ ॥

20A, इति श्रीवीरभद्रमहातन्त्रे मन्त्रकोशे चतुर्थः पटलः ४ ॥

25A, इति देवदालीकल्पसाधनं समाप्तम् ।

26B, इति गोरोचनकल्प समाप्तम्: 27B, इति उलूक शास्त्र+ध समाप्तम्; 28A, इति विद्धिसिद्धिर्भवति समाप्तम्; 29A, इति श्वेतार्ककल्पं समाप्तम्; 32B, इति श्रीतन्त्रराजमन्त्रसारोद्धारे उड्डीशमाहात्म्ये वीरभद्रडामरमन्त्रसारे शिवपार्व्वतीशङ्करसंवादे प्रसादात् सत्यं सत्यं सत्यं ग्रन्थ सम्पूर्णम् । शुभमस्तु ।

The Post Colophon Statement:—

श्रीसंवत् १९४५ मी आषाढमासे शुक्लपक्ष्चे १ वार सोमार जो प्रतिमो देषा मो लीषा मम दोषो न दीयते । श्रीपार्व्वती-शिवशङ्कर आय नमो नमः etc. etc.

5838.

11235. *Vīrabhadratantram.*

Substance, country-made paper. 11 × 5 inches. Folia, 5. Lines, 9-11 on a page. Extent in ślokas, 150. Character, modern Nāgara. Appearance, fresh. A mere fragment.

Colophon:—

इति श्रीवीरभद्रतन्त्रे उड्डीशे मंत्रमंत्रकोशो नाम समाप्तम् ॥

Along with this there are 13 leaves (by counting), containing महाविद्यास्तोत्र from रुद्रयामल, नवग्रहयन्त्रोद्धार from महाभारत and various incantations about sorcery and alchemy; and also three leaves marked 2, 14 and 15, belonging to a work on medicine.

5839.

8250. *Vīrabhadratantram.*

Substance, country-made paper. 10¼ × 4½ inches. Folia, 25. Lines, 8 on a page. Extent in ślokas, 400. Character, Nāgara. Date, Samvat 1909. Appearance, discoloured. Complete.

Last Colophon :—

इति श्रीवीरभद्रे महातन्त्रे ईश्वरपार्व्वतीसंवादे उड्डीशकोषशास्त्रं संपूर्णम् ।

Post Colophon :—

अधिक भाद्रमासे तु नवम्यां बुधवासरे ।
दशमः; 75B, ईश्वरमन्त्रप्रकाशनपटल एकादशः; 76A, ०दीक्षाविधिपटलो द्वादशः; 77B, ०पुरश्चरणविधिपटलस्त्रयोदशः; 78B, ०होमविधिपटलश्चतुर्दशः; 79B, ०चक्रपूजाविधिपटलः पञ्चदशः; 80A, ०आचारविधिपटलः षोडशः; 81A, ०सूर्य्यग्रहणपूजाविधिपटलः सप्तदशः; 82A, ०चन्द्रग्रहणपूजाविधिपटलो-ष्टादशः; 82B, ०भूकम्पपूजाविधिपटल एकोनविंशः; 84A, ०नवरात्रिदिनार्च्चा-विधिपटलो विंशः; 84B, ०कन्यासंक्रान्तिपूजाविधिपटल एकविंशः; 85B, ०शक्तिपूजापटलो द्वाविंशः; 86A, ०नवकुमारीपूजाविधिपटलस्त्रयोविंशः; 87B, ०प्रयोगविधिपटलश्चतुर्विंशः; 88B, ०घटार्गलयन्त्रविधिपटलः पञ्चविंशः; 90A, ०दशम्यर्च्चनविधिपटलः षड्विंशः। इति श्रीरुद्रयामले तन्त्रे श्रीदेवीभैरवसंवादे श्रीभुवनेश्वरीरहस्ये संपूर्णं समाप्तम् ॥

5884.

10605. रुद्रयामले कालीपंचवाणम्। *Kālīpañcavāṇam from the Rudrayāmala.*

Substance, country-made paper. 6×4½ inches. Folia, 6. Lines, 7 on a page. Extent in ślokas, 45. Character, modern Nāgara. Appearance, fresh. Complete.

The work deals with the six black rites of the Tantra, described as so many arrows.

Beginning: —

श्रीगणेशाय नमः ॥

पार्व्वती उवाच।

देवाधिदेव देवेश महारुद्र नमोस्तु ते।

इदानीं श्रोतुमिच्छामि कालीवाणस्य लक्षणम् ॥

... ...

श्रीमहादेव उवाच।

अथ वक्ष्ये वाणविद्यां कालिकायाः सुदुर्लभं ॥ ३ ॥

यस्य विज्ञानमात्रेण कर्त्ता हर्त्ता सदाशिवः।

कामत्रयं वह्निसंस्थं रतिविन्दुसमन्वितम् ॥ ४ ॥

कूर्चद्वयं तथा लज्जां युगलं तदनन्तरम् ।
दक्षिणे कालिके चेति मध्ये बाणानि योजयेत् ॥ ५ ॥

मन्त्रः क्रीं क्रीं क्रां हूं हूं ह्रीं ह्रीं दक्षिणे कालिके अमुकबाणा
क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा etc. etc.

Colophon :—

इति श्रीरुद्रयामले तन्त्रे चिंतामणिप्रयोगे ईश्वरपार्व्वतीसंवादे
कालीपंचबाणपंचकं साधनं समाप्तम् ।

Post Colophon :—

शुभमस्तु संवत् १९१६ मीती माघम् ९ बुधवार लिखितं
ब्राह्मभवानीरामजोसि पोथि कालिपंचबाणकी लिखि ॥

5885.

6083. **रुद्रयामले नवदुर्गापूजारहस्यम् ।** *Navadurgāpūjā-rahasyam from the Rudrayāmala.*

Substance, country-made paper. 7 × 4½ inches. Folia, 30. Lines, 9 on a page. Extent in ślokas, 300. Character, modern Kashmiri. Appearance, fresh. Complete in 11 chapters.

The work consists of 11 Paṭalas—the first two are introductory, and the remaining nine are devoted to the details of worship of the nine forms of Durgā.

Beginning :—

ॐ श्रीगुरवे शिवाय ॐ नमः ।
श्रीगणपतये नमः ।
ॐ देवदेवं महादेवमीशानं शूलधारिणम् ।
प्रसन्नवदनं दृष्ट्वा प्रणम्योत्थाय पार्व्वती ॥
कृताञ्जलिपुटा देवी विनयानतमस्तका ।
स्मितपूर्व्वं वचो दीनं जगाद परमेश्वरम् ॥

श्रीदेव्युवाच ।

भगवन् परमेशान शरणागतवत्सल ।
त्वत्प्रसादान्मया सर्व्वं श्रुतं डामरमुत्तमम् ॥
तन्त्राणां सारमाद्यं तं यामलादिषु विस्तरम् ।
इदानीं भगवन् श्रोतुमिच्छामि त्वन्निवेदितम् ॥
नवदुर्गार्च्चनं दिव्यं सर्व्वतन्त्रेषु गोपितम् ।
सर्व्वकामप्रदं काम्यं साधकानां शुभावहम् ॥

श्रीभैरव ।

एतद् गुह्यतमं देवि न कस्य कथितं मया ।
पूजां समयदीक्षायाः कोटिपूजा-फलप्रदाम् ॥
गुह्याद् गुह्यतमं गोप्यं क्षतं तद्धङ्कालकम् ।
इदानीं तव भक्त्याहं कथयामि सुविस्तरम् ॥

... ...

... ...

सन्ति नानाविधैर्मन्त्रैरागमोक्तैः सबीजकैः ।
तन्त्राणि विविधान्यत्र सहितानि महेश्वरि ॥
ते मन्त्रा निष्फला जाताः कलौ वीर्य्यविवर्ज्जिताः ।
स्त्रीशुद्धिरहिताद् द्रव्याद् भूम्यन्तःशुद्धिकारणात् ॥
अनृतान्मत्सराद् दम्भात् पैशुन्याद्द्रव्यलोलुपात् ।
न सिध्यन्ति वरारोहे सर्व्वे निष्फलतां गताः ॥
सत्यागमानां शास्त्रन्तु प्रतिज्ञासिद्धिमेव च ।
अनादरेण तद् दृष्टं गुरुभक्तिं विना तथा ॥
तन्मध्ये सारभूतं तु प्रत्यक्षफलदायकम् ।
रुद्रयामलतन्त्रस्य चतुःषष्ठ्यात्मकं परम् ॥
नानाविधैः शुभैर्मन्त्रैर्युक्तं समयपूजनैः ।
विना समयदीक्षाद्यैः मन्त्रैर्दीक्षापि निष्फला ॥
समयो हि शिवे ब्रह्मा समयो विष्णुरेव हि ।
समयः शिव एव स्यात् समयो मत्यरेव च ॥

न सिध्यन्ति सदा देवि नित्यपूजाजपादयः ।
यज्ञा होमादयो देवि विना समयपूजया ॥
काले संपूजयेद्विष्णुं काले संपूजयेच्छिवम् ।
समये पूजयेच्छक्तिं समयोऽपीष्टदेवता ॥
कालः सृजति भूतानि कालो रक्षति नित्यशः ।
कालः संहरते चान्ते कालो हि दुरतिक्रमः ॥
षष्टिकल्पसहस्राणि ये कुर्यन्ति महेश्वरीम् ।
समये क्षणमात्रेऽपि पूजया तत् फलं लभेत् ॥

श्रीदेवी ।

समयः कीदृशो देवः पूजा कीदृग्विधा प्रभो ।
एतद्विस्तरतो देव वक्तुमर्हसि शङ्कर ॥

श्रीभैरवः ।

अष्टोत्तरशतप्रख्याः समयाः सन्ति पार्व्वति
तेषु यः पूजयेद्देवीं इष्टदेवीञ्च साधकः ॥
तस्य देवि भवेद्दुर्गा यथाभीष्टफलप्रदा ।
समयार्च्चनमेतत्ते वच्यामि शृणु पार्व्वति ॥
यस्य कस्य न वक्तव्यं श्रुत्वा गोप्यतमं कुरु ।
चैत्रे मासि सिते पक्षे दिनानि नव पार्व्वति ॥
नवदुर्गार्च्चनं कुर्य्यात् साधकोऽभीष्टसिद्धये ।
तथैषमासि देवेशि सितपक्षादिवासरे ॥
नवम्यन्तां चरेत् पूजां विधिं विधिवदीश्वरि ।
सर्व्वेषु समयेष्वेतौ समयौ देवदुर्ल्लभौ ॥
तत्र यः कुरुते पूजां पठेत् स्तोत्राण्यनेकशः ।
चरेद्धोमं यथाशक्त्या स साक्षाद्भैरवोपमः ॥

श्रीदेवी ।

भगवन् श्रोतुमिच्छामि नवदुर्गार्च्चनं परम् ।
सत्वरं ब्रूहि मे देव यद्यस्ति मयि ते दया ॥

श्रीभैरवः ।

शृणु देवि प्रवक्ष्यामि नवदुर्गार्चनं परम् ।
रुद्रयामलतन्त्रेऽस्मिन् भाषितं साधकश्रिये ॥
तद्वक्ष्यामि महादेवि पूजासारमनुत्तमम् ।
यन्न दृष्टं पशुज्ञानैः कुपथभ्रान्तदृष्टिभिः ॥
यन्न साङ्ख्यैर्न योगैर्वा न च वै पाञ्चरात्रकैः ।
स्वभाववादिभिर्नापि न च कर्म्मप्रवादिभि
नापि संशयवादैश्च नग्नार्थक्षपणादिभिः
न भूतवादिभिश्चैव नापि वा लौकिकैस्त
न चात्मचिन्तकैर्वापि नापि तर्कप्रवादिभिः ।
न च वैशेषिकैर्वापि षट्पदार्थपरायणैः ॥
वेदान्तवादिभिर्वापि न चाप्येकत्ववादिभिः ।
इदं पूजादिकं सारं दुर्गाया नवरात्रिकम् ॥
अज्ञानतिमिरान्धानामुन्मीलनकृदुत्तमम् ।
संसारपङ्कमग्नानां नौरिवोत्तारणं परम् ॥
... ...
... ...

The nine forms of Durgā are indicated :-

6A, ॐ आदौ श्रीशैलपुत्रीति ततः स्याद्ब्रह्मचारिणी ।
चण्डघण्टा च कुष्माण्डी स्कन्दमाता च पञ्चमी ॥
कात्यायनी कालरात्रिर्महागौरी तथाष्टमी ।
देवदूती च नवमी नवदुर्गा इतीरिताः ॥

End :—

इति श्रीनवदुर्गायाः पूजापद्धतिमीश्वरि ।
गोपनीयं महादेवि गोपयेन्निजयोनिवत् ॥

Colophons of the different chapters :—

6A, इति श्रीदुर्गासमयपूजायां प्रथमः पटलः; 7B, इति श्रीदुर्गाकल्पे द्वितीयः पटलः; 17A, इति श्रीरुद्रयामले तन्त्रे समयपूजाकल्पे नवदुर्गापूजा-

संग्रहे शैलपुत्रीपूजाविधिर्नाम तृतीयः पटलः ; 18B, ०ब्रह्मचारिणीपूजाविधि-र्नाम चतुर्थः पटलः ; 20A, इति श्रीचण्डघण्टापूजाविधिर्नाम पञ्चमः पटलः ; 21B, इति कुष्माण्डीविधिः षष्ठः पटलः ; 23A, इति श्रीस्कन्दमातृपूजाविधिः सप्तमः पटलः ; 24A, इति श्रीकात्यायनीपूजाविधिरष्टमः पटलः ; 25B, इति श्रीकाल-रात्रिपूजाविधिर्नवमः पटलः ; 27A, इति श्रीमहागौरीपूजाविधिर्नाम दशमः पटलः ; (last colophon) इति श्रीरुद्रयामले तन्त्रे नवदुर्गापूजारहस्ये देव-दूतीपूजाविधिर्नाम एकादशः पटलः ।

5886.

2364. रुद्रयामले रामनामलिखनविधिः । *Rāmanāma-likhanavidhiḥ from the Rudrayāmala.*

Substance, foolscap paper 10 × 3¾ inches. Folia, 4. Lines, 7 on a page. Extent in ślokas, 50. Character, Nāgara. Date, Samvat 1932. Appearance, fresh. Complete.

For a description of the present MS see L. X. 4217.

The essence of the book is summed up in the following lines:—

2A, राममन्त्रं लिखेन्नित्यमष्टगन्धेन भक्तितः ।
भूर्जपत्रे ताडपत्रे श्रीगणपत्रे तथैव च ॥
नामसहस्रं नामशतं लिखेदनुदिनं सुधीः ।
मासमेकं शुद्धचेता यावल्लक्षं समाप्यते ॥
... ...
... ...
एवं मन्त्रं लिखेद्यस्तु लक्षसंख्यो जितेन्द्रियः ।
तस्य सिद्धो भवेन्मन्त्रः सर्व्वकामफलप्रदः ॥
शुद्धोदकेन संलिख्य कज्जलं घृतदीपकम् ।
पत्रं श्रीगणमयं प्रोक्तं लेखनी काशजा प्रिये ॥

3B, मुक्तिकामो लिखेल्लक्षं साधको विधिपूर्व्वकम् ।
सकामो वाञ्छितं लब्ध्वा भुक्त्वा भोगान् मनोरमान् ॥
जातिस्मरश्चिरं भूत्वा याति विष्णोः परं पदम् ॥

Colophon :—

इति श्रीरुद्रयामले रामनामलिखनविधिप्रकाशपटलं समाप्तम् ।
श्रीजगदम्बार्पणमस्तु ॥

Post Colophon :—

संवत् १९३२ ।

5887.

5014. **रुद्रयामले अयोध्यामाहात्म्यम् ।** *Ayodhyā-māhātmyam from the Rudrayāmala.*

Substance, country-made paper. 10 × 5¾ inches. Folia, 69. Lines, 7 on a page. Extent in ślokas, 500. Character, Nāgara. Date, Saṃvat 1910. Appearance, discoloured. Complete.

The work contains 10 chapters. It refers to and describes the greatness of Ayodhyā proper and various other Tīrthas included within it.

Beginning :—

श्रीरामचन्द्राय नमः ।
वन्देऽहं रामचन्द्रस्य पादौ प्रणतरक्षकौ ।
सीतायाश्च पुनः पादौ सर्व्वसिद्धिविधायकौ ॥ १ ॥
... ...
... ...
श्रीपार्व्वत्युवाच ।
त्व[त्]तः श्रुत्वा महाभाग नानातीर्थकथाः शुभाः ।
साम्प्रतं श्रोतुमिच्छामि सरहस्यं सनातनम् ॥ ४ ॥

अयोध्याया महापुर्य्या महिमानं गुणोज्ज्वलम् ।
कीदृशी सा सदामेध्यायोध्या विष्णुप्रिया पुरी ॥ ५ ॥
आद्या सङ्गीयते वेदैः पुरीणां मुक्तिदायिका ।
संस्थानं कीदृशं तस्याः तस्यां के च महीभुजः ॥ ६ ॥
कानि तीर्थानि पुण्यानि माहात्म्यं तेषु कीदृशम् ।
अयोध्यासेवनान्नृणां फलं स्याद्वद कीदृशम् ॥ ७ ॥

End :—

मतिविपुलनिदानैर्वर्णितं धर्म्ममाद्यं
कलयति पर(म)भक्त्या क्षेत्रमाहात्म्यमेतत् ।
य इह नर उदारः श्रीसनाथः स सम्यक्
व्रजति हरिनिवासं सर्व्वभोगांश्च भुक्त्वा ॥ २४ ॥

Colophon :—

इति श्रीरुद्रयामले हरगौरीसम्वादे श्रीमदयोध्यामाहात्म्ये दशमोऽध्यायः ।

Post Colophon :—

शुभमस्तु सम्बत् १८१० मिति ज्येष्ठ शुक्ल ४ ।

5888.

5570. रुद्रयामले सूर्य्यपटलः । *Sūryapaṭalaḥ from the Rudrayāmala.*

Substance, country-made yellow paper. 10½ × 4½ inches. Folia, 22. Lines, 9 on a page. Extent in ślokas, 400. Character, Nāgara. Appearance, fresh. Complete.

This relates to the worship of the Sun-god according to the Kaula form, the first chapter in it dealing with the *mantra* of the deity and the rules for its use, the second chapter, in prose, laying down the rules of worship (*paddhati*).

Beginning :—

श्रीगणेशाय नमः ... ...

श्रीभैरव उवाच ।

श्रीशैलशिखरासीनभैरवीपतिमीश्वरम् ।

भैरवं चन्द्रमुकुटं गणगन्धर्व्वसेवितम् ॥

पन्नगाभरणोपेतं जटामुकुटमण्डितं ।

.. ..

.. ..

... ... दृष्ट्वा प्रोवाच भैरवी ॥

श्रीदेव्युवाच ।

... ...

... ...

पुरा पृष्टोऽसि भगवन् मया त्वं भक्तिपूर्व्वकम् ।

अद्य तद्वद तत्त्वं मे यद्यहं तव वल्लभा ॥

... ...

... ... कौलिकानां हितेच्छया ॥

वद शीघ्रं तथेशान पञ्चाङ्गं पूर्व्वसूचितम् ।

(श्री)देवदेवस्य सूर्य्यस्य सर्व्वतत्त्वतमोत्तमम् ॥

End :—

इत्येषा नित्यपूजायाः पद्धतिर्गद्यरूपिणी ।

तव स्नेहेन निर्णीता नाख्येयाकौलिके[ः] प्रिये ॥

Colophons :—

7A, इति श्रीरुद्रयामले ईश्वरपार्वतीसंवादे देवीरहस्ये तन्त्रे श्रीसूर्य्यपटलाख्यानं नामैकत्रिंशः पटलः समाप्तम् ।

22A, इति श्रीरुद्रयामले देवीरहस्ये श्रीसूर्य्यपूजापद्धतिवर्णनं नाम द्वात्रिंशः पटलः समाप्तः ।

5889.

2154. रुद्रयामलोक्तनवग्रहसिद्धयन्त्रपूजाविस्तारः ।

Navagrahasiddhayantrapūjāvistāraḥ from Rudrayāmala.

Substance, country-made paper. 8¼ × 3¼ inches. Folia, 2. Lines, 12-14 on a page. Extent in ślokas, 40. Character, Nāgara. Appearance, discoloured. Complete.

It gives directions for drawing and worshipping the *Yantra* or symbolic diagram, an illustration of which is given on Fol. 2A.

Beginning :—

कदाचिद्वनवासीनां पाण्डवानां सुप्रेक्षणे ।
आगतः कृष्णनाथस्य दृष्ट्वा पूजाकृतं विधिम् ।
संतुष्टः कृष्णनाथं च पप्रच्छ पाण्डुनन्दनः ।

युधिष्ठिरोवाच ।

देवदेव जगन्नाथ उपायं ब्रूहि तत्त्वतः ।
येन संग्रहमात्रेण साम्राज्यं सौख्यदं सदा ।

Colophon :—

इति श्रीरुद्रयामलोक्त-नवग्रहसिद्धयन्त्रपूजाविस्तारः समाप्तः ।

For a *Navagrahamantroddhāra* from the *Mahābhārata* cf. 5838 above.

5890.

2147. रुद्रयामले मङ्गलविधिः । *Maṅgalavidhiḥ from the Rudrayāmala.*

Substance, country-made paper. 7 × 4¼ inches. Folia, 10. Lines, 9 on a page. Extent in ślokas, 100. Character, Nāgara. Appearance, fresh Complete.

The work deals with Tāntrika worship of the planet Mars.

Beginning :

अथ मङ्गलव्रतविधानमन्त्रमभिधीयते । ब्राह्मे मुहूर्त्ते उत्थाय प्रातःकृत्यं कृत्वा शौचादिकं विधाय अरुणोदये अपामार्गकाष्ठेन दन्तधावनं कृत्वा नद्यादौ गत्वा ... ... रक्तवस्त्रोत्तरीयं धृत्वा ... ...रक्तचन्दनरक्तपुष्पैः ताम्रपात्रस्थिततोयेन अङ्गारकगायत्रीपठना-ष्टोत्तरशतं भौमाय अर्घं दत्वा गृहमागत्य वितस्तिमात्रं रक्तगो-गोमयमूत्राभ्यां विलिप्य तदुपरि रक्तचन्दनेन मण्डलं विधाय तत्र गोधूमान्नं संस्थाप्य उपरि ताम्रकलशं वा मृन्मयं वा संस्थाप्य जलेनापूर्य्य ... ... तदुपरि भौमयन्त्रं त्रिकोणमेकविंशति त्रिकोणांकितमेकविंशति भौमनामसहितं संस्थाप्य तत्सम्मुखे स्वयं रक्तासने उपविष्टः ... ... मङ्गलव्रतमहं करिष्ये ।

End :—

एषांगारकगायत्री जप्ताभीष्ट-प्रदायिनी ।
माहेयोप[ा]सनं प्रोक्तं देवदेवेन सिद्धिदं ॥

Colophon :—

इति रुद्रयामले मङ्गलविधिः समाप्तः ।

5891.

10040. **कृष्णयामले त्रिभङ्गचरित्रम् ।** *Tribhaṅgacaritram from the Kṛṣṇayāmala.*

Substance, country-made paper. 11 × 4½ inches. Folia, 4. Lines, 9 on a page. Extent in ślokas, 112. Character, modern Nāgara. Date, Saṃvat 1952. Appearance, fresh. Complete.

A *Kṛṣṇayāmala* is noticed in Bik. 1284 and HPR I. 78. MSS of *Śeṣadevaśatanāmastotra* and *Caitanyakalpa*, said to be taken from the Kṛṣṇayāmala, are found in the old collection of the Asiatic Society of Bengal.

The work deals with the Tribhaṅga (three-bended) form of Kṛṣṇa.

Beginning :-

याहि स्थावरतां भद्रे न त्वां त्यक्ष्यामि मा रुद ।
ततो दिव्ये मणिमये स्थाने देवी सरस्वती ॥
आविरासानन्तफलाकारा सा शतपर्व्विणी ।
सर्व्वरत्नमयी वृन्दावने मत्परिपालिते ।
तृणराजस्य महिषी राजयन्ती दिशश्चिषा ॥
2B, वंशीमाहात्म्यमेतन्मे पठिष्यन्ति द्विजातयः ।
श्रोष्यन्ति च भविष्यन्ति द्रुतं द्रुतकवीश्वराः ॥
इदानीं श्रोतुमिच्छामि त्रिभङ्गत्वं कथं तव ।
तन्मे कथय गोविन्द विंद्याद्यानन्दमन्ततं ॥

... ...

कृष्ण उवाच ।

शृणु ते कथयिष्यामि बलराम कथां मम ।
त्रिभङ्गत्वं कामिनीनां मनोनयनरञ्जनम् ॥
महानन्दाभिधां वंशीं कराभ्यां परिगृह्य वै ।
प्रहसद्वदनो लीलारसचञ्चलमानसः ॥
जगाम पानकै-र्नीपमूलमानन्दविग्रहः ।
यस्मिन् दिव्ये तरोर्मूले मणिबद्धे महाप्रभे ॥

... ...

... ...

3A, ततो मे मुग्धचित्तस्य बभूव सरसं मनः ।
ततः शृङ्गारनामायं रसः प्रादुर्बभूव ह ॥
श्यामवर्णः सुखमयः सर्व्वलोकैकमोहनः ।
रसादानन्द आनन्दादनुभावो बभूव ह ॥
आत्मना रन्तुमिच्छामि नारी भूत्वा पृथगवपुः ।
इति सञ्चिन्त्यमानस्तु मनस्तत्र सतां गतं ॥
स्वयमेव द्विधा भूत्वा परमानन्दरूपिणी ।
रसस्वरूपिणी चाहं स्वयंरूपा विनिर्गता ॥

... ...

... ...

4A, पश्यन्तस्त्वां वरारोहां लज्जयाधोमुखा द्रुतम् ।
तत्प्रेमपाशसंबद्धचित्तस्य चरणाद्वयम् ॥
मणिनूपुरयुग्मेन शृङ्खलाबद्धवद् बभौ ।
ततो मम पदाम्भोजाद्ब्रह्माद्या महौजसः ॥
तुष्टुवुः प्रेमवचसा प्रणयाविष्टचेतसा ।
हे नाथ चरणं त्वेकं अस्मभ्यं दर्शय प्रभो ॥
तच्छ्रुत्वा वचनन्तेषां तुष्टये स्वयमेव हि ।
ध्वजवज्राङ्कुशाम्भोजलक्षणं दर्शितं पदम् ॥
तिर्य्यग्वै विमुदाराश्च ब्रह्मविष्णुशिवार्च्चितं ।
अकार्षं राम सततं यतोहं भक्तवत्सलः ॥

... ...

एतान्येव कारणानि त्रिभङ्गत्वं गतस्य मे ।
नित्यं सत्यं चित्स्वरूपमानन्दरसविग्रहम् ॥
रूपमेतत् सदा ध्यायन् महाविष्णुस्तपश्चरेत् ।
ब्रह्मैवेदं हृदि ध्यात्वा सृष्टिश्चासकृत् विभो ॥
रुद्रोपीदं चित्स्वरूपं ध्यात्वा सिद्धिमितो गतः ।
एतत्त्रिभङ्गरसविग्रहमादिभूतं
भूतेशविष्णुविधिचित्रविचित्र + + ।
ध्यात्वा त्रिभङ्गचरितं परितः शृणोति
यस्तस्य हृत्सरसिजे सततं वसामि ॥

Colophon :

इति ते सर्व्वमाख्यातं त्रिभङ्गचरितं मम ।

Post Colophon Statement (in a later hand): –

संवत् १९५२ कु० सू० १ बुधको श्रीब्रह्मयामलतन्त्र मे से लिखवयो श्रीराधामोहन गोस्वामी रायसाहव काशी श्री ५० वालोंके गृहराधाचरणजी की कृपासे ५ । ५ । ६० व्यास गणेशराम ।

5892.

6392. ब्रह्मयामलम् । *Brahmayāmalam.*

Substance, country-made paper. 9 × 3½ inches. Folia, 1-58 (bound in wrong order) of which Fol. 52 is missing. Lines, 10 on a page. Extent in ślokas, 1,000. Character, Nāgara. Appearance, old and soiled. Incomplete.

The topics dealt with herein relate to divination by means of various diagrams, illustrations of which are given. Some of the colophons give the title as Brahmayāmala while others simply write yāmala.

Beginning :

मोहान्धकारमग्नानां जनानां ज्ञानरश्मिभिः ।
कृतमुद्धरणं येन तन्नौमि शिवभास्करम् ॥
अथातः संप्रवक्ष्यामि प्रोक्ता ये ब्रह्मयामले ।
मात्रादिभेदभिन्नानां स्वराणां षोडशोदयाः ॥
मातृकायां पुरा प्रोक्ताः स्वराः षोडशसंख्यया ।
तेषां द्वावन्तिमौ त्याज्यौ चत्वारस्तु नपुंसकाः ॥
शेषा दशस्वरास्तेषु स्यादेकैको द्विके द्विके ।
ज्ञेया अतोऽस्वराद्यास्ते स्वराः पञ्च स्वरोदये ॥
लाभालाभौ सुखं दुःखं जीवितं मरणं तथा ।
जयं पराजयं चैव सर्वं ज्ञेयं स्वरोदये ॥
स्वरादिमातृकोच्चारो मातृव्याप्तं जगत्त्रयम् ।
तस्मात् स्वरोदयं सर्वं त्रैलोक्यं सचराचरम् ॥

Colophons of the different chapters : -

2A, इति यामले मात्रास्वरचक्रम्; 2B, ०वर्णस्वरचक्रम्; 3A, इति जीवस्वरचक्रम्; 3B, इति राशिस्वरचक्रम्; इति भेदनस्वरचक्रम्; 4A, इति यामले द्वादशवर्षिकचक्रम्; 4B, ०ऋतुस्वरचक्रम्; 5A, ०पक्षस्वर-चक्रम्; इति तिथिस्वरचक्रम्; 7A, इति ब्रह्मयामले तिथिवारनक्षत्र-[चक्रम्]; 8A, इति यामले दिमास्वरचक्रम्; 8B, इति तात्कालिकस्वरचक्रे

प्रश्नभेदः; 9B, इति तात्कालिकस्वरचक्रे जातस्य शुभाशुभः; 10A, इति यामले स्वरप्रकारनिर्णयः; 11A, इति ब्रह्मयामले दिक्पालस्वरचक्रम्; 19A, ०षडङ्ग-सर्व्वतोभद्रचक्रम्; 20B, ०अंशकचक्रम्; 22A, ०कूर्म्मचक्रम्; 23B, ०सिंहासन-चक्रम्; 29A, इति हृदयादियोगषट्कम्; 29B, उदरादियोगषट्कम् (the space for the illustration is left blank); 28B, इति मुखादियोग-षट्कम् (30A has the space for illustration left blank); 30B, इति गुदादियोगषट्कम्; 31A, इति ब्रह्मयामले वत्साङ्गयोगषट्कम् 31B, इति कपालादियोगषट्कम्; 32A, इति दशाङ्गराजकालानलचक्रम् (space for illustration left blank); 33A, इति ब्रह्मयामले राजकालानल-चक्रम्; 33B, इति यामले सूर्य्यकालानलचक्रम्; 34A, इति चन्द्रकालानल-चक्रम्; 34B, इति यामले चन्द्रसप्तशलाकचक्रम्; 35A, इति सप्तशलाकानल-चक्रम्; 35B, इति यामले वक्रेन्दुचन्द्रचक्रम्; 36A, ०प्रथम मातृकास्वरचक्रम्; 36B, इति द्वितीयमातृकास्वरचक्रम्; इति तृतीयमा[तृ]कास्वरचक्रम्, 37A, इति यामले विजयचक्रम्; 38A, तोरणचक्रं समाप्तं; 38B, राशिसूर्य्यकालानल-चक्रम्; 39A, इति संघट्टकालानलचक्रम्; 39B, इति यामले गूढकालानल-चक्रम्; 40A, ०कुलाकुलचक्रम्; 40B, ०कुम्भचक्रम्; 42B, ०तुम्बुरुचक्रम्; 43A, ०तुम्बुरावर्त्तचक्रम्; 44B, ०अहि+लचक्रम्; 45A, ०लाङ्गलचक्रम्; 45A, [सर्पचक्रम्]; 45B, इति वृषचक्रम्; 47B, इति यामले नाडीगत-वृष्टिचक्रम्; 48A, ०सूर्य्यफणिचक्रम्; चन्द्रफणिचक्रम्; 49A, इति कविचक्रम्; 50A, इति यामले खलचक्रम्; 54B, ब्रह्मयामले कोट्टचक्रम्; 56A, इति यामले अश्वचक्रम्; 56B, इति रथचक्रम्; 57A, इति यामले कूर्म्मचक्रम्। The MS ends abruptly in the middle of the next topic.

5893.

10335. जयद्रथयामलम्। *Jayadrathayāmalam.*

Substance, country-made paper. 9×3½ inches. Folia, 103. Lines, 5 on a page. Extent in ślokas, 600. Character, Nāgara. Appearance, old and discoloured. Complete.

Jayadrathayāmala is said to be 24,000 ślokas in extent, divided into four ṣaṭkas or four parts of 6,000 ślokas each. The present MS contains the last ṣaṭka which principally deals with the worship of Vagalā, the eighth Mahāvidyā. For the first ṣaṭka cf. Nep., Vol. II. pp. 1-4, and for the last ṣaṭka, Nep., Vol. I. pp. 175-177.

Beginning :

श्रीदेव्युवाच ।

देवाधिदेव भूतेश नित्यानन्दनिरञ्जन ।

निराकारगुणातीत सर्व्वज्ञ शशिशेखर ॥ १ ॥

.. ..

इदानीं श्रोतुमिच्छामि विद्याभेदं सुदुर्लभं ।

उत्पत्ति + + + देव तन्मे वद दयानिधे ॥

Colophons of the different chapters :—

5A, इति श्रीजयद्रथयामले उत्तरषट्के देव्योपनिषदे महेशकुलशासन आनन्दभैरवस्रोतसि(स्तोत्रे) श्रीमहाविद्याभेदकथनं नाम प्रथमः पटलः ।

22B, ०महाविद्या उत्पत्तिकथनं नाम द्वितीयः पटलः ; 27B, ०वगलादीपविधिर्नाम तृतीयः पटलः ; 36B, ०काम्यप्रयोगकथनं नाम चतुर्थः पटलः ; 58B, ०मन्त्रोद्धरणापूर्व्वकं श्रीवगलामुखीसाधनं नाम पटलः ।

97A, ०प्रातःकृत्यादि उद्दामनान्तश्रीवगलामुखीनित्यायाः गद्यमयी-पूजापद्धतिकथनं नाम पटलः ॥ ६ ॥

103B, ०वगलामुखीकवचकथनं नाम पटलः ॥ ७ ॥

5894.

1926. यामले कालपुरुषदानविधिः । *Kālapuruṣadāna-vidhiḥ from Yāmala.*

Substance, country-made paper. 8½ × 4¼ inches. Folia, 5. Lines, 6 on a page. Extent in ślokas, 70. Character, Nāgara. Appearance, old and faded. Complete.

The work contains both the *vidhi* (Foll. 1-3A) and *paddhati* (Foll. 3A-5) of the function.

Beginning :—

अथ कालपुरुषदानं लिख्यते ।
अतः परं प्रवक्ष्यामि दानानामुत्तमोत्तमम् ।
कालमृत्युहरं साक्षादपमृत्योश्च का कथा ॥
असाध्याख्यमहारोगमहाभयहरक्षमम् ।
शत्रुवर्गक्षयकरं ग्रहदोषनिवर्हणम् ॥
तापत्रयहरं सद्यः सर्व्वोत्पातहरं शुभम् ॥
... ...
... ...
कालरूपमिति ख्यातं दानं दोषविनाशनम् ॥

The description of Kālapuruṣa, a human representation of Time clothed in black, is given as follows (Fol. 1B) :—

कालस्य पुरुषाकारं कृष्णवस्त्रेण कल्पयेत् ।
पादादिमस्तकान्तं च पञ्चारत्निप्रमाणतः ॥
वितस्तिद्वयमानेन शिरोभागं प्रकल्पयेत् ।
अर्द्धारत्न्या कण्ठदेशमधोभागे भुजद्वयम् ॥
तदर्द्धं हृदयस्थाने स्तनमण्डलमाचरेत् ।
अरत्निमात्रमुदरं मध्ये नाभिं प्रकल्पयेत् ॥
तदर्द्धं कटिदेशं च जघनं वृषणादिकम् ।
अधोवितस्तिद्वितये ऊरू जानू च गुल्फकम् ॥
पादद्वयं प्रकुर्व्वीत अङ्गुल्यग्रसमन्वितम् ।
कर्णाक्षिनासिदीर्घाश्च तत्तद्देशे प्रकल्पयेत् ॥
तिलैश्च पूरयेदत्र तत्तदंशो विचक्षणः ।
पद्मासने समानीतं शिल्पकैः परिशोभयेत् ॥
ततः सौवर्णरजतताम्रैर्मुक्ताफलादिकैः ।
भूषणैर्भूषितं चैव स्थाने स्थाने विशेषतः ॥
सुवर्णनूपुरौ कुर्य्याद्वलयौ राजतेन तु ।
कटिसूत्रं राजतेन कांस्यघण्टासमन्वितम् ॥

हस्तद्वयं राजतेन सुवर्णेनाङ्गुलीयकम् ।
कटकं राजतेनैव सुवर्णं बाहुभूषणम् ॥
ग्रैवेयं पदकं चैव स्वर्णेन राजतेन वा ।
मुक्ताहारं कराठदेशे मध्ये रत्नसमन्वितम ॥
कर्णद्वयं च ताम्रेण तथैव भ्रूयुगं च वै ।
अक्षिद्वयं राजतेन नासिकाग्रं सुवर्णतः ॥
सुक्तया सुदन्तपंक्तिं च ताम्रेणोष्ठद्वयं तथा ।
तिलकं राजतेनैव पट्टं स्वर्णविनिर्म्मितम् ॥
स्वर्णयज्ञोपवीतं च रक्तोष्णीषं च वेष्टयेत् ।
वामहस्ते कांस्यपात्रं खड्गं दक्षिणहस्तके ॥
मुक्ताप्रवालरत्नाद्यैः कर्णाभरणमाचरेत् ।

In leaf 3A the Vidhi ends and the Paddhati begins. The latter goes to the end of the MS.

Last Colophon :—

यामलोक्तकालपुरुषदानविधिः समाप्तः ।

The last colophon is followed by several verses about some Tāntrika rite.

5895.

3179. महाशैवतन्त्रे आकाशभैरवकल्पम् । *Ākāśabhairava-kalpam from the Mahāśaivatantra.*

Substance, Serāmpore paper. 12½ × 5¼ inches. Folia, 82. Lines, 9–12 on a page. Extent in ślokas, 2,000. Character, Bengali. Appearance, fresh. Complete.

Two Stotras from this work are mentioned in *Burnell* 198[b], 203[a]. MSS of an *Ākāśabhairavatantra* and a *Mahāśaivatantra* are also noticed there.

Beginning :—

श्रीगणेशाय नमः ॥ श्रीदक्षिणामूर्त्ते नमः ॥
गुरुं गणपतिं देवीं भैरवं शारभेश्वरम् ।
नमस्कृत्य प्रवक्ष्यामि धर्म्मशास्त्रं विभूतये ॥
साङ्गं सलक्षणं वेदसारभूतमभीष्टदम् ।
ज्ञानदं जीवजन्तूनां साधकानां सुखावहम् ॥

श्रीदेव्युवाच ।

श्रीशिवेशान्तदेवेश श्रीनाथ जगतां पते ।
श्रीगलागलचिद्रूप श्रीपते भवते नमः ॥
अन्यथा शरणं नास्ति शरणं त्वं महेश्वर ।
यद्गुह्यं परमं लोके यं शास्त्रमखिलप्रदम् ॥
यद्धितं साधकेन्द्राणां तद्वदस्व दयानिधे ।

श्रीश्वरोवाच ।

श्रीमत्परमसौभाग्यमन्त्रयन्त्रं गतात्मनां ।
त्रयाणामुपदेवानामतिगुह्यतमं परम् ॥
महामन्त्रक्रियाशास्त्रं महासिद्धिप्रदायकम् ।
सर्व्वदोषप्रशमनं पावकं लोकजीवनम् ॥
धर्म्मार्थकाममोक्षाणां फलदानप्रदं हितम् ।
सर्व्वज्ञानप्रदं ब्रह्मज्ञानदं सर्व्वसिद्धिदम् ॥
तादृशं कल्पमाणेप्यं सर्व्ववेदाङ्गमात्मकम् ।
शीघ्रसिद्धिप्रदं श्रेष्ठं शृणु सर्व्वमयेम्बिके ॥
वक्ष्यमाणं महाशास्त्रं शृण्वतां पठतामपि ।
तथालोकय तां पुंसां (य)[व]नितानां विशेषतः ॥
क्षिप्रसिद्धिप्रदं दिव्यं कथयामि जगन्मयम् ।

2A, महसा तस्य सौभाग्यं अस्तु ज्ञा + नुभूतिकम् ॥
लब्धमन्त्रः समुत्थाय प्रभाते देशिकं स्मरेत् ।
वक्ष्यमाणेन मन्त्रेण सान्ध्यं कर्म्म समाप्य सः ।
यथा तथा पुरायुक्तामेकान्ते भवने शुभे ॥

यथाविधि समाभूतोच्चाविंश्येटचरे स्थितः ।
अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिता ॥

... ...

... ...

आराधनोपयोगानि संपाद्य तदनन्तरम् ।
ब्रह्मरन्ध्रे जगन्नाथं ब्रह्मानन्दमयं विभुम् ॥
परम्पराक्रमेणैव गन्धपुष्पाक्षतादिभिः ।
चिरं ध्यात्वा ततो देवि भूतशुद्धिं यथाविधि ॥
ऋषिन्यासादिकं कुर्यात् प्रसन्नात्मा यथाविधि
सर्व्वकार्य्यार्थसिद्धौ च सर्व्वविघ्ननिवृत्तये ॥
पश्चाङ्गैरेकविंशेन यजेद्विनायकं पुरा ॥

Colophons of the different chapters : —

2B, इति श्रीमहाग्रैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते उत्साहप्रक्रमो नाम प्रथमोऽध्यायः; 3B, इति महाग्रीवमन्त्रे अतिरहस्ये पक्षिराजकल्पे उत्साहगणपतियजनविधिर्नाम द्वितीयोऽध्यायः; 4B, इति श्रीमहाग्रैवतन्त्रे अतिरहस्ये उत्साहभैरवयजनविधि-र्नाम तृतीयोऽध्यायः; 6A, इति श्रीमहाग्रैवतन्त्रे अतिरहस्ये उत्साहाभिषेक-विधानं नाम चतुर्थोऽध्यायः; 7B, ०आकाशभैरवकल्पे मन्त्रयन्त्रं नाम पञ्चमो-ऽध्यायः; 8B, इति श्रीग्रैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे चित्रमालाविधिर्नाम षष्ठोऽध्यायः; 9A, इति श्रीमहाग्रैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे वश्याकर्षणप्रयोगो नाम सप्तमोऽध्यायः; 9B, ०रहस्ये मोहनद्रवकप्रयोगो नाम अष्टमोऽध्यायः; 10A, इति श्रीग्रैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे स्तम्भन-विद्वेषणप्रयोगो नाम नवमोऽध्यायः; 10B, इति श्रीमहाग्रैवतन्त्रे अतिरहस्ये उच्चाटननिग्रहप्रयोगो नाम दशमोऽध्यायः; 11A, इति श्रीमहाग्रैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वर-संवादे शङ्करेण विरचिते भोगमोक्षप्रकरणं नाम एकादशोऽध्यायः। इति प्रथम-कल्पः समाप्तः ॥

12B, इति ०सङ्कर्षणेन विरचिते आशुगरुडविद्या नाम द्वादशोऽध्यायः; 14A, इति श्रीमहाग्रीवतन्त्रे अतिरहस्ये आशुगरुडप्रयोगो नाम त्रयोदशोऽध्यायः; 15B, इति श्रीमहाग्रीवतन्त्रे अतिरहस्ये आशुगरुडकवचविधिर्नाम चतुर्दशोऽध्यायः; 16B, ०आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे शिष्याचारविधिभेदो नाम पञ्चदशोऽध्यायः। द्वितीयः कल्पः समाप्तः ॥

19A, इति श्रीमहाग्रीवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे शरभसालुवपक्षिराजकल्पे मन्त्रोद्धारविधिर्नाम षोडशोऽध्यायः; 22A, इति श्रीमहाग्रीवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे शरभसालुवपक्षिराजस्तोत्रं नाम सप्तदशोऽध्यायः; 25A, इति श्रीग्रीवतन्त्रे अतिरहस्ये प्रयोगभेदो नाम अष्टादशोऽध्यायः; 26A, इति श्रीपक्षिराजकल्पे निग्रहानुग्रहविवेको नाम एको[न]-विंशोऽध्यायः; 27B, इति श्रीमहाग्रीवतन्त्रे होमविधिर्नाम विंशोऽध्यायः; 30A, इति श्रीमहाग्रीवतन्त्रे प्रत्यक्षसिद्धिप्रदे पक्षिराजकल्पे निग्रहविधिर्नाम एकविंशोऽध्यायः; 33A, इति श्रीमहाग्रीवतन्त्रे अतिरहस्ये आकाशभैरवे कल्पे रक्षाभिषेको नाम द्वाविंशोऽध्यायः; 36B, इति श्रीमहाग्रीवतन्त्रे पक्षिराजकल्पे क्षुद्रविधिर्नाम त्रयोविंशोऽध्यायः; 40B, इति श्रीमहाग्रीवतन्त्रे अतिरहस्ये आचारपुरश्चर्य्यासिद्धिर्नाम चतुर्विंशोऽध्यायः; 42B, इति श्रीमहाग्रीवतन्त्रे शारभाराधनविधिर्नाम पञ्चविंशोऽध्यायः; 47A, इति श्रीग्रीवतन्त्रे अतिरहस्ये शरभकल्पे मातृकाक्षरबलिविवेको नाम षड्विंशोऽध्यायः; 48B, इति श्रीभैरवग्रीवतन्त्रे कल्पे भद्रकालीविधिर्नाम सप्तविंशोऽध्यायः; 51B, इति श्रीमहाग्रीवतन्त्रे आकाशभैरवकल्पे तैलाञ्जनविधिर्नाम अष्टाविंशोऽध्यायः; 52B, इति श्रीमहाग्रीवतन्त्रे कल्पे मालामन्त्रे शूलिनीदुर्गाध्यायत्रयं विना एकोनत्रिंशोऽध्यायः; 54A, इति श्रीमहाग्रीवतन्त्रे आकाशभैरवकल्पे त्रिंशोऽध्यायः; 56B, इति श्रीग्रीवतन्त्रे आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे बलिकर्म्मविधानं नाम एकत्रिंशोऽध्यायः; 57B, इत्याकाशभैरवकल्पे द्वात्रिंशोऽध्यायः; 59A, इत्याकाशभैरवकल्पे महाग्रीवतन्त्रे प्रत्यक्षसिद्धिप्रदे वडवानलमन्त्रं नाम त्रयस्त्रिंशोऽध्यायः; 60B, इति श्रीमहाग्रीवतन्त्रे आकाशभैरवकल्पे दिक्पालमन्त्रं नाम चतुस्त्रिंशोऽध्यायः; 61B, इत्याकाशभैरवकल्पे व्याधिमन्त्रं नाम पञ्चत्रिंशोऽध्यायः; 62A, इत्याकाशभैरवकल्पे मृत्युप्रयोगं नाम षट्त्रिंशोऽध्यायः; 68B, इत्याकाशभैरवकल्पे शरभकवचं नाम

सप्तत्रिंशोऽध्यायः ; 70A, इत्याकाशभैरवकल्पे कामराजमन्त्रं नामाष्टत्रिंशोऽध्यायः ; 71B, इति श्रीआकाशभैरवकल्पे रक्षाचामुण्डीमन्त्र नाम एकोनचत्वारिंशोऽध्यायः ; 72B, इत्याकाशभैरवकल्पे मोहिनीमन्त्रं नाम चत्वारिंशोऽध्यायः ; 73A, इत्याकाशभैरवकल्पे शब्दाकर्षण-भाषामन्त्रनामैकचत्वारिंशोऽध्यायः ; 74A, इत्याकाशभैरवकल्पे लक्ष्मीमन्त्रं नाम द्विचत्वारिंशोऽध्यायः ; 74B, इत्याकाशभैरवकल्पे मायामन्त्रं नाम त्रिचत्वारिंशोऽध्यायः ; 75A, इत्याकाशभैरवकल्पे पुलिन्दिनीमन्त्रं नाम चतुश्चत्वारिंशोऽध्यायः ; 77B, इति श्रीमहाशैवतन्त्रे आकाशभैरवकल्पे महाशास्तामन्त्रं नाम पञ्चचत्वारिंशोऽध्यायः ; 78A, इत्याकाशभैरवकल्पे महाशैवतन्त्रे प्रत्यक्षसिद्धिप्रदे मंत्रोभिणीमन्त्रं नाम षट्चत्वारिंशोऽध्यायः ; 79A, इत्याकाशभैरवकल्पे धूमावतीमन्त्रं नाम सप्तचत्वारिंशोऽध्यायः ; 80A, ०प्रत्यक्षसिद्धिप्रदे धूमावतीमन्त्रं नामाष्टाचत्वारिंशोऽध्यायः ; 80B, इत्याकाशभैरवकल्पे नद्युत्तारणप्रयोगो नाम एकोनपञ्चाशत्तमोऽध्यायः ; 82B, इत्याकाशभैरवकल्पे महाशैवतन्त्रे प्रत्यक्षसिद्धिप्रदे चित्रविद्यामन्त्रं नाम पञ्चाशत्तमोऽध्यायः ॥

5896.

4634. उत्तरतन्त्रे स्वप्नाध्यायः । *Svapnādhyāyaḥ from Uttaratantra.*

Substance, country made paper 9½ × 4¼ inches. Folia, 3. Lines, 8 on a page. Extent in ślokas, 30. Character, Bengali. Appearance, discoloured and worn-out. Complete.

The work relates to the interpretation of dreams.

IO. V. 3135 describes a *Svapnādhyāya* which, in its colophon, is stated to belong to the *Itihāsapurāṇa* by Bṛhaspati. For almost identical topics from the *Mārkaṇḍeya Purāṇa* and *Bhaviṣya Purāṇa* cf. ASB. V. 3733, 3754-5. A MS of an *Uttaratantra* in 16 chapters is described in HPR. I. 35.

Beginning .—

नमो गणेशाय ।

अथोत्तरतन्त्रोक्तः स्वप्नाध्यायः ।

श्रीदेव्युवाच ।

देवदेव महादेव भक्तवत्सल शङ्कर ।
प्रायः कलियुगादेव लोकाः कल्मषभाजनाः ॥
कथं ज्ञानं भवेत्तेषां शुभाशुभफलेष्विह(:) ॥
भविष्ये वर्त्तमाने वा अतीते वा महेश्वर ।
विस्तरेण समाचक्ष्व यदि तेऽस्ति कृपा मयि ॥

ईश्वर उवाच ।

गुह्यं चैतत् प्रवक्ष्यामि तव प्रीत्या वरानने ।
साधकस्याशु देवेशि सर्व्वं प्रत्यक्षतां व्रजेत् ॥
देशिकस्याथ वक्ष्यामि लक्षणं शृणु साम्प्रतम् ।
पुरश्चर्य्यापवर्गार्थिं भक्तिश्रद्धान्वितस्य च ॥
जपपूजारतस्यापि कापट्यरहितस्य च ।
दातुर्भोक्तुः पालकस्य सर्व्वं प्रत्यक्षतां व्रजेत् ॥
स्वच्छन्दचरितस्याथ स्वच्छन्दहृदयस्य च ।
स्वप्ने दृष्टे तु देवेशि स्वप्नं प्रत्यक्षतामियात् ॥
संदेहे संशये गर्त्ते भवे च समुपस्थिते ।
अरोगी शुद्धदेहः सन् जप्त्वा स्तुत्वा च भक्तितः ॥
नत्वा च देवतां देवि सुतल्पे शयनं चरेत् ।
यथा यथा प्रसुप्तस्य आर्त्तस्य च महेश्वरि ॥
प्रसादं कुरुते स्वप्ने किञ्चिद्दर्शनसंहृतः ।
सद्यस्त्रिरात्रसप्ताहे द्विसप्ताहेऽथवा पुनः ॥
एकविंशतिरात्रेण स्यात एव धियां पतिः ।
प्रसादं कुरुते स्वप्ने ततः सिद्धेर्निदर्शनम् ॥
स्वप्ने पश्यति यो देवं महेशं सर्व्वतोमुखम् ।
देवीं वा स्वप्नमुक्ताश्च गृहं वाऽथ यथाविधं ॥

देवतादर्शनं चाथ निर्म्मलं चक्रमण्डलम् ।
गङ्गां भागीरथीं भानुं लिङ्गं विज्ञानमैश्वरम् ॥
प्रसन्नं तत्र जानीयात् सिद्धिं स्वप्नप्रदर्शने ॥
क्षितिलाभो भोजनञ्च रोदनं रुधिरच्युतम् ।
संग्रामविजयो होमो हर्म्म्याद्यारोहणं तथा ॥
नदीसमुद्रतरणं आकाशगमनं तथा ।
भास्करोद्गमनं चैव ज्वलनं तु हुताशनम् ॥
हर्म्म्याद्यारोहणं चैव प्रासादशिखरेऽपि च ।
... ...
2B, लभेत् सिद्धियुतश्चैव देवीनाश्चैव दर्शनम् ॥

End :—

दुःस्वप्नं यदि देवेशि खरादिरोहणान्तथा ।
भक्तानामन्यथा भावो दुःस्वप्नमिति निश्चितं ॥

Colophon :—

इत्युत्तरतन्त्रोक्तः स्वप्नाध्यायः समाप्तः ॥

5897.

10528. **मार्ज्जारीतन्त्रम् ।** *Mārjārītantram.*

Substance, country-made paper. 10 × 5 inches. Folium, 1. Lines, 9. Character, Nāgara. Appearance, discoloured. Incomplete. Fragmentary.

The name Mārjārītantra is indicated on the left hand upper margin. It contains only ten verses dealing with the worship of Ucchiṣṭagaṇeśa.

Beginning :—

गणेशाय नमः ॥

देव्युवाच ॥

देवदेव जगन्नाथ सर्व्वज्ञ परमेश्वर ।
भैरवानन्द चिन्मात्र नमः स्वच्छन्दवृत्तये ॥ १ ॥

शीघ्रेण सर्व्वसिद्धिः स्यात् केनोपायेन शङ्कर ।
वेदाचारविहीनानां सद्योच्छिष्टशरीरिणां ॥ २ ॥
शीघ्रेण सिद्धिदं मन्त्रं ब्रूहि मे परमेश्वर ।

ईश्वर उवाच ॥

उच्छिष्टगणनाथाख्यं सर्व्वसिद्धिप्रदायकम् ॥ ३ ॥
सर्व्ववश्यकरं लोके स्त्रीणां पुंसामिदं शुभम् ।
वश्यं करोति राजानं स्त्रियं वा पुरुषं तथा ॥ ४ ॥

5898.

4745. **कालोत्तरे मुद्रापटलम् ।** *Mudrāpaṭalam from the Kālottaratantram.*

Substance, palm-leaf. 12 × 2¼ inches. Folia, 8, of which five are marked 27, 43, 81, 98 and 110; the rest are without leaf-marks. Lines, 5 on a page. Extent in ślokas, 18. Character, Kuṭila. Appearance, old and dilapidated. Fragmentary.

All the folia except 27 are more or less damaged and they do not belong to the same work. The damaged and fragmentary condition of the MS does not make it possible to ascertain the works to which the folia belong. On fol. 110A, the *Gālavacarita* is mentioned twice. Leaf 27B contains the following colophon :—

इति कालोत्तरे मुद्रापटलम् ।

5899.

2889. **योनितन्त्रम् ।** *Yonitantram.*

Substance, country-made yellow paper. 15 × 4 inches. Folia, 17. Lines, 5 on a page. Extent in ślokas, 250. Character, Bengali. Appearance, fresh. Complete in 8 chapters.

The work is described in L. IX. 3185.

5900.

4672. *Yonitantram.*

Substance, country-made paper. 11 × 5 inches. Folia, 8. Lines, 9 on a page. Extent in ślokas, 200. Character, Bengali. Appearance, old and discoloured. Complete in 8 chapters.

5901.

5093. *Yonitantram.*

Substance, country-made paper. 11½ × 4 inches. Folia, 9. Lines, 8 on a page. Extent in ślokas, 225. Character, Bengali. Appearance, old and discoloured. Complete in 8 chapters.

5902.

6088. *Yonitantram.*

Substance, country-made paper. 7½ × 4¼ inches. Folia, 25. Lines, 7 on a page. Extent in ślokas, 225. Character, modern Kashmiri. Appearance, fresh. Complete in 8 chapters.

The last verse of the previous MSS of the work is not found here.

5903.

10000. योनिगह्वरतन्त्रम् । *Yonigahvaratantram.*

Substance, palm-leaf. 12 × 2 inches. Folia, 10. The corners of the leaves which may have borne leaf-marks are worn away. Lines, 5 on a page. Extent in ślokas, 550. Character, old Newari. Appearance, old. Complete.

The work seems to belong to the Nātha school.

Beginning -

या मान्तकाग्निकुहरोत्थितभास्वरायां
सोमार्कवह्नित्रिपथोदरमध्यसंस्था ।
निश्चेतचिन्तविघ्नं + + + भावां ।
स्वाभावभ[ा]मक्रियरां प्रणमामि कालीं ॥
श्रीमदुत्तरपीठे तु श्मशाने करवीरके ।
सर्व्वयोगिनी मेला यो + + + मये ॥
योनिगह्वरमुद्धृत्य मन्त्रमद्भावमुत्तमम् ।
श्रीज्ञाननेत्रनाथेन भूतले संप्रकाशितम् ॥
ब्रह्मप + + + + + भैरवं विगतामयं ।
शक्तिस्थं शक्तिरहितं परमानन्दरूपिणम् ॥
निर्वाणं निर्व्विकारञ्च अप्रतर्क्यं मनो प +
+ + गुणागणैर्हीनं उदयास्तमवर्ज्जितम् ॥
भूचरी खेचरी चैव दिक्चरी गोचरी तथा ।
योगिनी शाकिनी लामा सिद्धसङ्घैः + + + + ॥

A list of the *gurus* of the school is given thus :—

17B, गुरुक्रमं प्रवक्ष्यामि शृणु वीरेन्द्रनायकम् ।
श्रीदेव्युवाच ॥

शृणु भैरव-राजे[श] कथयामि महा[ा]द्भुतम् ।
य[न्न] कस्यचिदाख्यातं सिद्धानां खेचरीषु च ॥
तव स्नेहात् प्रवक्ष्यामि सिद्धिचक्रचतुष्टयम् ।
अनाख्येया परा निष्ठा ज्वाला मोक्षप्रदायिनीं ॥
प्रथमं क्रमपूर्व्वन्तु द्वितीयं सिद्धपूर्व्वकं ।
संहारं तु तृतीयं स्यात् अनाख्येयं चतुर्थकम् ॥
एतेषां क्रमराजानां सिद्धसंज्ञा वदामि ते ।
पश्चान्मन्त्र महाभीमं विद्या सङ्कर्षणी तथा ॥
आद्ये युगे यथा जातं त्रेतायां द्वापरे तथा ।
चतुर्थं महाघोरे समासा शृणु भैरव ॥

खगेन्द्रनाथचिञ्ञा अचा आयातानि क्तो युगे ।
द्वितीये कूर्म्मनाथं तु मंगलादूतिमेव च ॥
तृतीये षनाथश्च काममङ्गलया सह ।
चतुर्थे मीननाथं च कुङ्कणादूतिसंयुतम् ॥
तस्यैव क्रीडमानस्य उत्पन्ना द्वाद[श] सुताः ।
तेषां नामानि वक्ष्यामि आम्नायं च यथास्थिताः ॥
भट्टामरमहेन्द्रं च वल्कलं चित्रमेव च ।
विन्ध्यालिं वरदेवं च अहेन्द्रं च गजेन्द्रकम् ॥
महीधरं च गुडिकं सिद्धेषाः गुरुमन्ततौ ।
एभ्योर्द्धरेताः षट् चैव साद्विकारटिस्तथा ॥
तेषां च प्रविभागं तु कथयामि वृषध्वज(ः) ।
भट्टमहेन्द्रनाथं च वल्कलं च तथा परम् ॥
अहेन्द्रं च गजेन्द्रं च महीधरस्तथैव च ।
एते सिद्धा महादेव ऊर्द्धरेता गता[ः] सदा ॥
अमरनाथपादं तु वरदेवस्तथापरः ।
चित्रालिं विन्दनाथस्य गुडिकानाथमेव च ॥
एते षट् स्यात् विकारास्ते कथिता[ः] सुरपूजित(ः) ।
निष्क्रियानाथपादं च ज्ञानदीप्तिः महेकतः ॥
विद्यानन्द च रक्तं तु द्वितीयं कथिता तव ।
मत्स्यानन्दं महानन्दं तृतीयं सिद्धपूजितम् ॥
शिवानन्दं च रत्ना च आयातं च चतुर्थके ।
खगेन्द्राद्यादिसिद्धानां कथिता गुरुसन्ततौ ॥
एते वै कुलमार्गे स्य रहस्यं शिवनिर्म्मितम् ।

The origin of the scriptures of the school and the order of creation of the world are indicated as follows :—

34B, सम्यक् महाग्रामनसम्प्रदायं पूजाकथासंक्रमपूर्व्वमेवं ।
सम्प्राप्य कौलोत्तरमारभूतं अभूतपूर्व्वं अथ कारणादिं ॥

देवी श्रीवीरसिंहाख्यस्वामिनी प्रसूता भुवि ।
तत्पादपद्मयुगलात् प्राप्तं चैव मह्यानयम् ॥
श्रीरूपानन्दविधा देवी दत्तं तस्य प्रसादतः ।
तया दत्तं स्वशिष्यस्य ओघानन्दाभिधानतः ॥
दत्तं परामृतरसं महाशासनमुत्तमम् ।
तेनेदं चरितं सर्व्वं यथा प्राप्तं गुरोर्मुखात् ॥
सम्प्रदायं सुसंबद्धं सरहस्यं सुखागमम् ।
रचितं गुरुवाक्येन स्वसन्तानहिताय च ॥
आदौ सर्व्वमिदं शून्यं निराभासं निराश्रयम् ।
ततो आभासमुत्पन्नं आभासध्वनिसम्भवम् ॥
ध्वनिस्तु शब्दमापन्नं शब्दो नादत्वमागतम् ।
नादविन्दुरिवोत्पन्नं विन्दुपद्मं प्रजायते ॥
ततः एष्टा त्रिकोणान्तु ह्लादरूपं सुतेजसम् ।
ततस्तत्पृष्ठके चक्रं त्रिकोणं तापरूपिणम् ॥
ह्लादताप-क्रमेणैव अवतीर्णं मह्यानयं ।
ततो मध्या परा योनि एकाराक्रान्तमुत्तमा ॥
तत्र मध्या विस्फुलिङ्गं उत्पन्नं भूरितेजसम् ।
विस्फुलिङ्गात् समुत्पन्ना रावं सम्पूर्णलक्षणम् ॥
ततो रावात् समुत्पन्ना देवी दोक्षीणपूर्णगा ।

End :—

जयति विभवसारं रौद्रचण्डप्रमूर्त्तिमम् ।
ममल-कमल-सान्तं मन्त्रदेहप्रसिद्धं
कुमतिमिह देवी साधकः सिद्धिदा तु ॥

The last colophon which is the only colophon in the whole work runs :—

इत्युत्तराम्नाये श्रीॐकारपीठविनिर्गते श्रीचण्डभैरवे षोडशसहस्रे उड्डिते योनिगह्वरं समाप्तं । इति शुभं ।

5904.

3160. कुलार्णवतन्त्रम् । *Kulārṇavatantram.*

Substance, country-made paper. 14×5½ inches. Folia, 66. Lines, 11 on a page. Extent in ślokas, 2,150. Character, Bengali. Appearance, fresh. Incomplete.

The work, in 17 chapters, has been published in the *Tantrasaṅgraha*, *Sulabha Tantra-Prakāśa* and *Tantric Texts* of Arthur Avalon (Calcutta, 1917). The present MS goes to the end of the 14th ullāsa. Of the 15th ullāsa there is only one leaf.

5905.

3452. *Kulārṇavatantram.*

Substance, country-made paper. 17½×4 inches. Folia, 1–69 (as indicated on the right hand side) and 70–141 (as indicated on the left hand side). Lines, 7 on a page. Extent in ślokas, 2,300. Character, Bengali. Date, Śaka 1640. Appearance, discoloured. Complete in 17 chapters.

Post Colophon :

ऋतुगन्धा । । ग्मासु शाकेषु कृपाशार्म्मणा ।
रहस्योयं मुद्रालेखि शिवोक्तः शिवया सह ॥

रुद्रयामले ।

उड्डीयाने महापीठे न सिद्धिः स्यात् स्त्रियं विना ।
स्त्रीविहीनो साधने च विघ्नं कुर्व्वन्ति देवताः ॥
तथैव देविदेकोठे पीठे देवि सुनिश्चितम् ।
भक्ताहारविहारा च सर्व्वलोक-मनोहरा ॥
यस्या दर्शनमात्रेण मनःक्षोभः प्रजायते ।
अक्षोभो मनसश्चैव तत्र सिद्धिः प्रजायते ॥
सुजातीया सर्व्वदा ग्राह्या ब्राह्मणीं यवनीं विना ।
रजकी नापिती ग्राह्या विदग्धा सर्व्वदैव च ॥

ब्राह्मणीं यवनीं वापि यः स्पृशेद्दैवयोगतः ।
न तस्य विद्यते सिद्धिः कल्पकोटिशतैरपि ॥
दरिद्रः स्यात् महारोगी सर्व्वलोकविनिन्दितः ।
विमुखी त्रिपुरा तस्य हसन्ती याति नित्यदा ॥
हिङ्गुलाख्ये महापीठे मत्स्यं खादति यो जनः ।
न तस्य जायते सिद्धिः कल्पकोटिशतैरपि ॥
देविदेकोटिमुद्राख्यपीठयोरन्तरे वसन् ।
मद्यं दत्त्वा जपेद्यस्तु तस्य सिद्धिर्न जायते ॥
जालन्धरे महापीठे तथा मद्यं परित्यजेत् ।
वाराणस्यां महाभागे शिवभक्तिपरायणाः ॥
एकया मुद्रया सिद्धिर्जायते नात्र संशयः ।
अन्तर्वेदिप्रयागे [च] मिथिलायां तथैव च ॥
मागधे मेखलायाञ्च मद्यात् सिद्धिः प्रजायते ।
तत्र देवाः प्रकुर्व्वन्ति छिद्रं मद्यरसं विना ॥
अङ्गवङ्गकलिङ्गेषु स्त्रिया सिद्धिर्भवेद्ध्रुवम् ।
तथैव सिंहलादौ च स्त्रीराज्ये द्रौपदीकृते ॥
राढायां मत्स्यमांसैश्च मुद्रयाङ्गनयापि च ।
गौडे च पञ्चभिर्द्रव्यैः सर्व्वसिद्धिः प्रजायते ॥
एवमन्येषु देशेषु पञ्चभिः सिद्धिरुत्तमनुः ॥

तन्त्रान्तरे ।

दधिना समभागञ्च गुडं दत्त्वा दिनत्रयम् ।
वदरीमूलसंयुक्तं मद्यं भवति पार्व्वति ॥

तन्त्रान्तरे ।

कुलं शक्तिः समाख्याता तस्यां पूजादिकञ्च यत् ।
कुलाचारः स विज्ञेयः साधकस्येष्टदायकः ॥

समाप्तश्चायं ग्रन्थः ॥

शुभमस्तु शकाब्दाः १६४० । श्रीगङ्गाधर देवशर्म्मणः स्वाक्षरमिदं पुस्तकञ्च । कृष्णाय गोविन्दाय नमः ॥

The date given here seems to be the date of copying of the present MS whereas the date found in the beginning of the post-colophon appears to be the date of the MS from which the present MS was copied.

The above extract from the *Rudrayāmala* agrees generally with what appears to be the 18th chapter of the *Kulārṇava* in a Vaṅgīya Sāhitya Pariṣat MS (No. 602).

5906.

4730. *Kulārṇavatantram.*

Substance, country-made yellow paper $9\frac{1}{4} \times 4\frac{1}{2}$ inches. Folia, 44–53. Lines, 7 on a page. Extent in ślokas, 105. Character, Nāgara. Date, N.S 924. Appearance, fresh. Incomplete.

The present MS contains only the ninth chapter of the work.

Post Colophon : –

संवत् ९२४ माघशुक्ले चतुर्द्दश्यां लिखितमिदम् ।

5907.

3714. *Kulārṇavatantram.*

Substance, country-made paper. $19\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 14. Lines, 8 on a page. Extent in ślokas, 490. Character, Bengali. Appearance, old and dilapidated. Incomplete.

This MS runs from the beginning up to verse 39 of the fourth chapter of the work.

5908.

3917E. *Kulārṇavatantram.*

Substance, country-made paper. $14\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 39A–41A. Lines, 11 on a page. In tripātha form. Character, Bengali. Appearance, old and discoloured. Incomplete.

This MS contains what is called the "36th" chapter of the work.

Beginning :—

ॐ गुरवे नमः। श्रीशिव उवाच—

श्रृणु दुर्गे प्रवक्ष्यामि साधकानां सुखोत्तमम्।

End :—

तवैव सेवानिपुणो जनो वा तस्मिन् चित्तं फलभाग् न वेश्वरः।

Colophon :—

इति कुलार्णवे देवीश्वरीसंवादे परमार्थ-तत्त्वज्ञानतरङ्गिण्यां नाम-

महात्म्यं षट्त्रिंशत् पटलः।

5909.

3917G. *Kulārṇavatantram.*

Substance, country-made paper. 14½ × 4½ inches. Folia, 54B–83B. Lines, 11 on a page. Character, Bengali. Date, Śaka 1614. Appearance, old and dilapidated. Incomplete.

This MS runs up to verse 74 of the 11th chapter. The date of the MS is given at the end of the Muṇḍamālā-tantra which is completed at fol. 54B of the same MS.

5910.

4668. *Kulārṇavatantram.*

Substance, country-made paper. 17 × 6¼ inches. Folia, 152–216 (as indicated on the right side of the leaves) or 1–65 (as indicated on the left side). Lines, 10 on a page. Character, Bengali. Appearance, fresh. Complete in 17 chapters.

The seven verses at the end of Avalon's edition of the work are not found in the present MS.

5911.

5912. *Kulārṇavatantram.*

Substance, country-made paper. 9 × 5½ inches. Folia, 123. Lines, 10 on a page. Extent in ślokas, 2,150. Character, modern Nāgara. Appearance, fresh. Complete in 17 chapters.

5912.

5862A. *Kulārṇavatantram.*

Substance, country-made paper. 9½ × 4¼ inches. Folia, 1-5. Lines, 13 on a page. Character, Nāgara. Appearance, good. Incomplete.

This MS runs up to verse 117 of chapter I of the work. In the beginning there are three additional introductory verses not found in Avalon's edition of the work. They run as follows:—

श्रीगुरून् गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥
अनाद्यायाखिलाद्याय मायिने गतमायिने ।
अरूपाय स्वरूपाय शिवाय गुरवे नमः ॥
परप्रसादमन्त्राय सच्चिदानन्दमूर्त्तये ।
अग्नीषोमस्वरूपाय त्र्यम्बकाय नमो नमः ॥

5913.

166. **कुलार्णवे ईशानसंहिता ।** *Īśānasaṃhitā from Kulārṇavatantram.*

Substance, country-made yellow paper. 18 × 3 inches. Folia, 9. Lines, 5 on a page. Extent in ślokas, 215. Appearance, good. Complete.

The manuscript has been noticed in L. I. 424. No such topic as dealt with in this MS is found in the printed editions of the *Kulārṇava.*

It is in the form of an interlocution between Nārada and Gautama and also between Śaṅkara and Pārvatī. It is a Vaiṣṇava work.

The present work obtains its name from the name of the sixth mouth of Śiva which is hidden and called Īśāna.

The six Āmnāyas of the Tantras describing the rites of various deities are stated to have issued from the six mouths of Śiva as follows (cf. also pp. 119-20 below):—

Fol. 3B. भुवनेशी चान्नपूर्णा महालक्ष्मीः सरस्वती ।
चतुर्वर्गप्रदा देव्यो मन्त्रास्तासाञ्च कामदाः ॥
साधनानि च सर्व्वाणि पूर्व्ववक्त्रेण कीर्त्तिताः ।
प्रसाददक्षिणामूर्त्तिगोपाल-गरुडध्वजाः ॥
चतुर्वर्गप्रदा एते मन्त्रास्तेषां ससाधनाः ।
दक्षवक्त्रेण कथिता मया जनविमुक्तये ॥
कृष्णनारायणौ विष्णुराघवौ नरसिंहकः ।
हयग्रीव-वराहाद्यास्तथान्ये शङ्करादयः ॥
चतुर्वर्गप्रदा लोके मन्त्रास्तेषां ससाधनाः ।
प्रत्यक्-वक्त्रेण कथिता मया कारुण्यतः प्रिये ॥
काली तारा मर्द्दिनी च त्वरिता वगला तथा ।
जयदुर्गा तथा चान्या मातङ्ग्यादयः प्रिये ॥
युगे युगे पूर्णकला विशेषेण कलौ युगे ।
मन्त्राः ससाधनास्तासां उदक्वक्त्रेण कीर्त्तिताः ॥
त्रिपुरेशी तथा चण्डा तथा त्रिपुरभैरवी ।
त्रिपुटा त्रिपुरा नित्या तथा चान्याश्च देवताः ॥
चतुर्वर्गप्रदा नित्यं मन्त्रास्तासां ससाधनाः ।
ऊर्द्ध्ववक्त्रेण कथिता भुक्तिमुक्तिकृते नृणां ॥
सूर्य्यश्चन्द्रो हनूमांश्च गौराङ्गो ह्यपराजिता ।
प्रत्यङ्गिरा विषहरा तथा चान्याश्च देवताः ॥

चतुर्वर्गप्रदास्त्वेमे कलिकाले विशेषतः ।
मन्त्राः ससाधनास्त्वेषां गुप्तवक्त्रेण कीर्त्तिताः ॥
इत्येष कथितः कान्ते मम वक्त्रविनिर्णयः ।
गोपनीयः प्रयत्नेन न देयः पशुघातिने ॥

The name of Gaurāṅga in the sixth Āmnāya provokes a question from Pārvatī in reply to which Maheśvara emphasizes the divinity of Gaurāṅga and gives the details of his Tāntrika worship.

5914.

3764. **कुलार्णवे षट्कर्म्मविधिः ।** *Ṣaṭkarmavidhiḥ from Kulārṇavatantram.*

Substance, country-made paper. $9\frac{1}{2} \times 4$ inches. Folia, 2. Lines, 9 on a page. Extent in ślokas, 30. Character, Nāgara. Appearance, fresh. Complete.

This work deals with the six black rites of the Tantras. This topic is dealt with, though not in identical language, in the 16th chapter of the *Kulārṇava.* The first three verses of the extract quoted below are found in *Śāradātilaka* (XXIII, 128-30).

Beginning :—

अथ षट्कर्म्मप्रयोगाः ।

सूर्य्योदयं समारभ्य घटिकादशकं क्रमात् ।
ऋतव[स्व] वसन्ताद्याः दिवाराचौ दिने दिने ॥
वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तसंमरगात्(?) ।
हेमन्ते शान्तिकं प्रोक्तं वसन्ते वश्यकर्म्मणि ॥
शिशिरः स्तम्भने ज्ञेयो विद्वेषो ग्रीष्मके मतः ।
प्रावृट् उ[च्]चाटने ज्ञेया शरत् मारणा[कर्म्मणि] ॥
सर्व्वाभिमुखतः कुर्य्यात् शान्तिकस्य कुलेश्वरि ॥

Colophon :— इति श्रीकुलार्णवे षट्कर्म्मविधिः ।

For an account of the contents of the Kulārṇavatantra cf. C. Chakravarti—*Extent and contents of the Kulārṇavatantra* (Annals of the Bhandarkar Oriental Research Institute, Vol. XIII, p. 206ff.).

5915.

163. गुप्तसाधनतन्त्रम् । *Guptasādhanatantram.*

Substance, country-made paper. 19 × 3 inches. Folia, 16. Lines, 5-7 on a page. Extent in ślokas, 400. Character, Bengali. Date, Śaka 1691(?). Appearance, old and soiled. Complete in 12 chapters.

The work, in 12 chapters, has been published in the *Tantrasaṅgraha* of Rasikmohan Chatterji and described in L. II. 738. For other editions cf. BM Catalogue (1877–1892, p. 414; 1906–28, p. 1073).

Post Colophon Statement :—

शशिग्रहषडास्यशमितेऽब्दे माघमासे लिखितो श्रीराजकिशोर शर्म्मणा गुप्तसाधनतन्त्रकः ।

5916.

4666. *Guptasādhanatantram.*

Substance, country-made yellow paper. 16½ × 4¼ inches. Folia, 17. Lines, 7 on a page. Extent in ślokas, 400. Character, Bengali. Appearance, fresh. Complete in 12 chapters.

5917.

2760. *Guptasādhanatantram.*

Substance, country-made paper. 16½ × 4 inches. Folia, 4. Lines, 5 on a page. Extent in ślokas, 84. Character, Bengali. Appearance, new. Incomplete.

The present MS contains the 6th and the 7th Paṭala of the work.

5918.

159. गुरुतन्त्रम् । *Gurutantram.*

Substance, country-made paper. 15 × 5½ inches. Folia, 7. Lines, 7 on a page. Extent in ślokas, 190. Character, Bengali. Appearance, fresh. Complete.

The present MS has no division in chapters. The work is described in L. I. 247 in which the concluding colophon is given as belonging to the fifth chapter of the work. The beginning and end of the present MS agree with those of L.

5919.

1621. निर्व्वाणतन्त्रम् । *Nirvāṇatantram.*

Substance, country-made yellow paper. 14 × 3½ inches. Folia, 17 Lines, 8 on a page. Extent in ślokas, 550. Character, Bengali. Appearance, old. Complete in 14 chapters.

Printed in 14 chapters in *Tantrasaṃgraha* and *Sulabhatantraprakāśa.* For a description of the work cf. L. I. 274.

5920.

31. समयाचारतन्त्रम् । *Samayācāratantram.*

Substance, country-made paper. 9½ × 4 inches. Folia, 16. Lines, 9 on a page. Extent in ślokas, 300. Character, Nāgara Appearance, old Complete.

The present MS is described in L. II. 755, where it is stated to be in prose but as a matter of fact the work is mostly in verse. The portions of mantras and directions only are in prose. The work has been described also in HPR. II. 241.

The object of the work is given in the following verses (Fol. 1):—

प्रणु देवि प्रवच्यामि गुह्याद्गुह्यतरं महत् ।
समयाचारसङ्केतं तन्त्रं परमदुर्लभम् ॥ ६ ॥
पूजनादिषु यः कालो देवतानां पृथक् पृथक् ।
स कालः समयो नाम यं ज्ञात्वामृतमश्नुते ॥ ७ ॥
कालेष्वाचरणं देवि यस्य देवस्य यं विधिं ।
तं नाम समयाचारं देवानामपि दुर्लभम् ॥ ८ ॥
सङ्कीर्त्तनात् पुनर्देवि रहस्यानां रहस्यकम् ।
समयाचारसङ्केतं नाम्ना तन्त्रं प्रकीर्त्तितम् ॥ ९ ॥
अथवा समयाचारात् समयाचारमुच्यते ।
समया गोपनीयानां सदा गोप्या प्रकीर्त्तिता ॥ १० ॥

The origin of the six Āmnāyas is indicated:—

5B, पूर्व्वाम्नायस्तदा ज्ञातो यदा प्राची दिशि स्थितः ।
एवं पश्चिम आम्नायः पश्चिमस्यां दिशि स्थितः ॥ ६८ ॥
एवमुत्तर आम्नाय उत्तरस्यां दिशि स्थितः ।
मुखमूर्द्धकृतं देवि यत्प्रोक्तं तव सन्निधौ ॥ ६९ ॥
स ऊर्द्ध आम्नायः कथितो देवानामपि दुर्लभः ।
अधोमुखं कृतं देवि यत्प्रोक्तं गिरिशप्रिये ॥ ७० ॥
अध आम्नायः इत्युक्तं सत्यं सत्यं वरानने ।
षडाम्नायकथितास्योत्पत्तिक्रमनामतः ॥ ७१ ॥

In this enumeration the southern Āmnāya is omitted by inadvertence of the scribe or of the author. But it appears in the next extract which gives the names of different goddesses described in the various Āmnāyas:—

6A, यस्मिन् यस्मिंश्च ये देवाः कीर्त्तितास्च वरानने ।
तांस्तान् देवान् प्रवच्यामि साधका[नां] सुखाय च ॥ ७२ ॥

श्रीविद्याभेदसहिता बाला च त्रिपुरा च या ।
भुवनेश्वर्य्यन्नपूर्णा च पूर्व्वाम्नायप्रकीर्त्तिताः ॥ ७३ ॥
वगलामुखी च दग्निनी त्वरिता स्वफलप्रदा ।
महिषमर्द्दिनी महालक्ष्मी दक्षिणाम्नायकीर्त्तिता ॥ ७४ ॥
कालिकाभेदसहिता ताराभेदैश्च संयुता ।
मातङ्गी भैरवीच्छिन्ना तथा धूमावती मता ॥ ७५ ॥
उत्तराम्नायकथिता शीघ्रकामफलप्रदा ।
समस्तभेदसहिता कालिका या प्रकीर्त्तिता ॥ ७६ ॥
द्वाविं[श]त्यक्षरी नाम दक्षिणाम्नायसंज्ञिका ।
पराप्रसादो मन्त्रश्च ऊर्द्धाम्नायप्रकीर्त्तितः ॥ ७७ ॥
वागीश्वर्य्यादयो विद्या अधआम्नायकीर्त्तिताः ।
ऊर्द्धाम्नायो ह्यधश्चैव केवलं मोक्षदो भवेत् ॥ ७८ ॥

An enumeration of the various original Tantra works is given as follows:—

8B, नाना तन्त्राणि देवेशि पटलानि पृथक् पृथक् ॥ १२८ ॥
डामराणि च सर्व्वाणि तन्त्राणां हृदयानि च ।
समासतः प्रवक्ष्यामि शृणु देवि वरानने ॥ १२९ ॥
चतुःषष्टीनि तन्त्राणि यामलान्यष्ट सुन्दरि ।
डामराणि च त्रीणि स्युः कथयामि शुभानने ॥ १३० ॥
तन्त्राणां बहुधानाश्च मया पूर्व्वं प्रकाशितं ।
यामलान्यत्र वक्ष्यामि डामराणि तथा पुनः ॥ १३१ ॥
विष्णुब्रह्मशिवानाञ्च यामलानि पृथक् पृथक् ।
शक्तेर्गणपतेश्चैव स्कन्दस्य च पृथक् पृथक् ॥ १३२ ॥
सूर्य्याचन्द्रमसोश्चैव कथितानि वरानने ।
उड्डीशडा[म]रं नाम भूतडामरकं तथा ॥ १३३ ॥
शक्ति-डामरकं नाम कथितानि च डामरम् ॥

It mentions Vijayākalpa as another work previously mentioned (*v.* 239).

5921.

3112. *Samayācāratantram.*

Substance, country-made paper. $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 23. Lines, 9 on a page. Extent in ślokas, 300. Character, Nāgara. Date, Samvat, 1944. Appearance, fresh. Complete.

Post Colophon :—

संवत् १९४४ ॥ मीः कु आर मासे शुक्लपक्षे ॥ १० ॥ वार सोमारः ॥

श्रीशिवशङ्कराय नमो नमः ॥ श्रीरामानुजाय नमो नमः ॥

5922.

3172. *Samayācāratantram.*

Substance, foolscap paper. 15×5 inches. Folia, 9. Lines, 11 on a page. Extent in ślokas, 325. Character, Bengali. Appearance, discoloured. Complete.

5923.

11251. *Samayācāratantram.*

Substance, country-made paper. 11×5 inches. Folia, 1-7. Lines, 14 on a page. Extent in ślokas, 270. Character, Nāgara. Appearance, discoloured. Incomplete.

The present MS begins with the last foot of a verse marked 30.

5924.

3712. समयातन्त्रम् । *Samayātantram.*

Substance, country-made paper. $18 \times 3\frac{1}{2}$ inches. Folia, 39. Lines, 8 on a page. Extent in ślokas, 1,200. Character, Bengali. Appearance, dilapidated and pasted. Incomplete.

It contains the first nine Paṭalas and a portion of the tenth.

The topics dealt with in the work as well as the significance of the name of the deity Samayā have been indicated on Fol. 38A:—

कथितं परमज्ञानं समया सा समार्च्चनम् ।
कर्म्मयोगात्मकं वेदज्ञानयोगात्मकं परम् ॥
न्यासविन्यासनं भद्रं नित्यज्ञानपरापरम् ।
पूजासङ्केतममलं वलिसङ्केतमुत्तमम् ॥
जपसङ्केतमीशान-वह्निहोमविधानकम् ।
त्रिवीजसाधनं गुप्तं तथा भावप्रकाशनम् ॥
महाप्रयोगसङ्केतं संशयच्छेदकारणम् ।
... ...
काले सम्पद्यते सर्व्वं काल एव हि लीयते ।
सृष्टिसंहारयोर्देवि काल एव हि कारणम् ॥
कालभैरवरूपोऽहं त्वञ्च कालस्वरूपिणी ।
कालः समय एव स्यात् समया त्वं परप्रिये ॥
अहं सामयिकस्तेन यस्मात्तव वशं सदा ॥

5925.

3161. वीरतन्त्रम् । *Viratantram.*

It gives the *mantras* for the purification of wine used in Tantric worship and put into a number of pots arranged in a particular order. (Also cf. *Śārikārcanapaddhati* below.)

Beginning :—

श्रीगणेशाय नमः । ॐ ।

श्रीमद् भैरवशेखरप्रविलसच्चन्द्रामृतप्लावितं
क्षेत्राधीश्वरयोगिनीगणमहासिद्धैः समाराधितम् ।
आनन्दार्णवकं महात्मकमिदं साक्षात्त्रिखण्डामृतं
वन्दे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम् ॥
येनं मीनरसावहं दयितया दत्तञ्च पीयामृतं
किञ्चिच्चञ्चलरक्तपङ्कजदृशा तस्मै समावेदितम् ।
वामे दितं(?) स्वाद् विशुद्धशुद्धकवलं पाणौ विधायात्मके
वन्दे पात्रमहं द्वितीयमधुना नादैकसंवर्द्धनम् ॥
सर्व्वाम्नायकलाकलापकलितं कौतूहलद्योतकं
चन्द्रोपेन्द्र-महेन्द्र-सूर्य्यवरुणौर्ब्रह्मादिभिः सेवितम् ।
ध्यातं सिद्धगणैः स्तुतं मुनिगणैर्मोक्षार्थिभिः सर्व्वदा
वन्दे पात्रमहं तृतीयमधुना स्वात्मावबोधक्षमम् ॥

End :—

पाने कृते पूर्णकलाप्रकाशः पाने कृते पूर्णसमानबुद्धिः ।
पाने कृते पूर्णपवित्रदेहो पानं पिबेत् पञ्चदशं प्रवीणः ॥
यत्ते षोडशपात्रविन्दुकलया ब्रह्माथ विष्णुर्व्वभुः
ज्ञानेच्छादिसमस्तशक्तिविभवव्यक्तिर्विनक्तः स्फुटम् ।
उत्पत्तिस्थितिकालकल्पकलित-स्वात्मप्रकारेण वै ।
सोऽहं षोडश-पात्रमेव गुरुतो गृह्णामि + च्छं भवेत् ॥

Colophon :—

इति महाकालसंहितायां षोडशपात्रे समाप्त ।

6059.

9260. पराशरसंहितायां हयग्रीवौङ्कारकल्पः ।

Hayagrīvauṅkārakalpa from the Parāśarasaṃhitā.

Substance, country-made paper. 11 × 6 inches. Folia, 6. Lines, 13 on a page. Extent in ślokas, 120. Character, Nāgara. Appearance, tolerable. Complete.

The *Hayagrīvauṅkārakalpa*, treating of the details of the worship of Hayagrīva and constituting the seventh chapter of the *Parāśarasaṃhitā*, is quoted in this and the following MS, which describe the process of the worship.

The colophon of this extract runs as follows in leaf 5A :—

इति श्रीपराशरसंहितायां हयग्रीवौङ्कारकल्प[ः] सप्तमोऽध्यायः ।

Beginning of the MS :—

अथ सारसंग्रहे ।
अथोच्यते हयग्रीवमन्त्रः सर्व्वसमृद्धिदः
चन्द्रस्थं गगनं वामकर्णविन्दुसमन्वितं
एकाक्षरो मनु[ः] प्रोक्तो हयग्रीवस्य + + +

चन्द्र सकारः वामकर्णा उकारः विन्दुरनुस्वारः ।
एतैः ॐ स्रूमिति बीजमुद्धृतम् ॥

End of the MS :—

अथ वा तं करे कुम्भेऽभिमन्त्र्य जलं पिबेत् ।
पीतं वादिमुखे ध्यात्वा स्तम्भयेत्तस्य भारतीं ॥

मन्दभाग्योऽपि भस्मोद्धूलितविग्रह[ः] सन् अभयाभिमन्त्रितं कृत्वा वचां भक्षयेत् । वृहस्पतिसमो भवेत् ।

6060.

9448. *Hayagrīvaonkārakalpa from the Parāśarasaṃhitā.*

Substance, country-made paper. 10×4½ inches. Folia, 8. Lines, 10 on a page. Extent in ślokas, 120. Character, Nāgara. Appearance, tolerable. Complete.

Same as above.

6061.

2424. अङ्गिराकल्पः । *Aṅgirākalpa.*

Substance, country-made paper. 10×4 inches. Folia, 30. Lines, 13 on a page. Extent in ślokas, 828. Character, Nāgara. Appearance, fresh. Complete.

The present MS has been described in L. X. 4046. The work deals with the details of the worship of the deity Āsurī.

6062.

272. विश्वामित्रकल्पः । *Viśrāmitrakalpa.*

Substance, country-made paper. 12×4½ inches. Folia, 37. Lines, 11 on a page. Extent in ślokas, 1,600. Character, Nāgara. Date, 1746 S.E. Appearance, fresh. Complete.

The work deals with the daily duties of the twice-born and, strictly speaking, belongs to the Smṛti class of literature. Of Tāntrika topics dealt with herein mention may be made of bhūtaśuddhi, dīkṣā and puraścaraṇa of the Gāyatrīmantra.

The present manuscript is noticed in L. II. 885. CS. III. 508 describes a work, in sūtra form, of the same name and similar contents.

This MS seems to be a part of a much larger one, because the first leaf of this has, on the right upper-hand corner, the number 246 and the last leaf has, at the same place, the number 283.

Post Colophon Statement :—

श्रीयोगेश्वरात्मकलक्ष्मीकेशवार्पणमस्तु ।

श्रीः शुभम् । शके १७४६ तारणनाम संवत्सरे कार्त्तिक शुद्ध-त्रयोदशी गुरुवासरे तद्दिने इदं पुस्तकं वरतटाख्यग्रामनिवासि-ज्योतिषीत्युपनामक-गोविन्दात्मज-प्रभाकरदैवज्ञेन स्वार्थं परोप-कारार्थं लिखितम् यादृशमिति ।

अर्ज्जितं भूरिकष्टेन पुस्तकं लिखितं मया ।
हर्त्तुमिच्छति यः पापी तस्य वंशक्षयो भवेत् ॥

6063.

5962. कालरात्रिकल्पः । *Kālarātrikalpa.*

Substance, country-made paper. 9 × 4 inches. Folia, 38. Lines, 7 on a page. Extent in ślokas, 550. Character, Nāgara. Appearance, old and discoloured. Complete.

It relates to the details of the worship of the deity called Kālarātri including an account of the six black rites to be performed with the mantras of this deity. According to

four colophons in the present MS (Fol. 3A, 17A, 18B, 25A) the work forms part of the *Rudrayāmala* and according to one colophon (Fol. 29B) it belongs to the *Āgamasāra*. A portion in this MS (Fol. 25A–38) is absent in another MS of the same work described below. The concluding portion (Fol. 32A–36B) is in a vernacular.

Beginning :—

श्रीगणेशाय नमः। श्रीगुरुभ्यो नमः।

पार्व्वत्युवाच।

देवदेव जगन्नाथ भक्तानुग्रहकारक।
त्वत्प्रसादान्मया सर्व्वं श्रुतं रुद्रादियामलम्॥
इदानीं श्रोतुमिच्छामि यन्मे मनसि वर्त्तते।
कालरात्र्याः क्रमार्चा + तत्सर्व्वं कृपया वद॥

ईश्वर उवाच।

... ...

सन्ति नानाविधा मन्त्रा आगमोक्ताः सबीजकाः।
तथैव वैदिका मन्त्राः पुराणडामरे तथा॥
ते सर्व्वे निष्प्रभा जाताः कलौ वीर्य्यविवर्ज्जिताः।

... ...

सत्यमागमशास्त्रन्तु प्रतिज्ञासिद्धमेव च।
अनादरेण तद्रष्टं गुरुभक्तिं विना तथा॥
तन्मध्ये सारभूतं तु प्रत्यक्षफलदायकम्।
अन्यथा न भवेद्देवि + + +॥
सिद्धमन्त्रमिमं देवि सारात्सारोत्तमं [तथा]।
पुरश्चर्य्याक्रिया नास्ति स्मरणात् पूजनात् फलम्॥
मन्त्रस्यैतस्य माहात्म्यं सामर्थ्यं स्तुतिमेव च।
वक्तुं न शक्यते देवि कल्पकोटिशतैरपि॥

... ...

तस्याः पूजां प्रवक्ष्यामि मम बुद्ध्यनुसारतः ॥
श्रूयतामेकचित्तेन न कस्य कथितं प्रिये ।
कृष्णपक्षस्य चाष्टम्यां भूते भौमदिने तथा ॥
प्रारम्भं कारयेत्तत्र भक्तिभावेन सादरात् ।
ब्राह्मे मुहूर्त्ते चोत्थाय स्मरेद्देवीं चतुर्भुजाम् ॥
प्रसन्नवदनाम्भोजां लीलालोचनघूर्णितां ।
अनर्घरत्नसंयुक्तां दिव्यचन्द्रार्द्धधारिणीम् ॥
नीलांशुकपरीधानां मुक्ताकिङ्किणिघण्टिकां ।
पल्लवारुणविम्बोष्ठीं भूषितां सितकंचुकीम् ॥
नानारत्नाधिकं ज्योतिः शिरःपुष्पैरलङ्कृतां ।
पयोधर म + + + काञ्चीयुक्तनितम्बिनीं ॥
मुक्तावेणीलताचारुमुदयादित्यसन्निभां ।
एवं ध्यात्वा जपेत् किञ्चित् उत्तिष्ठेच्छयनात्ततः ॥
ततो राक्षसकोणे तु एकान्ते जनवर्ज्जिते ।
तृणान्तरितभूम्यां तु कुर्य्यान्मलविसर्ज्जनम् ॥

The mantra of the deity is given as follows (Fol. 5B):—

अस्य श्रीकालरात्रिमन्त्रस्य दक्षशक्तिः जगतीच्छन्दः अलजापुरनिवासिनी मायाराज्ञी देवता हृदये क्रौं जानि नाभौ क्ली शक्तिर्गुह्ये श्रीकालरात्रिप्रीत्यर्थं जपे विनियोगः ।

मन्त्रोद्धारं प्रवक्ष्यामि गोप्याद्गोप्यतरं महत् ।
प्रणवं वाग्भवं माया मन्मथं कमलोद्भवम् ॥
बीजं पञ्चशिरो ज्ञेयं ततः पल्लवमुच्चरेत् ।
कालेश्वरी ततः पश्चात् सर्व्वं जनमनोहरी ॥
सर्व्वमुखस्तम्भनी च सर्व्वराजवशंकरी ।
सर्व्वदुष्टनिर्दलनी सर्व्वस्त्रीपुरुषाकर्षणी ॥

Colophon :—

इति श्रीकालरात्रिकल्पे पूजाविशेषः ।

Post Colophon :—

रघुनाथस्य सुतेन कमलाकरेण इदं पुस्तकं लिखितम् ॥

6064.

10046. *Kālarātrikalpa.*

Substance, foolscap paper. 8½ × 6½ inches. Folia, 18. Lines, 12–14 on a page. Extent in ślokas, 325. Character, modern Nāgara. Appearance, fresh. Complete in 13 chapters.

The portion contained in this MS up to chapter 12 runs up to Fol. 25A of the MS described under the previous number (6063).

6065.

10520. शिवाम्बुकल्पः । *Śivāmbukalpa.*

Substance, country-made paper 7 × 4 inches. Folia, 16. Lines, 8 on a page. Extent in ślokas, 200. Character, Nāgara. Appearance, fresh. Complete.

It deals with the Tantric use of urine as a drink which is stated to be able to drive away all sorts of diseases. A work of the same name said to belong to the *Rudrayāmala* is noticed in Stein. 236.

Beginning :—

श्रीगणेशाय नमः ॥

पार्व्वत्युवाच ।

देवदेवं प्रणम्यादौ सर्व्वज्ञं परमेश्वरं ।

प्रणम्य श्रोतुमिच्छामि शिवाम्बस्य च निर्णयम् ॥

श्रुत्वा देवमनुष्याणां पवित्रं सर्व्वसिद्धिदम् ।
शिवाम्बु कीदृशं चैव किं फलं तस्य सेवनात् ॥
देव-दानव-मर्त्याश्च किन्नरा यक्षराक्षसाः ।
पन्नगाश्च पिशाचाश्च विश्ववेतालजृम्भकाः ॥
हीनज्ञानाश्च ये केचित्तदर्थं कथयस्व मे ।
... ...

ईश्वर उवाच ।

... ...
शिवाम्बममृतं देवि उत्पन्नस्वात्मदेहिनां ।
पवित्रं परमं पुण्यं देहशुद्धिकरं परम् ॥

पार्व्वत्युवाच ।

ग्रहणं धारणं ग्रासं केन मन्त्रेण धारयेत् ।
तदहं परिपृच्छामि यदि तुष्टो महेश्वर ॥
शिवाम्बु कीदृशं चैव कीदृशं तस्य साधनम् ।
कृपां कुरु महादेव कथयस्व प्रसादतः ॥

ईश्वर उवाच ।

... ...
प्रातःकाले सुशिष्योऽयं घटिकायां चतुष्टयम् ।
उत्थाय साधकश्रेष्ठः मूत्रोत्सर्गं च कारयेत् ॥
आदिधारां परित्यज्य मध्यधारां तु ग्राहयेत् ।
अन्तधारां परित्यज्य एवं विधि समाचरेत् ॥
पात्रं पवित्रं वक्ष्यामि शृणु देवि मनोरमे ।
मृत्तिका-काष्ठपात्रेषु चर्म्मपात्रं तथैव च ॥
चीनीपात्रं श्रीफलं वा विल्वजं गजदन्तयोः ।
शवपात्रं कच्छपं वा विश्वामित्रं च मौक्तिकम् ॥

धृत्वा च मृण्मये पात्रे वटपात्रे च लावुकैः ।
वंशपात्रं च कर्त्तव्यं शृङ्गपात्रं तथैव च ॥
श्वेतकाचमयं पात्रं करपात्रं तथा पुनः ।
वर्ज्जयेत् सर्व्वधातूनां लोहपात्रं तु धारयेत् ॥
तेन मार्ज्जितपात्रेण अघोरास्त्रेण धारयेत् ।
तत्पात्रं मन्त्रशोध्यं च पवित्रा चोपकारयेत् ॥
तत्पात्रशोधनं देवि वक्ष्यामि तव सुन्दरि ।
प्रणवादि तथा माया कूर्च्चद्वन्द्वं कुलेश्वरि ॥
इति पात्रशोधनं च तवाग्रे कथितं मया ।
... ...

4B, इति सिद्धान्तकायाकल्पः ॥
भेषजं शृणु वक्ष्यामि शृणु चैकाग्रमानसः ।
गन्धकं त्रिफलायुक्तं भृङ्गराजं च पारदम् ॥
लोहचूर्णं तथा वङ्गं हरिद्रां च शिवाम्बुना ।
कर्त्तव्यं च सदा देवि तस्य रोगभयं कुतः ॥
गन्धकं पारदं सोमं त्रिफला सिद्धिमूलिका ।
राजबीजसमायुक्तं शिवाम्बुसहितं पिबेत् ॥

End :—

14B, यो गुरुरहितो पानं शिवाम्बु कुरुते नरः ।
मूत्रपानं कृतं तेन स नरो पापसम्भवान् ॥
नरके लभते वासः श्वानयोनिं तु प्राप्यते ।
सततं पिबति मूत्रं अमृतं विधिना विना ॥
... ...

Colophon :—

इति श्रीहरगौरीसंवादे शिवाम्बुकल्पः सम्पूर्णः ॥

6066.

8796. गायत्रीकल्पः । *Gāyatrīkalpa.*

Substance, country-made paper. 10 × 4½ inches. Folia, 2. Lines, 13 on a page. Extent in ślokas, 45. Character, Nāgara. Appearance, fresh. Complete.

The present MS has been noticed in L. I. 443. The work deals with the details of the worship of Gāyatrī and is in the form of an interlocution between Nārada and Caturmukha.

6067.

5604B. वनदुर्गाकल्पः । *Vanadurgākalpa.*

Substance, palm-leaf. 15 × 1½ inches. Folia, 42. Lines, 4, 5 on a page. Extent in ślokas, 503. Character, Uḍiyā. Appearance, good. Complete in 16 chapters.

It deals with the details of the worship of Vanadurgā. The colophon to the twelfth chapter allocates the work to the *Mantravarasaṃhitā.*

Beginning :—

श्रीदुर्गाय नमः ।

हिमवच्छिखरे रम्ये नानारत्नसमाकुले ।
नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ॥
नानापक्षिनिनादैश्च नानामृगगणाकुले ।
... ...
... ...
आसीनमासने रम्ये देवदानवपूजिते ।
... ...

कृपया परया युक्तं षण्मुखं द्वादशेक्षणम् ।
प्रणम्य दण्डवद् भूमौ पप्रच्छेदं मुनिस्तदा ॥

अगस्त्य उवाच ।

किं रूपं वनदुर्गाया कान्यङ्गानि विशेषतः ।
उद्धारः कीदृशः प्रोक्तो विनियोगश्च कीदृशः ॥
किं बीजं का पुनः शक्तिः वर्णानाञ्च विशेषतः ।
एतत् सर्वं विस्तरेण ब्रूहि मे दैत्यसूदन ॥

गुह उवाच ।

साधु पृष्टं त्वया ब्रह्मन् साधकानां हितैषिणा ।
पुरा हिमवतः पृष्ठे हैमवत्या मया श्रुतम् ॥
सर्व्वशत्रुक्षयकरं सर्व्वव्याधिनिवारणम् ।
ज्ञातमात्रेण सर्व्वेषां भुक्तिमुक्तिफलप्रदम् ॥
अतिगुह्यतमं वक्ष्ये समाहितमनाः शृणु ।
सुमनोज्ञप्रदेशे च निम्नोन्नतविवर्ज्जिते ॥

... ...

... ...

द्वादशारं लिखेच्चक्रं वसुभू च(?) समावृतम् ।
तन्मध्ये चण्डिका कार्य्या तालमात्रप्रमाणिका ॥
सप्ताङ्गुलप्रमाणेन भ्रामयेत् पंक्तिकं प्रति ।
सशूलमरुणाग्रं स्यात् रक्तेनैव च धातुना ॥
दलं वै श्वेतवर्णेन चक्रमालिख्य देशिकः ।
कृष्णवर्णेन मतिमान् अक्षराणि न्यसेत्सने ॥
दलेष्वक्षरमालिख्य मन्त्रोद्धारपरिक्रमात् ।
तारं वै कर्णिकायान्तु तस्मिन् शक्त्यक्षरं लिखेत् ॥
एवमालिख्य मतिमान् शिष्याय प्रददौ गुरुः ।
• उकारं प्रागदले मूले मकारस्तु द्वितीयके ॥

क्यश्च ह्राश्च दंकारश्च प्रसु ऐ माः तथैव च ।
दुं स्मूलां च तथैवास्ते प्रथमे तु दलं न्यसेत् ॥
भिमगश्चैव तथैव स्यात् उया न्यश्च तथैव च ।
परदुर्गे लिचेत्येव ठद्वितीयं दलं लिखेत् ॥

Colophons of the different chapters :—

7A, इति श्रीगुह्यप्रोक्ते श्रीवनदुर्गाकल्पे प्रथमः पटलः; 9A, ०द्वितीयः पटलः; 10A, ०मण्डलाधानं नाम तृतीयः पटलः; 13B, ०चतुर्थः पटलः; 16A, ०पञ्चमः पटलः; 22A, ०षष्ठः पटलः; 24A, ०सप्तमः पटलः; 27B, ०अष्टमः पटलः; 30A, ०दशमः पटलः; 31B, ०एकादशः पटलः; 32B, इति श्रीमन्त्रवरसंहितायां गुह्यप्रोक्ते वनदुर्गाकल्पे द्वादशः पटलः; 35A, ०त्रयोदशः पटलः; 37B, ०चतुर्द्दशः पटलः; 38B, ०पञ्चदशः कल्पः; 42A, ०षोडशः पटलः ॥

6068.

10254. संवित्कल्पः । *Samvitkalpa.*

Substance, country-made paper. 6¼ 3¼ inches Folia, 8. Lines, 4-7 on a page. Extent in ślokas, 60. Character, Nāgara. Appearance, soiled. Incomplete at the end.

The name of the work occurs on the obverse of the first leaf. The work deals with the origin and Tāntrika use of hemp.

Beginning :—

कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
प्रणम्य परया भक्त्या पार्व्वती पर्यपृच्छत ॥

श्रीपार्व्वत्युवाच ।

सर्व्वौषधमयं (मै)शंभो या परा सिद्धमूलिका ।
गुह्याद्गुह्यतरो देव कथिता न प्रकाशिता ॥

उत्पत्तिकारणं देव साधनं शोधनं तथा ।
यदि ते हि प्रियतमा वद सर्व्वामरप्रभो ॥

... ...

4A, त्रिकटुत्रिफलायुक्ता खादेत् क्षयविनाशिनी ।
संठीमार्कवनिर्गुंडी कुमारीसहिता प्रिये ॥

6069.

10147. कनककल्पः । *Kanakakalpa.*

Substance, country-made paper. 11 × 6 inches. Folium, 1. Lines, 13 and 12. Extent in Ślokas, 25. Character, modern Nāgara. Appearance, discoloured. Complete.

It deals with the black rites of the Tantras.

Beginning :—

ॐ नमस्तस्मै । अथ कनककल्पः । ॐ नमः शिवाय ॥

कनककल्पं प्रवक्ष्यामि महादेवेन भाषितम् ।
मनुष्याणां हितार्थाय सर्व्वकामफलप्रदम् ॥
शान्तिकं पौष्टिकं चैव वश्यं चापि जने तथा ।
मोहनाकर्षणे चैव स्तम्भनेषु विशेषतः ॥

... ...

कनकस्य तु बीजानि हरितालं मनःशिलं ।
तैलेन सह चूर्णस्य स्त्रीणां मूर्द्धि [तु] दापयेत् ॥

Colophons :—

Fol. 1B, इति कनककल्पस्य तु योगः, इति सर्व्वोचाटनं यन्त्रं, इति रूपाकर्षणविधि । इति समाप्ता ।

The last topic in the work is dealt with in Hindi.

6070.

8378B. आसुरीकल्पः । *Āsurīkalpa.*

Substance, country-made paper. 5 × 3½ inches. Folia, 8. Lines, 11 on a page. Extent in ślokas, 80. Character, Nāgara. Date, V.S. 1749. Appearance, old and discoloured. Complete.

The work deals with the black rites of the Tantras to be performed with the mantras of a deity called Āsurī the worship of whom is also dealt with in the *Aṅgirā-kalpa* (No. 6061).

Beginning :—

श्रीगणेशाय नमः ॥

अथ आसुरीकल्पो लिख्यते ॥

या शक्तिर्नवकोटिभेदभुवने भ्रान्तिभ्रमा भैरवी
या शक्तिर्नवचक्रमूलकमला आधारगर्भस्थिता ।
या शक्तिर्नवपीठमध्यकमले युक्ता करङ्कस्थिता
सा शक्तिर्नवखण्डमण्डितकला पायात् सदा दासुरी (?) ॥

माहेश्वराङ्गना पार्श्वे पार्व्वती दुःखपीडिता ।
कृपया सुप्रसादेन क्षयं यान्ति च शत्रवः ॥
निर्धनो धनमाप्नोति राज्ञां संमानमेव च ।
इत्येवं पार्व्वती पृष्टं पृच्छा देवि परंपरा ॥
न तिथिर्न च नक्षत्रं नोपवासो विधीयते ।
हन्तिकामस्य शत्रूणां क्रोध एवात्र कारणं ॥
ख्यातं मयासुरीकल्पं पुरा शुम्भनिशुम्भयोः ।
तेनैव विधिना कार्य्यं सिद्धिर्भवति निश्चितं ॥

Colophon :—

इति आसुरीकल्पमन्त्रराजसिद्धिः समाप्ता ।

Post Colophon :—

संवत् १७४९ वर्षे चैत्र कृष्ण अष्टमी रवौ लिखितं श्रीमाल-
जातीय त्र० गोपालगणेशसुतेन आत्मार्थं परोपकारार्थं शुभमस्तु ॥

6071.

5883. *Asurīkalpa.*

Substance, country-made paper. 10 × 6¼ inches. Folia, 13. Lines, 18, 19 on a page. Extent in ślokas, 220. Character, modern **Nāgara.** Appearance, fresh. Complete.

This contains a collection of extracts from different works dealing with the black rites of the Tantras to be performed with the mantras of Āsurī.

Beginnings and Colophons of the extracts :—

I. अथासुरीविधानमथर्व्वविद्योक्तम्
उच्चाटनं स्तम्भमोहौ वशीकरणमेव च
जारणं मारणं चैव षट्धा प्रोक्तं महर्षिभिः ॥
तत्र विधानक्रमः

4B. इत्यासुरीविधानम् ।

II. श्रीगणेशाय नमः ॥ अथ द्वितीय आसुरीकल्पः ॥ ग्रन्थान्तरात् लिख्यते ।

न तिथिर्न च नक्षत्रं नोपवासो विधीयते
हन्ति कार्य्याणि शत्रूणां साधनं तस्य साधनम् ॥

अथ राजानं वशीकर्त्तुकामः ।

आसुर्य्याः सूपिष्टायाः प्रतिकृतिं कृत्वा । आसुरीसमिद्भिरग्नि प्रज्वाल्य दक्षिणपादादारभ्य शस्त्रेण छित्वा घृताक्तां जुहुयात्

The portion beginning with अथ राजानं generally agrees with a similar portion in the MS described under No. 6070 (Fol. 4A) above.

6B. इति आसुरीकल्पः समाप्तः ॥

III. श्रीगणेशाय नमः

पुनर्वसुनक्षत्रे वटवृक्षस्य वंदकं गृहीत्वा
गोक्षीरेण सह पिबेत् । बन्ध्या पुत्रं जनयति ।

7B. इति वंदगिकाकल्पः ।

IV. अथासुरीकल्पं वक्ष्यामि ।

कार्त्तिकेय उवाच ।

कैलासशिखरासीनं देवदेवं सदाशिवम् ।
स्कन्दः पृच्छति तत्कर्म + + + वद मे प्रभो ॥

वश्याकर्षण विद्वेष उच्चाटस्तम्भमारणं ।
त्रैलोक्ये तु नरानीणां निग्रहाय सुखाय च ॥

ब्राह्मणक्षत्रियो वैश्य शूद्रश्चैवांत्यजातयः ।
साधयत्याशु तत् ब्रूहि कृपया वद मे प्रभो ॥

ईश्वर उवाच ।

शृणु वत्स महामन्त्रमासुरी विधिपूर्व्वकम् ।
देहन्यास-करन्यास-अङ्गन्यास-समन्वितम् ॥

12B. इति आसुरीकल्पं सम्पूर्णम् ।

There are 11 lines on Fol. 13 dealing with *vaśīkaraṇa*. This section begins :—

प्रातर्मुखं तु प्रक्षाल्य सप्तवाराभिमन्त्रितम् ।
यस्य नाम्ना पिबेत्तोयं सा स्त्री च वशगा भवेत् ॥

6072.

10341. लघ्वासुरीकल्पः । *Laghvāsurīkalpa.*

Substance, country-made paper. 7 × 3 inches. Folia, 5. Lines, 10 to 12 on a page. Extent in ślokas, 96. Character, Nāgara. Date, Samvat 1892. Appearance, fresh. Complete.

The contents of the present MS, except the last verse, agree with section IV of the MS described under the previous number.

Colophon :—

इति श्रीस्कन्दशङ्करसंवादे लघ्वासुरीकल्पः समाप्तः ।

Post Colophon Statement :—

लिखितमिदं गावल्यपाख्य-जयराम-पण्डितेन संवत् १८९२ मितौ फाल्गुन शुद्ध १५ गुरौ ।

6073.

3322. कक्षपुटतन्त्रम् । *Kakṣapuṭatantram.*

Substance, country-made paper. 12½ × 5 inches. Folia, 47. Lines, 11 on a page. Extent in ślokas, 2,000. Character, Nāgara. Date, Samvat 1849. Appearance, discoloured. Complete in 15 Paṭalas.

The work, in 20 chapters, has been published in the *Aruṇodaya* and in the *Indrajālādisaṃgraha* under the name *Siddhanāgārjunakakṣapuṭa* and also, in 31 chapters, by the Basumati Press (Calcutta, 1339 B.S.). MSS of the work are described in L. I, 256; IO. IV, 2616; W. 904. It deals with various Tantra rites pertaining to sorcery. MSS of a work called *Bhuvaneśvarī-kakṣapuṭa* which may

be a similar work are noticed in *A Catalogue of Sanskrit MSS in the Adyar Library* (Pt. II, p. 194) and in Mad. XII. 5924.

Post Colophon :—

संवत् १८४९ माघकृष्णादशम्यां + + + शुभम् + + ।

6074.

5533. *Kakṣapuṭatantram.*

Substance, country-made paper. 10 × 4½ inches. Folia, 53. Lines, 14 on a page. Extent in ślokas, 3,000. Character, Nāgara. Appearance, discoloured. Complete in 20 Paṭalas.

The sources of the work and the topics dealt with in it are indicated as follows (Fol. 1) :—

संसारे बहुविस्तीर्णा विद्यासिद्धिरनेकधा ।
प्रोक्तवान् शङ्करः पूर्व्वं यदि पृच्छति पार्व्वती ॥
अन्यैर्देवगणैः सिद्धैर्मुनिदेशिकसाधकैः ।
यद्यदुक्तं हि शास्त्रेषु तत्तत् सर्व्वं विलोकितं ॥
शाम्भवे यामले शाक्ते मौले कौलेय-डामरे ।
स्वच्छन्दे नाकुले शैवे राजतन्त्रे महेश्वरे ॥
उड्डीशे वातुले तन्त्रे उच्छिष्टे सिद्धशाबरे ।
किङ्किणीमेरुतन्त्रे च कालचण्डीश्वरे मते ॥
साकिनीडाकिनीतन्त्रे रौद्रेऽनुग्रहनिग्रहे ।
कौतुके शिल्पतन्त्रे च क्रियाकालगुणोत्तरे ॥
हरमेखलके ग्रन्थे इन्द्रजाले रसार्णवे ।
आथर्व्वणे महादेवे चार्व्वाके गारुडेऽपि च ॥
इत्येवमागमोक्तं च वक्त्राद्वक्त्रेण यच्छ्रुतं ।
तत्तत्सर्व्वं समुद्धृत्य दध्नो घृतमिवादरात् ॥

साधकानां हितार्थाय मन्त्रखण्डमिहोच्यते ।
वश्यं चाकर्षणं स्तम्भं मोहमुच्चाटमारणं ॥
विद्वेषं व्याधिकरणं पशुमस्यार्थनाशनं ।
कौतुकं चेन्द्रजालञ्च यक्षिणीमन्त्रसाधनं ॥
चेटकं चाञ्जनं दिव्यमदृश्यं पादुकागतिः ।
गुटिका खेचरत्वं च मृतसंजीवनादिकं ॥
तथा कक्षपुटीसिद्धिः साङ्गोपाङ्गमनेकधा ।
सुसाध्यं प्रत्ययोपेतं साधकानां हितं प्रियं ॥
तत्तन्मन्त्रमुखं ज्ञात्वा कर्त्तव्यं सिद्धिमिच्छता ।
मन्त्रसाधनकं पूर्व्वं सिद्ध्यर्थं साधकोत्तमैः ॥

6075.

8470. *Kakṣapuṭatantram.*

Substance, country-made paper. 9¾ × 4 inches. Folia, 87. Lines, 7 on a page. Extent in ślokas, 1,050. Character, Nāgara. Appearance, discoloured. Incomplete.

The 19th chapter comes to an end in Fol. 80A. The remaining folia do not contain any colophon.

6076.

9275. *Kakṣapuṭatantram.*

Substance, country-made paper. 12 × 5 inches. Folia, 1-3. Lines, 11 on a page. Extent in ślokas, 75. Character, Nāgara. Appearance, tolerable. Incomplete.

It begins as follows from the middle of one of the verses indicating the sources of the work.

तेश्वरे उड्डीशे वातुले तन्त्रे उच्छिष्ट सिद्धशाम्भवे। किङ्गणे मेरुतन्त्रे च कालचण्डेश्वरे मते।

6077.

9297. *Kakṣapuṭatantram.*

Substance, country-made paper. 13 × 5 inches. Folia, 18. Lines, 13 on a page. Extent in ślokas, 180. Character, Nāgara. Appearance, tolerable. Incomplete.

This MS contains the first seven Paṭalas and a portion of the eighth.

6078.

9928. *Kakṣapuṭatantram.*

Substance, country made paper. 9 × 5 inches. Folia, 2–15. Lines, 7 on a page. Extent in ślokas, 140. Character, Nāgara. Date, Samvat 1882. Appearance, tolerable. Incomplete.

The only colophon in the MS is found on Fol. 10A. This refers to the 10th chapter of the work.

Post Colophon :—

मासोत्तममासे श्रावणमासे शुभे शुक्ले पक्षे द्वितीयायां भौमवासरे उड्डीशपुस्तकं जगन्नाथमिश्रेण लिख्यते।

संवत् १८८२ शाके १७४७ समाप्तः। भैरवाय नमः। रामचन्द्राय नमः।

6079.

3187. दत्तात्रेयतन्त्रम्। *Dattātreyatantram.*

Substance, machine made modern paper. 12½ × 4¾ inches. Folia, 23. Lines, 9, 10 on a page. Extent in ślokas, 690. Character, Bengali. Appearance, fresh. Complete in 20 chapters.

A MS of the work, complete in 22 chapters, has been described in L. V, 1850, the opening verse of which is not found in the present MS. The work deals with Tantra rites pertaining to sorcery. It has been published in 30 chapters in the *Indrajālādisaṃgraha* of R. Chatterji. An edition of it in 26 chapters was published with Bengali translation (Vangabhumi Karyalaya, Calcutta, B.S. 1309).

6080.

3465. *Dattātreyatantram.*

Substance, country-made paper. 12¼ × 4½ inches. Folia, 8. Lines, 10 on a page. Extent in ślokas, 240. Character, Nāgara. Appearance, discoloured. Incomplete.

The present MS contains the first 10 chapters and a portion of the 11th.

6081.

5569. *Dattātreyatantram.*

Substance, country-made paper. 11 × 5 inches. Folia, 23. Lines, 11 on a page. Extent in ślokas, 500. Character, Nāgara. Date, Saṃvat 1923. Appearance, fresh. Complete in 25 chapters.

Post Colophon Statement :—

श्रीसंवत् १९२३ वैशाख कृष्ण तिथौ ३ भौमे विद्याधरद्विवेदेन
लिखितं काश्यां स्वार्थं परार्थञ्च ।

6082.

9394. *Dattātreyatantram.*

Substance, country-made paper. 13 × 5 inches. Folia, 18. Lines, 9 on a page. Extent in ślokas, 510. Character, Nāgara. Date, Saṃvat 193(?). Appearance, fresh. Complete in 22 chapters.

Post Colophon Statement :—

संवत् १९३ चैत्र सुल ।

6083.

10449. *Dattātreyatantram.*

Substance, country-made paper. 9 × 4¾ inches. Folia, 27. Lines, 10 on a page. Extent in ślokas, 530. Character, Nāgara. Date, Saṃvat 1915. Appearance, fresh. Complete in 21 chapters.

Post Colophon Statement :—

संवत् १९१५ मार्गमासि कृष्णपक्षे तिथौ द्वितीयायां भौमवासरान्वितायाञ्च लिखितमिदं पुस्तकं श्रीमज्ज्ञानन्द-त्रिवेदिना ॥

6084.

1971. साङ्ख्यायनतन्त्रम् । *Sāṅkhyāyanatantram.*

Substance, country-made paper. 9½ × 5 inches. Folia, 29. Lines, 15, 18 on a page. Extent in ślokas, 1,250. Character, Nāgara. Date, Saṃvat 1855; Śaka 1720. Appearance, fresh. Complete in 34 chapters.

MSS of the work, complete in 34 chapters, have been described in L. VI, 2259 and I.O., IV, 2537. A portion of the work has also been noticed in Mad. XII. 5924. It deals with the details of the worship of Vagalāmukhī. According to the colophons the work belongs to the Ṣaḍvidyāgama.

Post Colophon Statement :—

संवत् १८५५ शाके १७२० मिति आश्विन शुक्ल चतुर्थी मन्दवासरे । समाप्तमिदं सांख्यायनतन्त्रम् ।

6085.

8487. *Sāṅkhyāyanatantram.*

Substance, country-made paper. 13½ × 6 inches. Folia, 38. Lines, 9 on a page. Extent in ślokas, 825. Character, Nāgara. Appearance, old and discoloured. Incomplete at the end.

The present MS runs up to the end of the 29th chapter.

6086.

10484. *Sāṅkhyāyanatantram.*

Substance, country-made paper. 11 × 5 inches. Folia, 43. Lines, 11 on a page. Extent in ślokas, 1,100 Character, Nāgara. Date, Samvat 1963. Appearance, fresh. Complete in 34 chapters.

Post Colophon Statement :—

श्रीः पीतायै नमः ॥

पीतपद्ममासीनां माध्वीकोन्मत्तमानसां ।

पीतनि + फलकुचां स्मरामि वगलामुखीं ॥

श्रीः पीतवर्णायै नमः ॥

समत १९६३ आ० शु० ६ शुक्र ।

6087.

8379. *Sāṅkhyāyanatantram.*

Substance, country-made paper. 9½ × 6 inches. Folia, 39–50. Lines, 14 on a page. Extent in ślokas, 260. Character, Nāgara. Date, Samvat 1954. Appearance, old and discoloured. Incomplete.

The present MS contains Paṭalas XXX–XXXVIII of which only the last chapter is not found in the previous MS, the last chapter of which agrees generally with chapter 37 of the present MS.

Post Colophon :—

संवत् १९५४ वार गुरु लिखतं श्रीरामदत्तमीसर शुभमस्तु श्रीशिवाय नमः। लिखावितमिदं पुस्तकं मालवीय गयघाट वगला-मुखी शरण सदा होते हो।

6088.

10372. विनायकसंहिता। *Vināyakasaṃhitā.*

Substance, modern paper. 12 4½ inches. Folia, 12. Lines, 8 on a page. Extent in Ślokas, 204. Character, modern Nāgara. Appearance, fresh. Complete in eight chapters.

It deals with the black rites of the Tantras to be performed with the mantras of Gaṇeśa.

Beginning :—

श्रीगणेशाय नमः।

कैलासशिखरासीनं देवदेवं महेश्वरम्।
प्रणम्य परया भक्त्या भार्गवो वाक्यमब्रवीत्॥
भगवन् देवदेवेश सर्व्वलोकहिते रत।
ततः श्रुता मया सप्तकोटिभेदा मनूत्तमाः॥
वैनायकाभिधा मन्त्रा भोगमोक्षफलप्रदाः।
तेषामयत्नफलदं हरिराख्य(?) मनुत्तमम्॥
वैनायकाभिधं मन्त्रं वक्तुमर्हसि शङ्कर।
हितेश सर्व्वभूतेशु सर्व्वकामार्थसिद्धये॥

ईश्वर उवाच।

साधु पृष्टं त्वयेदानीं सर्व्वलोकहितावहं।
सर्व्वेषामेव मन्त्राणां प्रयत्नफलसिद्धिदम्॥
अमोघं सर्व्वकार्य्येषु स्तम्भनादिषु सर्व्वतः।
सर्व्वमन्त्रकरं गुह्यं सर्व्वकामफलप्रदम्॥
... ...

2A, अन्येषां जीवसंघानां स्तम्भनकारकम् ।
रिपुविद्वेषणकरं विश्लेषश्लिष्टयोस्तथा ॥
उच्चाटनकरं तेषां उन्मादमरणं तथा ।
तत्तत्कर्म्मोक्तमन्त्राणां भेदानि विविधानि च ॥
प्रयोगाणि च सर्व्वाणि प्टण संक्षेपतो मुने ॥

Colophons of the different chapters :—

Fol. 2A, इति वैनायकसंहितायां प्रथमः पटलः ॥ 3A, इति विनायकसंहितायां द्वितीयः पटलः; 4B, ०स्तम्भनयन्त्रं नाम तृतीयः पटलः; 6A, ०आकर्षणबीज चतुर्थः पटलः; 9A, ०वशीकरण नाम पञ्चमपटलः; 10A, ०उच्चाटनं नाम षष्ठः पटलः; 11A, ०विद्वेषणं नाम सप्तमपटलः; 12B, ०मारणं नाम अष्टमपटलः ॥

Post Colophon Statement :—

लिखित मथवा परीगणोह्न वेली ताल्लुके गौवपुरदः गौवसंकरलाल कायथ ॥

6089.

10327. भद्रतन्त्रम् । *Bhadratantram.*

Substance, country-made paper. 10¾ × 4½ inches. Folia, 8 by counting (marked 1–3, 5, 6, 8, 11, and 15). Lines, 11 on a page. Extent in ślokas, 200. Character, modern Nāgarī. Appearance, fresh. Incomplete.

This contains mantras and directions in Hindi and Sanskrit for the black rites, *māraṇa*, *uccāṭana*, etc.

The name of the work is found in a colophon in Fol. 8 :—

इति श्रीदेवीशिवसंवादे तन्त्रमंत्रोक । इति भद्रतन्त्रं सम्पूर्णम् ॥

6090.

10389. कालरुद्रतन्त्रम् । *Kālarudratantram.*

Substance, country-made paper. 9×4 inches. Folia, 44. Lines, 9 on a page. Extent in ślokas, 880. Character, Nāgara. Appearance, old and worm-eaten. Complete in 21 chapters.

The work is in the form of a dialogue between Kārttikeya and Śiva. It deals with the black rites of the Tantras to be performed with the mantras of deities like Dhūmāvatī (ch. 1–9, Fol. 1–20), Ārdrapaṭī (ch. 9–12, Fol. 20–27), Kālī (ch. 15, Fol. 30A–32A), and Kālarātri (ch. 16, Fol. 32A–34B) who is stated to be the spouse of Kālarudra.

Beginning :—

श्रीगणेशाय नमः ॥

उद्दामद्युतिमद्युतिप्रतिभटप्रारब्धकूलंकषा
यत्तेर्ष्विस्त्वसरेणवो जगदरध्वान्तं सदा कुर्व्वता ।
या पद्मापरिरम्भ-सम्भ्रमभरव्यग्रैकदोर्व्वल्लरी
पायाद्वो महखेचरी पुरमहोग्रश्रीन्दकण्ठोरवः ॥

सर्व्वविघ्नप्रशमनं सर्व्वसिद्धिकरं परं ।
सर्व्वजीवप्रणेतारं वन्दे विजयदं हरिं ॥
श्रीकरं शङ्करावासं सिद्धचारणसेवितम् ।
हृदा मुनिजनावासं सायुज्यपदमव्ययम् ॥

... ...

... ...

अच्छिन्नभक्तसंसेव्यमहो कैलासमन्दिरम् ।
तत्र तातं महारुद्रं कुमारः स्वादरात्ततः ॥
उवाच परमं वाक्यं नत्वा भक्त्या समादरात् ।
चतुर्द्दश महाविद्यास्चन्द्रचूड त्वदाज्ञया ॥

अभ्यस्तोऽहमहं सम्यग्विधिना पार्व्वतीप ।
प्रयोगविद्याविपुलं शत्रुसंहारकारकं ॥
गोप्तवान् मम सर्व्वेश किमर्थं करुणाकर ।
पुत्रोस्मि तव शिष्योस्मि ब्रह्मचारी जितेन्द्रियः ॥
... ...

1B, ईश्वर उवाच ॥

साधु साधु महाप्राज्ञ क्रौञ्चभेदनकोविद ।
गोपनीयं प्रयत्नेन अस्त्रविद्या कदाचन ॥
देवतार्थं द्विजार्थं च यज्ञार्थं यमिरक्षणे ।
पतिव्रताया गोश्चैव रक्षणेन न दोषभाक् ॥
... ...
तूर्य्यमाथर्व्वणं वेदं नानामन्त्रसमन्वितम् ।
तन्मध्ये केवलं तूर्य्यमथर्व्वणाशिरस्तथा ॥
तूर्य्यात्तूर्य्यतरं चैव तत्सखेत्यभिधीयते ।
अथर्व्वणी शिखा विद्या यो जानाति स बुद्धिमान् ॥
... ...
... ...

2A, आदौ धूमावतीं विद्यां वक्ष्येऽहं क्रौञ्चभेदन ।
मन्त्रोद्धारं मन्त्रविधिं पूजाजपपुरःसरम् ॥
पुरश्चर्य्याप्रयोगं च पटला म+ +रस्तथा ।
धूमावतीमनोर्मध्ये विद्याधूमावतीस्तथा ॥

End :—

मन्त्रसिद्धिमवाप्नोति नात्र कार्य्या विचारणा ।
पुनः प्रयोगसमये वक्ष्ये तत् साधनक्रियः ॥
द्रव्यार्थी च जपेत् पुत्र विल्वमूले निशायुतम् ।
अयत्नाद् भाग्यमाप्नोति सुतार्थी लभते सुतम् ॥

According to the colophons the work belongs to the Kālikāgama and every chapter is styled *Atharvaṇāstravidyā* (अथर्वणास्त्रविद्यां नाम)।

6091.

8355. दिव्यशावरतन्त्रम् । *Divyaśābaratantram.*

Substance, country-made paper. 10×5½ inches. Folia, 41. Lines, 11 on a page. Extent in ślokas, 5,880. Character, modern Nāgara. Appearance, fresh. Complete in 14 chapters.

The work, under the name Śābara, was published in 18 Pīṭhas by R. Chatterji in his *Aruṇodaya* and in the *Indrajālādisaṃgraha*. The present MS runs up to the end of the 14th chapter.

The name Divyasābara occurs in the colophons of chapters XI and XIV while the colophon of chapter XIII calls it *Siddhaśābara*.

Beginning :—

श्रीगणेशाय नमः ।

श्रीशिवशङ्कर उवाच ।

आदिनाथो ह्यनादिश्च कालश्चैवातिकालकः
करालो विकरालश्च महाकालश्च सप्तमः ॥
कालभैरवनाथश्च वटुकस्तदनन्तरं ।
भूतनाथो वीरनाथः श्रीकण्ठो द्वादशो मतः ॥ २ ॥
एते कापालिकाः प्रोक्ताः वीरतुम्बीमहाफलैः ।
शिष्याणां सूर्य्यसंख्या च तानहो वच्मि संप्रतं ॥ ३ ॥
नागार्ज्जुनो जडभरतो हरिश्चन्द्रस्तृतीयकः ।
सत्यनाथो भीमनाथो गोरक्षश्चर्पटस्तथा ॥
अवघटश्चैव वैराग्यः कंथाधारी जलंधरी ।
मार्गप्रवर्त्तका ह्येते तद्वच्च मलयार्ज्जुनः ॥
एतदुक्तं शावराणां मन्त्राणां सिद्धिदायकाः ।
महादेवो विरूपाक्षः शाश्वतश्च निरञ्जनः ॥
तच्छावरान् प्रवक्ष्यामि यथावदवधारय ।

ॐ आदेश गुरुको महाचीनदेश महोग्रतारादेवी तहा वसै चोलसर तहा बैठे अक्षोभ्यनाग त्रिजटा शिवके माके माथे तारा वसे भक्तके साथे ।

Colophons of the different chapters :—

5A, इति श्रीगोरक्षसिद्धिहरणे दत्तात्रेयसिद्धिसोपाने भाषाविधिः ; 9A, तृतीयं यानं ; 11A, ०चतुर्थीपीठः ; 13A, ०डाकिनीसमानं नाम पञ्चमं सोपानं ; 19A, ०लवंगाभैरवकथनं नाम षष्ठं सोपानं ; 21A, ०सर्पवृश्चिकविषहरणं नाम सप्तमं सोपानं ; 23B, ०अष्टमः पटलः ; 25A, ०विषहरणगारुडं नाम नवमः पटलः ; 26B, ०दशमः पटलः ; 28B, इति श्रीदिव्यशाबरे गोरक्षसिद्धिहरणे दत्तात्रेयसिद्धिसोपाने नाम एकादशपटलः ; 33A, इति श्रीसिद्धशाबरे० त्रयोदशमं पीठं ; 34A, इति श्रीदिव्यशाबरे ०चतुर्दशतमं पीठं ; 36A, इति श्रीगोरक्षसिद्धिसोपाने चतुर्दशपीठं समाप्तः ॥

Two stray leaves at the end of the MS contain a portion from the beginning of the Tantra.

6092.

9460. *Divyaśābaratantram.*

Substance, country-made paper. 10 × 4 inches. Folia, 2–28. Lines, 9 on a page. Extent in ślokas, 550. Character, Nāgara. Appearance, tolerable. Incomplete.

The present MS runs up to the end of the 8th chapter.

6093.

10486. *Divyaśābaratantram.*

Substance, foolscap paper. 8½ × 7 inches. Folia, 10. Lines, 25 on a page. Extent in ślokas, 550. Character, modern Nāgara. Appearance, fresh. Incomplete.

On the obverse of the first leaf it is called Kālīśābara.

The present MS runs up to the end of the 8th chapter.

6094.

10485A. *Divyaśābaratantram.*

Substance, foolscap paper (bound in book-form). $8\frac{1}{2} \times 6\frac{1}{2}$ inches. Folia, 10 (by counting). Lines, 13 on a page. Character, modern Nāgara. Appearance, fresh. Incomplete.

This contains chapters 9–15 of the work which agree with chapters 9–14 in the MS described under 6091 above. Here also some of the colophons (e.g., those to chapters 12 and 14) refer to the work as *Divyaśābara* while the colophon to chapter 13 calls it *Siddhaśābara.*

6095.

8355B. कालीशाबरम् । *Kālīśābaram.*

Substance, country-made paper. $10 \times 5\frac{1}{4}$ inches. Folia, 36–40. Lines, 11 on a page. Extent in ślokas, 93. Character, Nāgara. Appearance, fresh. Complete in three chapters.

Beginning :—

श्रीगणेशाय नमः ॥

ॐ स्वस्ति श्रीदेव्युवाच ।

सर्व्वेषां शाबराणां च साधनं वद शङ्कर ।

शिव उवाच ।

शृणु पार्व्वति वक्ष्यामि सिद्धशाबरसाधनं ।
षट्पञ्चाशन्महादेशाः कादिक्षादिक्रमाद् द्विधा ॥
षट्त्रिंशज्जातिभेदैश्च प्रत्येकं भेदभाजितैः ।
अनन्तसंख्यं देवेशि तत्रापि द्विविधं शिवे ॥
नाथोक्तं शङ्करप्रोक्तं नाथोक्तं देशभेदतः ।
शिवोक्तं रूपभेदेन तत्र नाथाभिधे शिवे ॥

चतुरशीतिसिद्धोक्तं शाम्भवं द्विविधं मतं ।
तन्नामानि प्रवक्ष्यामि शृणु सावहितं भव ॥
शाम्भवं प्रथमं देवि द्वितीयं सिद्धशाम्भवं ।
कुमारीशाम्भवं देवि विजयाशाम्भवं तथा ॥
कालिकाशाम्भवं चैव षष्ठं च कालशाम्भवं ।
दिव्यशाम्भवनामानि अष्टमं वीरशाम्भवं ॥
श्रीनाथशाम्भवं देवि योगिनीशाम्भवं तथा ।
तारिणीशाम्भवं देवि द्वादशं शम्भुशाम्भवं ॥
सूर्य्यसंख्याशाम्भवे तु साधना समरूपिणी
अघोरशाम्भवं देवि भिन्नमेव त्रयोदश ॥
अघोरेपि समा देवि तानहं वच्मि संशृणु ।
विड घोरे भवेद्वघो षामरी मूत्रयोगतः ॥
पशुयोगे तु परमी द्वितीया सुरभी मता
वटुके श्रीकरी ज्ञेया महाफलिशिवंधरी ।
शुक्रे तु सुन्दरारम्भा रक्ते कैवल्यचेतना ॥
रक्ताघोरस्तु प्रथमः शुक्राघोरो द्वितीयकः ।
विरामूत्रा घोरकौ देवि प्रत्येकं द्विविधौ शिवे ॥
पशोः स्वस्य परस्याथ प्रत्येकं च त्रिधा क्रमात् ।
वटुकीरे कुक्कुरस्य शिवायाः कालगोचरः ॥
गोजन्यस्ताशिणीमन्त्रे काल्यां तु शुक्ररक्तजः ।
भक्ष्याघोरः पञ्चमः स्याद्वात्यघोरस्ततस्ततः ॥
चीनाघोरस्तथानीलघोरोपि परमेश्वरी ।
नवमः सर्व्वभक्ष्याख्यो घोराघोरो हि दुर्लभः ॥
सिद्धाघोरस्तथा प्रोक्तः सर्व्वाघोरस्ततस्ततः ।
तथैव गारुडं देवि दशधा परिकीर्त्तितं ॥
श्रीवेदगारुडं देवि गारुडं वीरगारुडं ।
श्रीकृष्णगारुडं देवि तदन्ते मन्त्रगारुडं ।
यन्त्रगारुडकं देवि तदन्त सिद्धिगारुडं ॥

श्रीनाथगारुडं देवि चाघोरगारुडं तथा ।
दशमं शाबरं नाम गारुडं दशधा मतं ॥
दशधा गारुडे देवि साधना सावरो कृता ।
पूर्व्वाम्नाये वीरशैवास्तदंते वीरवैष्णवाः ॥
पिशाचोच्छिष्टगणपाः पश्चिमे परिकीर्त्तिताः ।
उत्तरे घोरभेदाश्च ऊर्द्धे शाबरजातयः ।
पाताले च पाशुपतास्तथा कापालिकाः शिव ॥
शाबरा गनाभाख्यो मह्याम्नाय प्रकीर्त्तिताः ।
इति संक्षेपतः प्रोक्तं प्रदगाश्च कालशाबरं ।
मुग्या होमयेद्देवि सर्व्वशाबरसिद्धये ॥
कुमारीशाबरे देवि डाकिन्या होममाचरेत् ।
योगिनीशाबरे देवि विजयाबीजमीरितं ॥
श्रीनाथशाबरे देवि विजयापत्रमेव च ।
विजयाबीजहोमेन सर्व्वशाबरसाधनं ॥
विजयापुष्पहोमेन चातुर्वर्ण्यक्रमेण च ।
होमयेत् परमेशानि पुरुषार्थचतुष्टये ॥

Colophons of the different chapters :—

38A, इति श्रीकालीशाबरे शिवपार्व्वतीसंवादे वटुकप्रोक्तं परिभाषापटलं प्रथमं; 39A, ०कालीसंक्षेपपटलो नाम द्वितीयः; 40B, ०तृतीयः पटल. समाप्तः । अथान्यमतं ग्रन्थान्तरे अन्यविषयनिरूपणं शत्रुपीडनार्थे गणेशविधिः । 41A, इति श्रीकालीशाबरे ईश्वरपार्व्वतीसंवादे कालीशाबरस्तृतीयः पटलः ।

After the 3rd chapter there is a section in Hindi with the following colophon :—

इति श्रीशाबरसकंलसाधनं समाप्तं ।

6096.

10485B. *Kālīśābaram.*

Substance, foolscap paper (bound in book-form). 8½ × 6½ inches. Folia, 6 (by counting). Lines, 13 on a page. Extent in ślokas, 108. Character, modern Nāgara. Appearance, fresh. Complete in three chapters.

6097.

10531. **सिद्धशावरतन्त्रम् ।** *Siddhaśābaratantram.*

Substance, country-made paper. 10¼ × 7 inches. Folia, 1-8. Lines, 18 on a page. Extent in ślokas, 160. Character, Nāgara. Appearance, discoloured. Incomplete.

This MS contains the *Madhyakhaṇḍa* and *Uttarakhaṇḍa* of the work.

Beginning :—

अथ सिद्धशावरतन्त्र लिख्यते ॥

श्रीमहादेवोवाच ।

अदत्तात्र प्रवक्ष्यामि नानातन्त्रमारकथ्य नाम प्रयोगविधि प्रश्न ।
सर्व्वत्र कौलकं कृत्वा + + + + + + (?) ।
ब्राह्मणो कामक्रोधि च तस्य कारणं हेतवे ॥ (?)
आगमोक्ता पुराणोक्ता वेदोक्ता डामरे तथा ।
उड्डीसे अदितंत्रे च गाधातन्त्रे तथैव च ॥

ईश्वरोवाच ।

मारणं मोहनं स्तम्भनं देषोच्चाटनं ।
वश्यी आकर्षणं इन्द्रजालं यक्षिणी च रसायनं ॥
कालज्ञानं अनाहारं च विधिदर्शनं ।
बन्ध्यापुत्र + योगं मृतवत्सा सुतजीवनं स्त्रीप्रामा च बन्धभेदः ॥

Colophons of the different chapters :—

1A, इति श्रीईश्वरी-ईश्वर-संवादे गुरुभक्तदत्तात्रेय अग्रे कथी-सार सिद्ध-सावरे प्रथमकल्प परिच्छेदकः ; 2B, इति श्रीमहादेवदत्तात्रेयसंवादे सावरसिद्धि-तन्त्रे पञ्चमः कल्पः परिच्छेदः ; 3A, इति आकर्षणप्रकरणं समाप्तं ; 3B, इति दत्तात्रेय ईश्वरसंवादे अष्टमकल्पः परिच्छेदः ; 5A, मध्यमखण्डं सम्पूर्णम् ॥ 6A, इति श्रीपार्व्वती ईश्वरसंवादे सिद्धिसावरतन्त्रे उत्तमखण्ड परिच्छेदः संपूरणं ॥

Fol. 6B–8B contain the diagrams of a number of *Yantras* with explanatory notes in a vernacular.

6098.

10609. *Siddhaśābaratantram.*

Substance, country-made paper. 11½ × 5 inches. Folia, (1) 1–18, (2) 13–30 containing respectively Paṭalas I–VIII and Paṭalas X (which begins from the 9th śloka) to XXII. Lines, 10, 18 on a page. Extent in ślokas, 210 + 914. Character, Nāgara (written in two different hands). Appearance, fresh. Incomplete.

It has not been ascertained whether the portions contained in this MS, not found in the MS described under the previous number, belong to the Ādikhaṇḍa of the work.

Beginning :—

श्रीगणेशाय नमः ॥

सरस्वती जगन्माता प्रलम्बवरदायिनी ।
कामाक्षी कुलदेव्या च सिद्धेभ्यः साध्यकामदा ॥

... ...

2B, एते च बहवो नामा योगिना भैरवस्तथा ।
सिद्धगन्धर्व्वसंयुक्ता ऋषयो ज्ञानकांक्षिणः ॥
अन्योन्यमूचतुः सर्व्वे शिववाद-परायणाः ।

दुर्वासा उवाच ।

कः शिवः किमिदं ज्ञानं पार्व्वती का परातना ॥
किं मन्त्रं कौलविज्ञानं केन वा सिद्धसाधकाः ।
ज्ञायते किमिदं ज्ञानं भूतं भव्यं परं परः ॥
तेन सान्तस्तु विज्ञानं तमसं राजसं परा ।
ज्ञानमद्भुतसंकाशं विज्ञानविजितेन्द्रियः ॥
तेनैव ज्ञायते सम्यक् कथयस्व परातनं ।
यामलैर्बहुभिर्वादं कथितं कामदं परा ॥
तस्योदं कामसमाचारं धर्म्मैश्चैर्विजितं परा ।
सिद्धगन्धर्व्वयोगश्च भोगश्चैव तु मानवाः ॥

वाञ्छः सन्तोषसंकाशं प्रालब्धं पारप्रापकं ।
निर्धनानाञ्च धनदं सुभोगं भोगमिच्छतां ।
अणिमा लघिमा महिमा प्राप्तिसिद्धिप्रदायकं ॥
विज्ञानं सर्व्वजन्तूनां सिद्धशाबरपालकं ।
विवक्षावाचसंकाशं विविधावेगवर्त्तिनां ॥

Colophons of the different chapters :—

I. (Fol. 1-18):

3B, इति श्रीसिद्धसाबरे अद्भुतमन्त्रपराक्रमे पार्व्वतीशिवसंवादे सिद्ध-योगेश्वरकथितं प्रथमः पटलः; 6B, इति श्रीसिद्धसाबरे मन्त्रशास्त्रे प्रत्यक्षशिव-सिद्धभाषिते एलाखण्डे मानसरकृतेन शास्त्रानुक्रमः द्वितीयः पटलः; 10A, इति श्रीसिद्धसाबरे महामन्त्रराजविज्ञाने गणपत्याधिकारे नाम तृतीयः पटलः; 11B, ०मन्त्रराजदीपके गणपतिकल्पे चतुर्थः पटलः; 13B, ०गणपत्याधिकारे पञ्चम पटलः; 15B, ०गणपतिकल्पे मध्यप्रलये षष्ठः पटलः; 17A, ०गणपति-कल्पे सप्तमः पटलः; 18A, ०अष्टमः पटलः.

II. (Fol. 13-30):

13B, इति श्रीसिद्धशाबरे महामन्त्रराजदीपके गणपतिपटले गुटिका-भ्रमणविधिर्दशमः पटलः; 15A, ०गणपतिकल्पे अमृतसंजीवनीविद्यायामेकादशः पटलः; 17A, ०वैमानिकीविद्यायां द्वादशमः पटलः; 19A, ०गणपत्यधिकारे वारुणीविद्यायां त्रयोदशः पटलः; 20A, ०गणपतिकल्पे अवृष्टिकरणविद्यायां चतुर्द्दशमः पटलः; 21A, ०धारबन्धविद्यायां पञ्चदशमः पटलः; इति गणेश-कल्पसमाप्तं; 21B, ०भैरवकल्पे धान्यसिद्धिविद्यायां षोडशमः पटलः; 22A, ०धान्यसिद्धौ सप्तदशमः पटलः; 24A, ०नामसहस्रकोद्धारसमवाये अष्टादशमः पटलः; 26A, भैरवकल्पे माध्वीप्रशंसाप्रतिवादे एकोनविंशतिमः पटलः; 27B, मन्त्रराजविधानकं नाम विंशतितमः पटलः; 28A, ०एकविंशतिमः पटलः; 29A, ०भूतनाथोत्थासनं द्वाविंशतिमः पटलः ॥

The portion after Fol. 29A, which has no colophon, ends with the following date :—

संवत् १८१५ पौष शुक्ल १० चन्द्रदिने शुभं भूयात् ॥

6099.

10542. शावरतन्त्रम् । *Śābaratantram.*

Substance, country-made paper. 11 × 4¾ inches. Folia, 21. Lines, 7 on a page. Extent in ślokas, 325. Character, Nāgara. Date, Saṃvat 1912. Appearance, fresh. Complete in three chapters.

This MS contains incantations principally in Hindi. A similar work called the *Bṛhatsābaratantra* by Śiva has been published by the Lakṣmīveṇkateśvara Press (Kalyan—1841 Ś.E.).

Last Colophon :—

इति श्रीशिवपार्व्वतीसंवादे गोरखनाथकृते सावरतन्त्रे तृतीय-प्रकरणं ।

Post Colophon :—

समाप्तं शुभमस्तु ॥ लिखितं नारायणदत्तत्रिपाठी । श्री संवत् १९१२ मिति कातो सुदी ११ वार मङ्गलके समाप्त भई । भौमवासरे समाप्तं । शिवराम ॥ शिवराम ॥

6100.

8417. शावरमन्त्रचिन्तामणिः । *Śābaramantracintāmaṇi.*

Substance, country-made paper. 11½ × 4½ inches. Folia, 27. Lines, 8 on a page. Extent in ślokas, 930. Character, modern Nāgara. Appearance, fresh. Complete in 10 chapters.

Beginning :—

श्रीगणेशाय नमः ॥

विश्वेश्वरसरस्वत्योर्गुरोः शिष्यतपोधन ।
नृसिंहाख्यानसम्पन्नं वामनाख्यं नमाम्यहं ॥ १ ॥
श्रीकुचाम्भोजयुगले कस्तुरीयकसंकुले ।
नखे लिखन्ति चित्राणि लीलासिंहमहं भजे ॥ २ ॥
ॐकारवाचकः साक्षात् महोग्रश्रीनृके[श]री ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत् सिध्यतमेव च ॥ ३ ॥
प्रयोगरूपिणां वीरं महो[ग्र]श्रीनृकेशरी ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत् सिध्यतमेव च ॥ ४ ॥
वर्णात्मकं वर्णमयं महोग्रश्रीनृकेशरी ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥
वाणीं भूतिं रमां गौरीं वन्देऽहं कार्य्यसिद्धये ॥ ५ ॥

पार्व्वत्यौवाच ।

भूसुरार्च्चितभूतेश शशकंकणशंकर ।
लंकेशार्च्चितपादाब्ज नमस्ते शांकरीपते ॥
सत्यकोटिमहामन्त्राण्युपमन्त्राण्यनेकशः ।
त्वत्कटाक्षान्महादेव श्रुतो मे शान्तिमत् प्रभो ॥
भूतले शावरं मन्त्रं वर्त्तते साधकं विना ।
परां सिद्धिकरीं विद्यां पावनं वद मे प्रभो ॥

ईश्वर उवाच ।

मम मानसपुत्रास्ति मच्छेन्द्रेभ्यो महाबलः ।
गौडकेरलकर्णाट अा + धुर्ज्जरदेशकः ॥
शिष्यपञ्चकसंयुक्तो तपस्तेपे सुदारुणं ।
तत्र प्रसन्नो भगवान् हंसरूपी परात्परः ॥

हंस उवाच ।

किमस्ति कांक्षितं ब्रूहि आदिनाथ परात्परं ।
असाध्यमपि योगेन्द्र वदाम्येतद्व्रतं मम ॥

आदिनाथ उवाच ।

प्रत्येकं मन्त्रशास्त्रन्तु कौलाचारमतानुगं(मं) ।
कौलाचारविहीनस्तु कल्पयाम्यहमादरात् ॥
कटाक्षमस्ति देवेश तन्मन्त्रागममादरात् ।
पाठान्मन्त्रोक्तफलदं कुरु चिन्मयविग्रह ॥
इत्युक्तं तु महेशस्तु तदादिश्य पिता ययौ ।
आदिनाथस्तु गिरिजे शिष्यैरध्यापितं मनुः ॥
तस्य तस्य च भाषायां मन्त्रतज्जपलक्षणं ।
प्रयोगं चोपसंहारं उक्तवानपि पार्व्वती ॥
षट् प्रयोगान् क्रमेणैव देवतामन्त्रमादरात् ।
आदौ तद्देवतां वक्ष्ये मत्स्येन्द्रोक्तिसुसिद्धये ॥
रतिर्वाणी रमा ज्येष्ठा दुर्गा चैव तु कालिका ।
षट्कर्म्मदेवताः प्रोक्ताः कर्म्मादौ तां न पूजयेत् ॥
तस्या ध्या[नं] च कृत्वा तु तन्मन्त्रं जपमादरात् ।
चिन्तितं च भवेद्देवि नात्र कार्य्या विचारणा ॥
अर्च्चयेद्देवतामादौ जितं मन्त्रं कुलेश्वरि ।
जपसिद्धिमवाप्नोति शावरं चाद्भुतं मनुः ॥
षट्कर्म्मणां च नामानि वक्ष्येहं पार्व्वति शृणु ।
प्रथमं शान्तिकर्म्म च वश्यं चैव तदुत्तरं ॥
तृतीयं स्तम्भनं कर्म्म विद्वेषं च चतुर्थकं ।
उच्चाटनं च गिरिजे पञ्चमं कर्म्ममादरात् ॥
षष्ठं मारणकर्म्मं च मन्त्रशास्त्रेषु निश्चितं ।
लक्षणं तस्य वक्ष्यामि तव पर्व्वतनन्दिनि ॥

End :—

ॐ क्रौं ग्लौं ग्लौं महामाये आघोरशक्ति आघोरपराक्रमे आघोररूपे एह्येहि घेघे आमुकशत्रुं मारय मारय शोणितं पिब पिब ग्लौं ग्लौं क्रौं स्वाहा ।

एतन्मन्त्रन्तु देवेशि आयुतं चण्डिकाग्रतः ।
प्रजपेद्बलिपूर्व्वन्तु शक्तिः प्रत्यक्षमाप्नुयात् ॥
बलिं दद्यात् कुक्कुटं च मद्यमांसादिकं तथा ।
तथैव प्रेतभूमौ तु धैर्य्यबुद्धिसमन्वितं ॥

Colophons of the different chapters :—

2B, इति श्रीपार्व्वतीपुत्र आदिनाथविरचि[त] पञ्चद्राविडशाबरचिन्तामणि-र्नाम प्रथमः पटलः; 5B, ०शाबरचिन्तामणिर्नाम द्वितीयः पटलः; 8A, इति सम्मोहिनीविद्या पञ्चद्राविडशाबरमन्त्रचिन्तामणिर्नाम तृतीयः पटलः; 10B, इति श्रीपार्व्वतीपुत्र-नित्यनाथविरचिते शाबरमन्त्रचिन्तामणिर्नाम चतुर्थः पटलः; 13A, इति श्रीपार्व्वतीपुत्र-नित्यनाथविरचिते पञ्चम-पटलः; 16A, इति श्रीपार्व्वतीपुत्र-नित्यनाथसिद्धविरचिते शाबरचिन्तामणिर्नाम षष्ठं पटलः; 18A, ० सप्तम-पटलः; 20B, ० अष्टम-पटलः; 24B, इति श्रीनवम-पटलः ॥ इति श्रीपार्व्वतीपुत्र आदिनाथविरचिते शाबरचिन्तामणिर्नाम दशमपटलः ।

6101.

8372. सुवर्णतन्त्रम् । *Suvarṇatantram.*

Substance, country-made paper. 9½ × 4½ inches. Folia, 8. Lines, 10 on a page. Extent in ślokas, 176. Character, modern Nāgara. Appearance, fresh. Incomplete.

The manuscript contains chapters from the Suvarṇa Tantra relating to alchemy. The chapters are not given in their proper order, and are arranged by the compiler or copyist in his own way.

Beginning :—

अथातः कल्पं वक्ष्यामि येन गौप्यकरो भवेत् ।
शनिभौमदिने देव नारं मुण्डं समाहरेत् ॥ १ ॥
वस्त्रगालितचूर्णञ्च कृत्वा यत्नेन च पुत्रकं ।
पात्रं निर्व्रणमादाय मृन्मयं द्विजसत्तम ॥ २ ॥

खरमूत्रं दशपलं चूर्णमध्ये ततो ददेत् ।
आदौ चूर्णं पात्रमध्ये तन्मध्ये मूत्रमेव तु ॥ ३ ॥
क्षारस्थाने तु सजले सम्मार्ज्जनीप्रयोजिते ।
षण्मासं तत्र संस्थाप्य ततो निःसारयेत् सुत ॥ ४ ॥
तोलकं शुद्धशुल्वतं माषमात्रं कलं ककं ।
ताम्रद्रावे ततो दद्यात् तस्य वै कालिकां जपेत् ॥ ५ ॥
ताम्रत्वं रौप्यतां याति कुन्दपुष्पसमप्रभं ॥ ६ ॥

End :—

अथातः सम्प्रवक्ष्यामि रुदन्ती कल्पमुत्तमम् ।
यस्य विज्ञानमात्रेण त्रैलोक्यविजयी नरः ॥
तस्य कल्पं प्रवक्ष्यामि रुदन्ती सिद्धिदा वरा ।
कृष्णपक्षे चतुर्द्दश्यामहोरात्रमुपोषितः ।
ईश्वरं पूजयेद्देवं ईश्वराग्रे जपं चरेत् ॥
ॐ नमो भगवते त्वां सर्व्वविद्यानिवासिनी ।
धन्वन्तरिप्रसादेन मूलसंवदास्महं स्वाहा ॥
सहस्रशीर्षेति जपेन्मन्त्रं प्रयोगञ्च ततश्चरेत् ।
पारदं माक्षिकं शैलं गन्धकेन प्रमर्दयेत् ॥
त्रिघटीमर्दयेद् विप्र रुदन्ती रसयोगतः ।
वङ्गे ताम्रे तारके वा पुटेन कनकं भवेत् ॥
रुदन्ती तु समानीय तस्तं चांगरसं चरेत् ।
तद्रसः सङ्कलेत् सूतं सूतस्त्व-र्भविष्यति ॥
पत्रेश्चनक सादृश्या संपूर्णा चो ... ... ।

Colophons of the different chapters :—

1B, इति सुवर्णतन्त्रे शिवपरशुरामसंवादे द्वितीयखण्डे कपालकल्पः नवमः ॥ 2A, इति सुवर्णतन्त्रे श्वेतैरण्डकल्पः सप्तमः । 2B, ० काकारिकल्पस्त्वष्टमः । 2B, इति दशमकल्पः । 3A, इति सुवर्णतन्त्रे त्रिवीराकल्लीकादशः । 3B, इति सुवर्ण[तन्त्रे]करटकोपलाशकल्पः त्रयोदशः । ० वल्ली पञ्चाशकल्पश्चतुर्द्दशः । 4A, ० रक्तत्रिधारावज्रवल्लीकल्पश्चतुर्द्दशः । 4B, ० त्रिधारा-

वज्रधातुकल्पः १५ । 6A, ० कामधेनुकल्प षोडशः । 6B, ० सिद्धवल्लीकल्पः । 7A, ० स्वर्णफलिनीकल्पाष्टमः । 7B, ० हरिद्रावत्सनाभकल्पो नवमः । 7B, ० काकजङ्घाकल्पः १० । 8A, इति श्रीमुवर्णतन्त्रे कर्मोपरकल्पः एकादशः । ११

6102.

147. दत्तात्रेयसंहिता । *Dattātreyasaṃhitā.*

Substance, country-made paper. 5 × 15 inches. Folia, 8. Lines, 8 on a page. Extent in ślokas, 170. Character, Bengali. Appearance, fresh. Complete.

This is in the form of an interlocution between the sages Sāṁkṛti and Dattātreya. It deals with Yoga topics. The work has been described in L. I. 251.

6103.

4632. *Dattātreyasaṃhitā.*

Substance, country-made paper. 14 × 4½ inches. Folia, 9. Lines, 8 on a page. Extent in ślokas, 200. Character, Bengali. Appearance, discoloured. Complete.

6104.

192. पवनविजयस्वरोदयः । *Pavanavijayasvarodaya.*

Substance, country-made yellow paper. 13 × 4½ inches. Folia, 24. Lines, 6 on a page. Extent in ślokas, 500. Character, Bengali. Appearance, old. Complete in 9 prakaranas.

The work speaks principally of the Nāḍīs and the Tattvas. It has been published in 315 verses under the title of *Śivasvarodaya* by Gangavisnu Krishnadas (Lakshmivenkatesvar Press, Bombay, 1978 V.S.).

Several editions of the work in Bengali characters and with Bengali translations are known. The edition of it as published in the *Aruṇodaya* and in the *Indrajālādisaṃgraha* of R. Chatterji has no division into chapters and is complete in 324 verses. The work as edited by Kālīprasanna Vidyāratna (Calcutta, Dharmayantra, 1294 B.S.) is complete in 21 chapters. The edition of it as published by Basak and Sons (Calcutta) which is called *Svarodaya-tantra* is complete in 36 chapters.

The present manuscript has been noticed in L. I. 485.

6105.

216. *Pavanavijayasvarodaya.*

Substance, country-made yellow paper. 13½ × 5 inches. Folia, 13. Lines, 11 on a page. Extent in ślokas, 194. Character, Bengali. Appearance, old. Complete.

The present MS has been described in L. I. 484.

6106.

5023 B. *Pavanavijayasvarodaya.*

Substance, palm-leaf. 16 × 1½ inches. Folia, 29. Lines, 3 on a page. Extent in ślokas, 450. Character, Bengali. Appearance, fresh. Complete.

6107.

8770. *Pavanavijayasvarodaya.*

Substance, country-made paper. 9½ × 4 inches. Folia, 30. Lines, 7 on a page. Extent in ślokas, 450. Character, Nāgara. Appearance, old. Complete.

6108.

11099. *Paramārijayasvarodaya.*

Substance, country-made paper. 9 × 4 inches. Folia, 26–30. Lines, 9 on a page. Extent in ślokas, 71. Character, modern **Nāgara**. Appearance, fresh. Incomplete.

6109.

8068. युद्धजयार्णवतन्त्रम् । *Yuddhajayārṇavatantram.*

Substance, palm-leaf. 8½ × 2 inches. Folia, 82. Lines, 6 on a page. Extent in ślokas, 1,200. Character, Newari. Date, N.S. 390 = 1270 A.D. Appearance, old and discoloured. Complete in 10 chapters.

This work, which also deals with Svarodaya, is different from a work of the same name described in IO. V. 3040. Though in the form of an interlocution between Śiva and Pārvatī the work is attributed, in this and the following MS. to Bhaṭṭotpala, presumably on account of its astrological character.

Beginning

ॐ नमो महाभैरवाय ।

मोहान्धकारमग्नानां जनानां ज्ञानरश्मिभिः ।
कृतमुद्धरणं येन तं नौमि शिवभास्करं ॥
कैलासशिखरासीनं देवदेवं महेश्वरं ।
गणसिद्धसमाकीर्णं मुनिसङ्घनिषेवितं ॥
अपृच्छज्जगतो देवी पार्वती पतिव्रता ।
अनुग्रहार्थं लोकाना पप्रच्छ परमेश्वरं ॥

देव्युवाच ।

भगवन् देवदेवेश शशाङ्ककृतशेखर ।
ब्रूहि मे परमं ज्ञानं विस्मयार्थं महेश्वर ॥
स्वरोदयं परं गुह्यं सुरानामपि किं पुनः ।
मत् + + + + सूचितं पूर्वमुक्तं त्वया विभो ॥

विस्तरात्तच संक्षेपात् ब्रूहि मे परमेश्वर ।
पथपंचकविस्तारं स्वरवर्णाग्रहोदयं ॥
प्रष्णिग्रहस्वराः पञ्च बलाबलसमन्वितं ।
राशिभेदं ग्रहेन्द्राणां तद्वशेन शुभाशुभं ॥
लाभालाभं सुखं दुःखं जीवितं मरणं तथा ।
जयं पराजयं चैव गमनागमनं तथा ॥
चिन्तितस्य स्थिरत्वं तथान्यत्संप्रायापहं ।
शरीरस्वासयोगेन प्रष्टव्यस्य वशेन च ॥
नामस्वरविभागेन नामवर्णक्रमेण च ।
नामनक्षत्रराशीनां विभागेन स्वरोत्तम ॥
शलाकाचक्रभेदेन तथा चक्रहतेन च ।
प्रश्नस्माश्रितविज्ञानं कालचक्रेण शङ्कर ॥
जातकप्रविभागेन निःसंदिग्धं सुनिश्चितं ।
पथचक्रं पञ्चखेट सायचक्रं सुरेश्वर ॥
प्रष्टारं स्थूलचक्रं च जातिनक्षत्र-सम्मतं ।
अंसयुक्तिविरिश्चाख्यं सर्पसिंहासनात्मकं ॥
चापचक्रं खड्गचक्रं कलसाख्यं तथा परं ।
तारबद्धं कोटचक्रं भद्रचक्रमनेकधा ॥
शनिस्वरं गारुडं चक्रं विधिचक्रेश्वरेश्वर ।
नामवर्णचक्रं देव जयचक्रं नम प्रभो ॥
ब्रूहि क्षोण-परिज्ञानं चन्द्रावस्थानजं फलं ।
नाणोदयन्तु देवेश य+ +सि भैरव ॥

End :

दातव्यमेव देवेशि शास्त्रं परमदुर्लभं ।
सिद्धकुवलयाख्योयं भक्तिमान् वृषभध्वजे ॥
तेन स्वरोदयं शास्त्रं मर्त्यलोकेऽवतारितं ॥

Colophons of the different chapters :—

5B, इति युद्धजयार्णवतन्त्रे प्रथपञ्चक[स्वरो]दयविधानो नाम प्रथमः पटलः; 9B, ०गाग्निग्रह षट्पदा[र्थप्रवि]भागो नाम द्वितीयः पटलः; 21A, ०विविधप्रश्नकथनो [नाम तृतीयः पटलः]; 27A, ०सतपदांशकसप्तशलाकाचक्र भेद चतुर्थपटलः; 34B, ०एकाशीतिपदचक्रयोगो नाम पञ्चमः पटलः; 46A, ०जातकविधानो नाम षष्ठः पटलः; 60B, ०पद्मचक्रं नाम सप्तमः पटलः; 66B, ०कोटचक्राधिकमष्टमः पटलः; 74B, ०राजचक्राधिकारो नाम नवमः पटलः; 82, ०तन्त्रप्रकाशाधिकारो नाम दशमः पटलः। समाप्तमिदं भट्टोत्पलविरचितमिदं युद्धजयार्णवमिति ॥

Post Colophon Statement :—

संवत् ३६० अस्युनि कृष्ण पञ्चम्यामादित्यवासरे लिखितमिति।

श्रीदैवज्ञजमर्द्दवलस्य पुस्तकम्।

6110.

4820. *Yuddhajayārṇavatantram.*

Substance, palm-leaf 12 × 2¼ inches. Folia, 65 (by counting). Lines, 5 on a page. Extent in ślokas, 990. Character, Newari. Date, N.S. 217=1097 A.D. Appearance, old, discoloured and worn out. Incomplete.

A MS of the work, complete in 16 chapters, is described in *Ulwar* 2270. Extr. 654. The date of composition as given in the last verse in this description is 1488 Śaka. Of the 11 introductory verses given here, we have only two. IO. IV. 2581 describes an incomplete MS of the work. It deals with Tantric rites like *dīkṣā*, *vāstuyāga* and worship of various deities.

Beginning:—

श्रीविघ्नवैरिणे वक्रतुण्डाय नमः ।

यन्नामस्मरणेन पातकमलप्रक्षालनं जायते
यस्मिन् कर्णपथं गते तु सुमहत्पुण्योऽग्र्यः प्राप्यते ।
यत्र न्यस्तमतिः प्रयाति पुरुषो मोक्षं महादुर्लभं
[वं]दे तं परमेश्वरं त्रिजगतामाद्यन्तमध्येश्वरम् ॥
लक्ष्मीकान्तं नमस्कृत्य भवानीं तदनन्तरम् ।
यशोधरेण क्रियते मन्त्राराधनदीपिका ॥
उच्यते प्रथमं तावत् ग्रन्थेऽस्मिन् लक्षणं गुरोः ।
गुरवो बहवः सन्ति दीपवच्च गृहे गृहे ॥
दुर्लभोऽयं गुरुर्देवि सूर्य्यवत् सर्व्वदीपकः ।

तन्त्रराजे ।

सुन्दरः सुमुखः स्वच्छः सुलभो बहुमन्त्रवित् ।
असंशयः संशयच्छित् निरपेक्षो गुरुर्मतः ॥

Colophons of the different chapters:—

9B, इति श्रीकंसारिमिश्रात्मजयशोधरविरचितायां मन्त्राराधनदीपिकायां प्रथमः प्रकाशः; 22B, ०द्वितीयः प्रकाशः; 36A, ० तृतीयः प्रकाशः; 55B, ० चतुर्थः प्रकाशः; 58A, ०पञ्चमः प्रकाशः; 62B, ०षष्ठः प्रकाशः ।

The works quoted are:—

1A, तन्त्रराज, शारदा, रामार्च्चनचन्द्रिका; 2A, पिङ्गलागम, कुलार्णव, रत्नसागर; 2B, सारसंग्रह; योगरत्नावली, अगस्तिसंहिता; 3B, तन्त्ररत्न-माला; 4A, मन्त्रदर्पण; 7B, रुद्रयामल; 8B, कल्पलता; मन्त्रसंग्रह; 9B, कादिमत; कुलमूलावतार; 10A, सूर्य्यसिद्धान्त; 10B, मन्त्रदेवप्रकाशिका; 14A, मत्स्यपुराण; व्यवहारोच्चय; 14B, देवल, वराह; 15A, मन्त्रमुक्ता-वली; 19A, भैरवतन्त्र; 22B, मन्त्रतन्त्रप्रकाश; 23A, वशिष्ठसंहिता; जाबालि; 24A, वैष्णवतिलक, ब्रह्माण्डपुराण; 27B, सिंहार्च्चनचन्द्रिका;

28A, क्रमदीपिका ; 29A, प्रणवकल्प ; 34B, शारदा, शिवदीक्षाटीका ; 36B, हरिनाथ ; 37A, शौनकागम ; मन्त्रकोष ; प्रपञ्चसार ; 43A, ज्ञानमाला ; 48B, वायवीयसंहिता ; 55A, तत्त्वसार ; 57B, रत्नकोष ।

6234.

Viṣṇudeva.

9059. **मन्त्रदेवप्रकाशिका ।** *Mantradevaprakāśikā.*

Substance, country-made paper. 10×4 inches. Folia, 1–65+1–6+49–58+1–80. Lines, 10, 10, 12, 7 on a page. Extent in ślokas, 1,900+170+360+1,600. Character, Nāgara. Appearance, some portions old and some portions new. Complete in 32 chapters.

Fol. 1–4 in the first batch, the entire second and fourth batches are later insertions and hence are new in appearance. The work deals with *dīkṣā*, *homa* and other Tantric rites in general as also the worship and *mantras* of various deities. The first and last chapters are somewhat philosophical. It is asserted that, strictly speaking, all *mantras* relate to one deity alone who is the Supreme Brahman. A MS of the work has been described in L. VIII. 2815.

Beginning:—

ॐकारात्माक्षरावीङ्भुवनपशिवश्चिद्दृत्तिगणामूर्त्तिचिन्ता-
रत्नत्रैयम्बकोद्यन्स्मृतिहरगणमहागणपत्यादिरूपिन् ।
अष्टार्णद्वादशार्णप्रियन्हरितनोः श्रीवराहाख्यचक्रिन्
कृष्णात्मन् रामविष्णो विविधगुणमहाशक्तिभास्वन्नमस्ते ॥
अनन्तनारायण रामयोगिन् ब्रह्मप्रभो ज्ञानघनाद्यविष्णो ।
अनन्तयोगीश्वर भानुकृष्ण रामाङ्ग्यानन्दगुरो नमस्ते ॥
............अथ प्रपञ्चसाराद्यमन्त्रशास्त्रानुसारतः ।
गुरूपदिष्टमन्त्राणां देवतादि प्रकाश्यते ॥

End:—

श्रीमत्प्रपञ्चसारादिशास्त्रसंग्रहविग्रहा ।
कृतिर्विजयते सैषा मन्त्रदेवप्रकाशिका ॥
परमाराध्यपौत्रस्य लक्ष्मीधरकृसूरिजन्मनः ।
कृतिः श्रीविश्वदेवस्य श्रीमत्कोटीश्वरेर्पिता ॥

6235.

2242. *Mantradevaprakāśikā.*

Substance, country-made paper. 10½ × 4½ inches. Folium 1. Lines, 9 on a page. Extent in ślokas, 20. Character, Nāgara. Appearance, fresh. Complete in 15 verses.

This contains only the second chapter of the work.

6236.

Vijayarāmācārya.

10160. **मन्त्ररत्नाकरः ।** *Mantraratnākara.*

Substance, country-made paper. 6¾ × 5 inches. Folia, 78. Lines, 7–10 on a page. Character, modern Nāgara. Appearance, fresh. Incomplete.

The present MS contains the 14th *taraṅga* only dealing with *mantras* and prayers, addressed to Rādhā. IO. IV. 2588 describes the 13th chapter of the work. Ulwar. Extr. 653 quotes from the beginning of the work. Stein (p. 233) refers to a MS of a commentary on the work by the author himself.

Beginning:—

श्रीगणेशाय नमः ।
अथ राधो(?) प्रवक्ष्यामि सर्व्वतन्त्रेषु गोपितां ।
साधको यां समाराध्य चतुर्वर्गफलं लभेत् ॥

यस्याः संप्राप्तिमात्रेण जीवन्मुक्तो भवेन्नरः ।
बृहस्पतिः कुवेरश्च जायते धनविद्ययो[ः] ॥
शत्रवो दासतां यान्ति दास[ः] स्या[द्]वनीपतिः ।
यस्मै कस्मै न दातव्या विद्याराज्ञी सुदुर्लभा ॥
विना श्रीराधिकामन्त्रं कृष्णमन्त्रं तु यो जपेत् ।
स दरिद्रो महामूढः कृष्णशापमवाप्नुयात् ॥
श्रीकृष्णोपासकस्तस्माद्राधामन्त्रं समाश्रयेत् ।
मन्त्रोद्धारं प्रवक्ष्यामि सर्व्वतन्त्रेषु गोपितम् ॥

End :—

नानया सदृशी विद्या शीघ्रसिद्धिविधायिनी ।
शरीरधनदारेण गुरुं संतोष्य साधयेत् ॥
गुरौ तुष्टे तु सिद्धि[ः] स्यान्नान्यथा कल्पकोटिभिः ।
तस्मात् सर्व्वप्रयत्नेन गुरुं सन्तोषयेत् सुधीः ॥

Colophon :—

इति श्रीमच्चतुर्भुजाचार्य्यचरणसरोजनिवसतमनश्चञ्चरीकास्वादितचिन्मकरन्दश्रीविजयरामाचार्य्यविरचिते मन्त्ररत्नाकरे(र) चतुर्दशस्तरङ्गः ।

6237.

5806. *Mantraratnākara.*

Substance, country-made paper. 12 × 5 inches. Folia, 12. Lines, 11 on a page. Character, Nāgara. Appearance, fresh. Incomplete.

The present MS contains the 16th (13th according to IO. IV. 2588) chapter of the work dealing with the details of the worship of Kārtavīrya.

6238.

Kamalākara Bhaṭṭa.

5529. मन्त्रकमलाकरः । *Mantrakamalākara.*

Substance, country-made paper. 12½ × 5 inches. Folia, 126. Lines, 10 on a page. Extent in ślokas, 3,780. Character, Nāgara. Appearance, fresh. Complete.

The work deals with initiation, various sorcery rites and the worship of deities like Sūrya, Gaṇeśa, Rāma, Kārtavīryārjuna, etc. The section on the worship of Rāma is written by Rāmakṛṣṇa, father of Kamalākara. This section is introduced thus (Fol. 36B):—

अथास्मत्पितृकृतो रामपूजाविधिः ।

Beginning:—

श्रीगणेशाय नमः । श्रीरामः ।

श्रीरामपितरौ नत्वा कमलाकरशर्म्मणा ।
अनन्तस्य सुतस्यार्थे मन्त्रतन्त्रं विविच्यते ॥

शारदायाम् ।

अथ दीक्षां प्रवक्ष्यामि मन्त्राणां हितकाम्यया ।
विनानया न लभ्येत सर्व्वमन्त्रफलं यतः ॥

Colophons:—

21A, इति जगद्गुरुरामकृष्णभट्टात्मजकमलाकरभट्टकृते मन्त्रकमलाकरे दीक्षाविधिः परिभाषा च समाप्ता; 35B, इति कमलाकरभट्टकृता महागणपतिपद्धतिः; 36B, इति कमलाकरभट्टकृते मन्त्रकमलाकरे गणेशमन्त्राः; 47B, इति श्रीमन्नारायणभट्टसुतश्रीमद्रामकृष्णभट्टविरचितो रामपूजाविधिः समाप्तः; 50B, इति श्रीमन्नारायणभट्टसुतरामकृष्णभट्टकृतः संक्षेपतो रामपूजाविधिः; 53B, इति श्रीमद्विद्वन्मुकुटहीराङ्कुरश्रीमद्रामेश्वरभट्टसूरिसूनुनारायणसुतश्रीरामकृष्णभट्टविरचितो रामपूजाविधौ रामयन्त्रोद्धारः; 70B,

इति श्रीमन्नारायणभट्टसूरिसूनु-महामहोपाध्याय-रामकृष्णभट्टात्मज-कमलाकरभट्ट-कृतः कार्त्तवीर्य्यदीपदानप्रयोगः सम्पूर्णः; 79A, इति कार्त्तवीर्य्यार्ज्जुनपद्धतिः; 82B, इति कुब्जिकातन्त्रोक्तं वन्ध्यात्वहरणम्; 97B, इति शिवपञ्चाक्षरमन्त्रप्रयोगो भट्टकमलाकरकृतः समाप्तः; 109A, इति कमलाकरभट्टकृतौ वन्दिमोक्षप्रयोगः; 110B, सर्पविषोत्तारणम्; 126B, इति श्रीआनन्दभैरवेश्वरसंवादे कार्त्तवीर्य्यार्ज्जुन-सहस्रनामस्तोत्रं सम्पूर्णम्; इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्ण-भट्टात्मजमहामहोपाध्याय-श्रीकमलाकरभट्टकृते मन्त्रकमलाकरे मन्त्रौषधप्रकरणं समाप्तम्।

6239.

Pūrṇaprakāśa.

6553. **मन्त्रमुक्तावली।** *Mantramuktāvalī.*

Substance, country-made paper. 11½ × 3½ inches. Folia, 1 174, of which Fol. 39-40, and 45B (which does not belong to the present work and contains an extract from the *Śāradātilaka*) are written in a later hand. Lines, 9 on a page. Extent in ślokas, 5,000. Character, Nāgara. Date, Saṃvat 1480. Appearance, old, discoloured and repaired. Complete in 25 chapters.

The work deals with various Tantric topics like *dīkṣā*, *puraścaraṇa* and worship, as well as *mantras* of different deities. For two incomplete MSS of the work, described as anonymous, cf. CS. V. 62-3.

The MS has occasionally many marginal notes in a later hand.

Beginning:—

ॐ शिवादिभ्यो गुरुभ्यो नमः।
जयति जगदधीशाधीश्वरी सा भवानी
गुणपदमधिरूढा भूतमुक्तावली या।
हिमकररवियोगादेतया ब्रह्मरन्ध्रा-
म्बुजकुहरकलायाः प्रोल्लसन्ती दशार्णा ॥ १ ॥

विद्यापङ्कजबन्धुबोधितमहापद्मप्रबद्धासना
मुद्रामुद्रितलोचनाम्बुजयुगा सद्योगमुद्राधरा ।
देहोन्मीलितनीलनीरजविभाध्याधूतमन्मोहभू-
राज्ञा कापि मदीयदैवतमयी मूर्त्ता समुज्जृम्भताम् ॥ २ ॥

... ...

संसारशार्व्वरविदारणदारुणोपि
यत्संप्रदायतरणिः करुणां करोति ।
अस्मादृशेषु भुवि शङ्करपूज्यपादान्
वन्दामहे गुरुकुलस्य गुरूनभूभ्यां ॥ ५ ॥

यच्चिन्तानिकुरुंबकैरवसुहृद्बिम्बेंतरुन्मीलति
प्रौढ़ानन्दसुधाम्बुधौ मयि परामुद्वेलतां तन्वति ।
लीनं तत् सनिदानमेतदखिलं सोढुं (?) जगज्जालकं
श्रीकाशीनगरीमुनेरनुदिनं तत् पादपद्मं नुमः ॥ ६ ॥

यदमलयशःकासारेस्मिन् विभाति हरेः पदं
सरसबिसिनीपत्रच्छायं विधुः सरसीरुहम् ।
अपि च रुचिरं ताराचक्रं तुषारपरम्पराः
सततमिह तं वाणीतीर्थं गुरुं समुपास्महे ॥ ७ ॥

श्रीमत्प्रपञ्चसाराब्जलधेरुपदेशशुक्तिगर्भेभ्यः ।
मनुमुक्ताफलमालां सम्मतिभूषार्थमुद्धराम्येताम् ॥ ८ ॥

क्वापि क्वापि महागमनिकराकरजानि मन्त्ररत्नानि ।
सत्सम्प्रदायगुम्फैर्नायकतामत्र यास्यन्ति ॥ ९ ॥

End:—

ग्रामे काञ्चिदिहास्त्यलौकिककलासम्भम्भवर्यनुगा
मुद्रोन्मुद्रितशम्भुयामपरमा हन्तामृतस्यन्दिनी ।
श्रीकाशीनगरी मुनीन्द्रचरणद्वन्द्वानुचर्य्याविशाद्
या लब्धात्र मयार्पिता भगवती जानातु वागीश्वरी ॥

+ + + + स्य तं नित्यकमनीयं
त्रिभुवने मनोवाणीमार्गातिगमगणितानन्दसुभगं ।
गभीरं निःपारं गुरुचरणसेवैकसुलभं
वपुर्व्वाणीशाया जयति जनया + + + + + ॥

+ + + + +
+ + + पापेन कदर्थितोसि ।
अज्ञस्य वागीश्वरि मेऽपराधं
कारुण्यमूर्त्ते तमिमं क्षमस्व ॥

जन्मनाश[व्यथा]संकुलाद्भवादंबुधेर्जगति कौतुकादहं ॥
उद्धृतोस्मि यदपांगलीलया
तं नमामि निजदैवतं गुरुम् ।

विश्वेशचिन्ताभरमाहरन्तं
भागीरथीकार्य्यकरं नमामि ॥
निर्द्दोषदोषाकरपोषकं तं
श्रीभारतीतीर्थमुनेर्गुणौघं ।

रुष (?) कलनकलावान् नैव जातु स्वभावात्
परिपवनवदस्मिन् केपि ख्यांते (?) भवन्तं ।
जगति रसनिधानं गोस्तनीं वर्ज्जयित्वा
लशुनमशुचि केचित् किं न खादंति मन्दाः ॥

यद्यवद्यमिह वन्द्यते नरा(ना) किं विचाररचनाकदर्थने ।
उल्लसन्त्यपि नदोषदर्शिनां रम्यवस्तुनि कलङ्ककोटयः ॥

अस्मन्मनीषापरितोषणाय
तवाङ्घ्रिगोविन्दमुदेऽस्मदीयः ।
यत्नस्तनुर्याति फलेन योगं
वागीश्वरीचिन्तनवारिपुष्टा ॥

स्वबुद्धिकामिनीकण्ठभूषणाय मनोरमां ।
मन्त्रमुक्तावलीमेनां कश्चन व्यतनोन्मुनिः ॥

Last Colophon:—

इति परमहंसपरिव्राजकाचार्य्यश्रीमदनन्तप्रकाशपूज्यपादशिष्य-
पूर्णप्रकाशस्य कृतौ मन्त्रमुक्तावल्यां पञ्चविंशतिमः पटलः ।

Post-colophon Statement:—

संवत् १४८० समये पौष सुदि १३ भौमे विहारनगरावस्थितषट्-
कर्म्मालंकर्म्मीण द्विवेदश्रीपांपाशर्म्मणः कृते श्रीपुरुषोत्तमदासेन
लिखिता मन्त्रमुक्तावली ।

शुभमस्तु सर्व्वजगतः । यथादृष्टमिति परिहारः ।

श्रीनारायणाय नमः । श्रीकृष्णाय नमः ।

यज्ञेशाच्युतगोविन्दमाधवानन्तकेशव ।

कृष्णविष्णो हृषीकेश वासुदेव नमोस्तु ते ॥

आह राजा स केवलं । नान्यज्जगाज (?) मैत्रेय किञ्चित्
स्वप्नान्तरेष्वपि ॥

6240.

Kāśīnātha Bhaṭṭa.

6015. **मन्त्रचन्द्रिका ।** *Mantracandrikā.*

Substance, machine-made modern paper. 11½ × 4 inches. Folia, 80. Lines, 9 on a page. Extent in ślokas, 2,000. Character, Nāgara. Appearance, new. Complete in 12 chapters.

The work deals with Tantric rites in general and gives the *mantras* for the worship of various deities. The author gives the names of his father and grandfather in the last colophon. He also refers to his maternal grandfather Anantabhaṭṭa, references to the *Tattvabodha* of whom are found in several passages in the present work (Fol. 71B, 76A). MSS of the work are also described in Peters. 6, p. 37 and L. IV. 1709. The MS described in L. IV. 1709 seems to contain another recension of the work which

begins from the middle of the MS described here and by Peterson, and has a different introductory verse.

Beginning:—

श्रीगणेशाय नमः। श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः।

विश्वेश्वरं नमस्कृत्य मातरं पितरं तथा।

काशीनाथः प्रतनुते सिद्धिदां मन्त्रचन्द्रिकाम्॥

तत्रादौ गुरुलक्षणम्।

श्रोत्रियो ब्रह्मनिष्ठः तत्त्वप्रतिपादनसमर्थः समस्तमन्त्रप्रयोगकुशलः, etc. etc.

Colophons of the different chapters:—

5A, इति मन्त्रचन्द्रिकायां दीक्षाविधानाख्यः प्रथमोल्लासः; 15A, ०सामान्यपूजाविधानाख्यो द्वितीयोल्लासः; 21B, ०गणेशमन्त्रविधानाख्यस्तृतीयोल्लासः; 27A, ०कृष्णमन्त्रविधानाख्यश्चतुर्थोल्लासः; 33A, ०राममन्त्रादिवैष्णवमन्त्रविधानाख्यः पञ्चमोल्लासः समाप्तः; 38B, ०लक्ष्मीमन्त्रादिवागीश्वरीमन्त्रविधानाख्यः षष्ठोल्लासः; 49A, ०महाविद्यामन्त्रविधानाख्यः सप्तमोल्लासः; 54A, ०त्वरितादिपार्व्वतीमन्त्रविधानाख्योऽष्टमोल्लासः; 59A, ०शैवमन्त्रविधानाख्यो नवमोल्लासः; 61B, ०सुब्रह्मण्यादिमन्त्रविधानाख्यो दशमोल्लासः; 66B, ०नवग्रहादिमन्त्रविधानाख्यो एकादशोल्लासः; 79B, इति श्रीमद्भडोपनामकशिवरामभट्टात्मजजयरामभट्टाभिध-शिवभक्तसूनुमन्त्रशास्त्रप्रवीणदक्षिणाचारमतप्रवर्त्तक-काशीनाथविरचिता मन्त्रचन्द्रिका समाप्ता। श्रीदक्षिणामूर्त्तिशिवार्पणमस्तु।

6241.

Somanātha.

10599. **अज्ञानध्वान्तदीपिका।** *Ajñānadhvāntadīpikā.*

Substance, country-made paper. 8½ × 5 inches. Folia, 56. Lines, 9 on a page. Extent in ślokas, 700. Character, Nāgara. Appearance, fresh. Complete in ten chapters.

This contains the *mantras* for the worship of various deities. The father's name of the author is given as Maheśānanda.

A MS of the work containing nine chapters is noticed in Stein, p. 227. Another MS, complete in ten chapters, is described in Ulwar. 2038, Extr. 609.

Beginning:—

सीताकान्तं हृदि ध्यात्वा सोमनाथो महेशजः ।
कुर्व्वे बालावबोधार्थमज्ञानध्वान्तदीपिकां ॥
सिद्धिदा मान्त्रिकाणां च दैवज्ञानां यशःप्रदा ।
सिद्धिदा बालवैद्यानां साक्षीतानां सुखप्रदा ॥

Colophons of the different chapters :—

14A, इति श्रीमहेशानन्दोपाध्यायश्रीसोमनाथभट्टविरचितायां प्रथमः प्रकाशः समाप्तः; 22B, ०अज्ञानध्वान्तदीपिकायां गणपतिमन्त्रकथनं नाम द्वितीयः प्रकाशः; 28A, इति श्रीमहामहोपाध्यायमहेशनाथसुत ०दुर्गामन्त्रकथनं नाम चतुर्थः प्रकाशः; 30B, ०लक्ष्मीमन्त्रकथनं नाम पञ्चमः प्रकाशः; 37A, ०वैष्णवमन्त्रकथनं नामाष्टमः प्रकाशः; 51B, ०नवमः प्रकाशः; 56B, ०शावर-मन्त्रकथनं नाम दशमः प्रकाशः ।

6242.

Mahīdhara.

2667. **मन्त्रमहोदधिः ।** *Mantramahodadhi.*

Substance, country-made paper. 10 × 4½ inches. Folia, 187. Lines, 10 on a page. Extent in ślokas, 3,800. Character, Nāgara. Date, Saṃvat 1817. Appearance, discoloured. Complete.

The work, complete in 25 chapters, has been published with the commentary called *naukā*, by R. Chatterji in his

Vividhatantrasaṃgraha, by J. Vidyasagara (Calcutta, 1892) and by the Venkatesvara Steam Press (Bombay, 1910).

Post-colophon Statement:—

संवत् १८१७ मीति दुआर श्रावन सुदी चउथी वार विहफैके लीखावे। श्रहनदास काएथन।

6243.

2878. *Mantramahodadhi.*

Substance, country-made paper. 10 × 5 inches. Folia, 146. Lines, 11 on a page. Extent in ślokas, 3,800. Character, Nāgara. Date, Saṃvat 1837. Appearance, fresh. Complete.

Post-colophon Statement:—

सं० १८३७ कार्त्तिक शुद्ध १ मन्दे लि० मिदं काश्यां।

6244.

5567. *Mantramahodadhi.*

Substance, country-made paper. 11 × 5 inches. Folia, 150. Lines, 10 on a page. Extent in ślokas, 3,800. Character, Nāgara. Date, Samvat 1907. Appearance, fresh. Complete.

Post-colophon Statement:—

श्रीसंवत् १९०७ कार्त्तिक शुक्लतिथौ १५ पौर्णिमा बुधे विद्याधर-द्विवेदेन लिखितं काश्याम्।

6245.

6011. *Mantramahodadhi.*

Substance, country-made paper. 8½ × 6¼ inches. Folia, 116. Lines, 14 on a page. Extent in ślokas, 3,800. Character, Nāgara. Date, Saṃvat 1830. Appearance, discoloured. Stitched on the left-hand side. Complete.

Post-colophon Statement:—

संवत् १८३० भाद्रसुदि त्रयोदश्यां रविवासरायां शुभमस्तु।
यादृशं पुस्तकं दृष्ट्वा तादृशं लेखितं मया। ... ...
शुभमस्तु सर्व्वजगतां परहितनिरता भवन्तु भूतगणाः। शुभं भवतु
कल्याणम्।

6246.

6381A. [*Mantramahodadhi.*]

Substance, country-made paper. $10 \times 4\frac{1}{2}$ inches. Folia, 2. Lines, 13 on a page. Character, Nāgara. Appearance, fresh. Fragmentary.

This MS contains a portion of the third *taraṅga* of the work.

6247.

8659. *Mantramahodadhi.*

Substance, country-made paper. $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 31. Lines, 8 on a page. Extent in ślokas, 620. Character, Nāgara, Appearance, fresh. Incomplete.

The present MS contains the first two chapters and 71 verses of the third.

6248.

9055. *Mantramahodadhi.*

Substance, country-made paper. $11 \times 4\frac{1}{2}$ inches. Folia, 32–148. Lines, 8 on a page. Character, modern Nāgara. Appearance, fresh. Incomplete.

The present MS contains chapters 4–17 and a portion of chapter 18.

6249.

11012. *Mantramahodadhi.*

Substance, country-made paper. 12×5 inches. Folia, 108. Lines, 9 on a page. Character, Nāgara. Appearance, fresh. Incomplete.

The present MS runs from the beginning of the 7th chapter to the end of the 25th.

Post-colophon Statement:—

संवत् १८०...

6250.

8666A. *Mantramahodadhi.*

Substance, country-made paper. (1) 12×7 inches, (2) 12×7¼ inches, (3) 13×6½ inches. Folia, (1) 1–5, (2) 1–52, (3) 39–87. Lines, (1) 15 on a page, (2) 16 on a page in Fol. 1–4, the remaining portion is written in a tripāṭha form, (3) 15 on a page. Extent in ślokas, (1) 140, (3) 2,215. Character, Nāgara. Appearance, (1) old, (2) fresh, except for a portion (Fol. 1–4) which is old, (3) old. Complete.

The MS contains respectively in its three sets of folia :—

(1) Commentary called *naukā* on chapter I and 119 verses of chapter II.

(2) Text alone of verses 1–115 of chapter I (in Fol. 1–4) and text accompanied by the commentary *naukā* on the portion I. 116–XII. 16.

(3) Text of the portion beginning from XII. 17 and running to the end of chapter XXV.

The following additional items are also found in the present MS:—

(1) One leaf containing directions on the worship to be performed at the beginning of a regular course of recitation of the *Mahābhārata*.

(2) Three sheets containing diagrams of लघुसर्वतोभद्रमण्डल, सर्वतोभद्रमण्डल, महागणपतियन्त्र, त्वरितायन्त्र, विन्ध्यवासिनीयन्त्र, गोपालयन्त्र, रामयन्त्र and त्रिपुरायन्त्र and two un-named यन्त्रs.

(3) मातृकानिघण्टु, नृसिंहकवच and महाकपिलपञ्चरात्रे दिक्साधन descriptions of which will be found elsewhere.

6251.

3296. **मन्त्रमहोदधिनौका ।** *Mantramahodadhinaukā.*

Substance, country-made paper. 9¾ × 4¾ inches. Folia, 43 by counting. Lines, 11 on a page. Character, Nāgara. Appearance, discoloured (except two leaves which are restored and fresh). Incomplete.

The present MS runs from the 14th chapter to the end of the 25th.

6252.

2539. *Mantramahodadhinaukā.*

Substance, country-made paper. 8½ × 3½ inches. Folia, 136. Lines, 9 on a page. Extent in ślokas, 2,430. Character, Nāgara. Date, Saṃvat 1765. Appearance, old and discoloured. Complete.

Post-colophon Statement:—

संवत् १७६५ ।

6253.

2879. *Mantramahodadhinaukā.*

Substance, country-made paper. 12 × 5 inches. Folia, 10–49. Lines, 13–17 on a page. Character, Nāgara. Appearance, fresh. Incomplete at the beginning.

6254.

8660. *Commentary on Mantramahodadhi by Kāśinātha.*

Substance, country-made paper. 10½ × 4½ inches. Folia, 24. Lines, 9 on a page. Extent in ślokas, 550. Character, Nāgara. Appearance, fresh. Incomplete (being a part of the next MS).

The commentary, though stated to be the work of Kāśīnātha, is occasionally found to agree with the *naukā* described above. A MS of it, with a slight difference in the second introductory verse, has been described in L. IV. 1714.

Beginning:—

श्रीगणेशाय नमः । श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।
करैर्दधानः परशुं कुरङ्गं
वराख्यमुद्रामुपदेशमुद्राम् ।
वटस्थमूले विबुधोपसेव्यः
सदा शिवायास्तु सदाशिवो नः ॥
नत्वा श्रीदक्षिणामूर्त्तिचरणाम्भोरुहद्वयम् ।
काशीनाथः प्रकुरुते टीकां मन्त्रमहोदधेः ॥

6255.

9056A. *Commentary on Mantramahodadhi.*

Substance, country-made paper. 11 × 4½ inches. Folia, 25–217. Lines, 9 on a page. Extent in ślokas, 4,240. Character, Nāgara. Appearance, fresh. Incomplete (being a part of the previous MS).

The present MS contains the commentary of Kāśīnātha on the whole of the work minus the first chapter and the first 35 verses of chapter 2, found in the previous MS.

6256.

9056B. *Commentary on the Mantramahodadhi.*

Substance, country-made paper. 12½ × 5 inches. Folio, 1–48. Lines, 11 on a page. Extent in ślokas, 2,000. Character, Nāgara. Appearance, old. Incomplete.

The present MS contains the commentary of Kāśīnātha on chapters 1–16 and a portion of chapter 17. The introductory verses do not agree with those in the MS described above (6254).

Beginning:—

वीरासनैकनिलयाय हिरण्मयाय
न्यग्रोधमूलघटिताय निटिलेक्षणाय ।
गङ्गाधराय गजचर्मविभूषणाय
प्राचीनपुण्यपुरुषाय नमः शिवाय ॥
नमामि कामेश्वरपादपङ्कजं
करोमि कामेश्वरपूजनं सदा ।
वदामि कामेश्वरनाम निर्मलं
स्मरामि कामेश्वरतत्त्वमव्ययम् ॥
अनन्ताख्यं गुरुं नौमि कवित्वप्रतिभाकरम् ।
शास्त्रवल्लीजलधरं स्फुरत्कीर्त्तिकरं परम् ॥
नत्वा श्रीशङ्कराचार्यचरणाम्भोरुहद्वयम् ।
काशीनाथः करोत्येतां टीकां मन्त्रमहोदधेः ॥

6257.

Mahīdāsa.

1116. **मातृकानिघण्टुः ।** *Mātṛkānighaṇṭu.*

Substance, country-made paper. 10 × 4½ inches. Folia, 4. Lines, 8 on a page. Extent in ślokas, 59. Character, Nāgara. Appearance, old. Complete in 59 verses.

MSS of the work, described in *Ulwar* 2291, Extr. 659 and CS. V. 65, do not contain the last verse giving the name of the author. IO. II. 1047, however, contains this verse. The edition of the work as published in the *Tantrik*

Texts (Vol. I, Calcutta, 1913, pp. 35–40) gives, in the last colophon, Mahīdhara as the name of the author, though the last verse gives the name as Mahīdāsa.

6258.

6079. *Mātṛkānighaṇṭu.*

Substance, country-made paper. 8 × 6 inches. Folia, 3, of which the first is missing. Lines, 11, 13 on a page. Character, Nāgara. Appearance, discoloured. Incomplete.

Same as above. The MS begins from the 20th verse.

6259.

7907. *Mātṛkānighaṇṭu.*

Substance, country-made paper. 10 × 4½ inches. Folia, 2. Lines, 13 on a page. Extent in ślokas, 58. Character, Nāgara. Date, Saṃvat 1889. Appearance, fresh. Complete in 58 verses.

A colophon after verse 53 attributes the work to Mahīdhara:—

इति श्रीमहीधरविरचितं मातृकानिघंटं संपूर्णम् ।

The verse attributing the work to Mahīdāsa is not found here.

After verse 58, two verses about yantras are found, apparently not belonging to this work. After this the date of copying is given :—

सम्वत् १८८९ शकाब्दा १७५४ आषाढ कृष्ण ३० गुरौ ॥ श्री-विश्वेश्वरो जयति ॥

6260.

8662. *Mātṛkānighaṇṭu.*

Substance, country-made paper. 12½ × 4½ inches. Folia, 3. Lines, 8 on a page. Extent in ślokas, 57. Character, Nāgara. Appearance, fresh. Complete in 57 verses.

The last two verses attributing the work to Mahīdāsa and referring the work to *Kādimata* are not found in this MS.

6261.

8666B. *Mātṛkānighaṇṭu.*

Substance, country-made yellow paper. 12 × 5 inches. Folium, 1. Lines, 19 in all. Extent in ślokas, 26. Character, Nāgara. Appearance, old. Incomplete.

This MS contains the first 26 verses of the work running up to the meanings of the letter *ch.*

6262.

Yadunandana Bhaṭṭācārya.

8144. **वर्णाभिधानम्** । *Varṇābhidhāna.*

Substance, country-made paper. 17½ × 3 inches. Folia, 7. Lines, 6 on a page. Extent in ślokas, 190. Character, Bengali. Date, Śaka 1640. Appearance, fresh. Complete.

MSS of the work described in L. II. 560 and IO. II. 1046 give the name of the author as Śrīnandana Bhaṭṭācārya. The edition of it as published in *Tantrik Texts* (Vol. I, Calcutta, 1913, pp. 5–22) does not refer to any author. The introduction to this edition (p. vi) refers to a tradition according to which the work is a part of the

Rudrayāmala. The concluding portion of the present MS, which is not found in the printed edition of the work, occurs where the latter comes to an end.

End:—

नादः ॥ अर्धमात्रा कला वाणी नादोर्धेन्दुः सदाशिवः ।
अनुच्चार्य्या तुरीया च विश्वमातृकला परा ॥
नमः ॥ नमो हृत्पूजनं न्यासः सन्नतिर्विनतिर्नतिः ।
भक्तिस्तथा मन्त्ररूपं वन्दनन्त्वभिवादनम् ॥
स्वाहा ॥ स्वाहा परा देवभोज्यं ठद्वयं चन्द्रयुग्मकम् ।
श्रवो हविर्महामाता देवाद्यं वह्निसुन्दरी ॥
वषट् ॥ शिखा वषट् शिरो मध्यं शक्रमाता हरिप्रिया ।
ॐ क्रोधाख्यो तनुत्रश्च शस्त्रास्त्ररिपुसंज्ञकः ॥
वौषट् ॥ नेत्रयुग्मं तथा वौषट् शक्रदैवतमेव च ॥
फट् ॥ शस्त्रास्त्रौ फट् छटिका स्यादङ्गान्तः सुखबाधकः ॥

Colophon:—

इति श्रीयदुनन्दनभट्टाचार्य्यविरचितं वर्णाभिधानं समाप्तं ।

Post-colophon Statement:—

शकाब्दा । १६४० ।

श्रीश्रीशाने दयाधाने चरणाब्जनने तव ।
श्रीकाशीरामकृतिना लिपिरेषा समर्पिता ॥

6263.

Vināyaka Śarman.

8415. वर्णाभिधानम् । *Varṇābhidhāna.*

Substance, country-made paper. 10 × 4½ inches. Folia, 6. Lines, 9-11 on a page. Extent in ślokas, 100. Character, Nāgara. Appearance, fresh. Complete.

Beginning:—

श्रीगणेशाय नमः ॥

वर्णैः पंचाशता स्यादिविभक्तैर्यामिविग्रहा(ः) ।
वाक्य + दाय मे भूयान्मात्रिका बिंदुमात्रिका ॥ १ ॥
वर्णाब्धिनिर्घटमालोक्य समुद्धृत्यागमान्तगात् ।
वर्णाभिधानं विदधे श्रीविनायकशर्म्मणा ॥ २ ॥
ॐकारस्य ध्रुवस्तारस्त्रिमात्रो वर्त्तुलस्त्रिकः ।
वेदादिः प्रणवः पञ्चदैवतस्य त्रिदैवतः ॥ ३ ॥
आदिबीजं बिन्दुशक्तिर्मात्रागुणबीजकं ।
साविन्यमन्थोमपरं गुण आदिरिति स्थितः ॥ ४ ॥ ॐ ॥
अ[ः] केशवः स्याच्छ्रीकण्ठो विष्णुरादीश्वरस्य मः ।
पूर्णोदरः समाख्यातः कीर्त्तिरप्येष कीर्त्तितः ॥ ५ ॥

End:—

तन्त्रोक्तफलसिद्धिस्तु भवेन्मन्त्रस्य गोपनात् ।
लब्ध्वागमवृत्तिसंकेतः शब्देन कृतवानतः ॥
आगमे सर्व्वतन्त्राणां निदेशं गुप्तये + + ॥

Colophon:

इति विनायकशर्मविरचितमागमविधा[नं] संपूर्णं ।

It gives the Tantric meanings of the letters of the alphabet, indicates the names of a number of bījamantras and ends with an explanation of the term *mantra*. The colophon calls the work *āgamavidhā* which seems to be a corruption of *āgamābhidhāna*.

6264.

Dakṣiṇāmūrti Muni.

2477. उद्धारकोषः । *Uddhārakoṣa.*

Substance, country-made paper. 5×3 inches. Folia, 68. Lines, 7 on a page. Extent in ślokas, 500. Character, Nāgara. Appearance, discoloured. Complete in seven kalpas.

Another MS of the work, in which the chapters are styled Paṭalas, has been described under 5990 above. For descriptions of several other MSS of the work, cf. L. VII 2343, CS. V. 5. The work was lithographed in Benares (Saṃvat 1924). The work gives the *mantras* required for the worship of various deities.

6265.

11337. *Uddhārakoṣa.*

Substance, country-made paper. 8 × 5 inches. Folia, 19. Lines, 13–17 on a page. Extent in ślokas, 500. Character, Nāgara. Appearance, good. Complete in seven chapters.

6266.

Anonymous.

11204. [तन्त्रनिबन्धः]। *A Tantra digest of unknown name.*

Substance, country-made paper. $10\frac{3}{4} \times 4\frac{1}{2}$ inches. Folia, 23. Lines, 10 on a page. Extent in ślokas, 350. Character, Nāgara. Appearance, fresh. Incomplete.

This is a compilation of Tantric texts on topics like the greatness of the preceptor, initiation, beads, seats, etc. Portions of it up to Fol. 13B closely agree with similar portions of the *Tantrasāra* of Kṛṣṇānanda, so much so that the latter would appear to have been incorporated here with occasional omissions here and there.

Topics dealt with in the work: -

1, [गुरुमाहात्म्यादि]; 4B, कुलाकुलचक्र; 5A, राशिचक्र; 6A, नक्षत्रचक्र; 8A, अकथहचक्र; 8B, अकडमचक्र; 9A, ऋणिधनिचक्र; 11A, दीक्षाकाल; 14A, मालानिर्णय; 16B, आसनभेद; 17B, देवतागायत्री; 19B, मन्त्रसंस्कार; 21A, यन्त्रसंस्कार; 22B, मालासंस्कार।

6267.

11354. *A Tantra digest of unknown name.*

Substance, country-made paper. 11 × 5 inches. Folia, 1–72. Lines, 11 on a page. Extent in ślokas, 2,300. Character, Newari. Appearance, old Incomplete.

This contains the *mantras, dhyānas, stavas* and *kavacas* of various deities. Sections contained in Fol. 62B–66B agree closely with those in the *Tantrasāra* of Kṛṣṇānanda.

Headings and colophons:

1, अथ पञ्चवक्त्राध्यानम्, इति जयद्रथयामले प्रत्यङ्गिराध्यानम्; 2A, इति जयद्रथयामले शिखाध्यानम्; 2B, ०सिद्धिलक्ष्मीध्यानम्; कालसङ्कर्षिणीतन्त्रे नवाक्षरीध्यानम्; 3B, इति हाहारावतन्त्रे गुह्यकालीध्यानम्; 4A, इति स्रोतशिरश्छेदे महातन्त्रे प्रत्यङ्गिरानिर्वाणाध्यानम्; 5A, इति श्रीजयद्रथयामले शिरश्छेदे भैरवस्रोतसि [शि]रश्छेदे चतुर्विंशतिसाहस्रविद्यापीठे तृतीयषट्के प्रत्यङ्गिरासहस्राक्षरीध्यानपटलः, इति श्रीचिदग्रडामले तृतीयषट्के सप्तदशमे पटले सिद्धिलक्ष्मीमन्त्रोद्धारः; 5B, इति चिदग्रडामले महातन्त्रे विपरीतप्रत्यङ्गिराध्यानमन्त्रपटलः, 8B, इति महिषमर्दिनीतन्त्रे संग्रामविजयमन्त्रम्; इति शिवागमगतराज्यप्र[द]मन्त्र[:]; 9A, इति हाहारावतन्त्रे चत्वारिंशः पटलः; 10A, इति श्रीविष्णुयामले गुह्यकालीप्रकरणे षोड़शाक्षरी एकैकाक्षरमहिमा द्वादशपटलः; इति श्रीमहाकालसंहितोक्तश्रीसिद्धिलक्ष्मीपञ्चसूत्रस्तोत्रपटलः; 10B, योगिनीतन्त्रे योगिनीगणसंख्या, इति कुब्जिकातन्त्रे कुब्जास्तोत्रम्; 11A, इति महारावतन्त्रे प्रत्यङ्गिलानवाक्षरीस्तोत्रम्; 11B, श्रीसिद्धियामले श्रीसिद्धिलक्ष्म्याः प्रत्यङ्गिरामन्त्रस्तवम्; 14B, ०पद्धतिपटलः; 15A, इति श्रीचिदग्रडामरे महातन्त्रे प्रत्यङ्गिरासहस्राक्षरीपटलः; 15B, इति जयद्रथे सिद्धिलक्ष्मीमालामन्त्रः; 16B, इति श्रीकालानलतन्त्रे सिद्धिलक्ष्मीसहस्राक्षरी; 17A, इति श्रीचिदग्रडामरे महायागे सिद्धिलक्ष्मीसिद्धिचण्डीस्तवः; 17B, इति [श्री]चिदग्रडामरे करवीरयागे शान्तिस्तोत्रम्; 19A, इति [श्री]चिदग्रडामरे करवीरे श्रीसिद्धिगाथावतारितश्रीसिद्धि-

लक्ष्मीमहामायास्तवम् ; 26A, इति श्रीउमायामले खड्गप्रस्तारे संग्रामविजयसमय-विद्योद्धारपटलः ; 30A, इति श्रीहंसमाहेश्वरीतन्त्रे भैरवभैरवीसंवादे त्रैलोक्य-मोहनं नाम श्रीसिद्धिलक्ष्मीकवचम् ; 36B, इति श्रीहाहारावतन्त्रे अथर्वणा-संहितायां गुह्यकालीपूजापटलः ; 37B, इति श्रीरुद्रयामले पञ्चमे कालीचक्रे नियमगुह्यकालिकासहस्राक्षरी ; 38B, इति श्रीकरवीरयागे षट्साहस्रिके कालिकाकवचम् ; 39B, इति श्रीसिद्धियामले सिद्धिलक्ष्मीसिद्धिस्तवम् ; 42B, इति श्रीचण्डिकारहस्ये चण्डीमहामाया ; 43B, इति श्रीभीमातन्त्रोक्ता उग्रचण्डा-सहस्राक्षरी ; 45A, इति श्रीकुब्जिकातन्त्रे दुर्गाकवचम् ; 45B, इति श्रीविश्व-सारे तन्त्रे दुर्गाशतनाम ; 46B, इति श्रीविश्वसारतन्त्रे महिषमर्दिन्याः कवचम् ; 47B, इति श्रीकुलचूडामणौ महिषमर्दिन्याः स्तोत्रम् ; 54A, इति श्रीरुद्रयामले श्रीनन्दिकेश्वरसंवादे श्रीभवानीसहस्रनाम ; 60B, इति श्रीमहाकारसंहितायां शारदीपूजाप्रयोगः ; 61B, इति कात्यायनीतन्त्रे कात्यायनीमन्त्रः ; 62B, इति महिषमर्दिनीतन्त्रे दुर्गामन्त्रम् ; अथ गुह्यकालीमहाविद्या ; 64A, इति चामुण्डा-तन्त्रे भद्रकालीमन्त्रः ; [अथ दुर्गामन्त्रः] ; 65A, अथ महिषमर्दिनीमन्त्राः ; 66A, अथ जयदुर्गामन्त्रः ; 66B, अथ शूलिनीमन्त्रः ; 67A, इति उग्रचण्डा-प्रकरणम् ; अथ महालक्ष्मीसहस्रनाम ।

6268.

5267. संक्षेपार्चा । *Saṃkṣepārcā.*

Substance, country-made yellow paper. 14½ × 3½ inches. Folia, 2. Lines, 7 on a page. Character, Bengali. Appearance, fresh. Complete.

The work deals with the daily obligatory worship of Śrīvidyā to be performed by one unable to go into details. It quotes from and refers to स्वतन्त्रतन्त्र, यामल (Fol. 1), नवरत्नेश्वर and विशुद्धसारस्वततन्त्र (Fol. 2).

Beginning:—

अथ संक्षेपतः सर्व्वासां देवतानां नित्यपूजाविधिर्लिख्यते ।

... ...

श्रीविद्यायास्तु संक्षेपः। तदुक्तं स्वतन्त्रतन्त्रे।
पूजाविशेषान् देवेशि शृणु नित्यक्रमोदितान्।
अशक्तानान्तु विस्तारे तथा चापतसु शस्यते॥
अन्यथानर्थकारि स्यात् संक्षेपार्चनमीश्वरि।
हेतिभिर्मध्यमाद्यं स्याद् द्वितीयं नवयोनिषु॥
चतुर्द्दशारावध्यन्यच्चतुर्थं प्रोक्तरूपतः।
पञ्चमं सर्व्वदुःखार्त्तिनाशनं वाञ्छितप्रदम्॥

अयमर्थः।

अशक्तानां हेतिभिर्मध्यमाद्यं स्यात् हेतुचतुष्टयसहितकामेश्वरीवज्रेश्वरीभगमालिनीश्रीमहात्रिपुरसुन्दरीदेवताचतुष्टयार्चनरूपमेतदाद्यार्चनमित्यर्थः। द्वितीयमाह नवयोनिष्विति। वशिन्यादिमध्यमान्तमिति। तृतीयार्चनमाह चतुर्द्दशारचक्रस्थितसर्व्वसंक्षोभिण्यादिमध्यमान्ता सपर्य्या तृतीया। चतुर्थं प्रोक्तरूपत इति तन्त्रप्रोक्तरूपेणेत्यर्थः षोड़शदलादिमध्यमान्तमिति यावत्। पञ्चमं भूगृहादिमध्यमान्तमिति यावत्। इति पञ्चप्रकारार्चा प्रोक्ता सर्व्वार्थसिद्धये॥

तत्रादौ भूतशुद्धिप्राणायामपुरःसरं करशुद्ध्यासनचतुष्टयाङ्गवशिन्यादिन्यासचतुष्टयं विधाय etc. etc.

6269.

3661. तन्त्रसंग्रहः। *Tantrasaṃgraha.*

Substance, palm leaf. 15½ × 1¾ inches. Folia, 16. Lines, 3 on a page. Character, Bengali. Appearance, old, soiled and worn out. Incomplete at the end.

It deals with the details of Tantric initiation, e.g., the characteristics of preceptor, the time for initiation, etc.

Beginning:—

नत्वा कालीपदद्वन्द्वं (वरन्दयुगलं) ब्रह्मादिसुरवाञ्छितम् ।
शिष्यस्य बोधनार्थाय क्रियते तन्त्रसंग्रहः ॥
+ + + मन्त्रञ्च लक्षणं गुरुशिष्ययोः
शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान् ।
शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् ॥

Of the works and authors referred to in this work, mention may be made of the following:—

1, ज्ञानार्णव; 4A, विद्याधराचार्य; 5A, चामुण्डातन्त्र, सिद्धसारस्वत; 6B, कल्पद्रुम; 7A, नारदीय; 12B, रुद्रयामल; 13B, गौतमीय; 15B, योगविश्वसार।

6270.

5331. सारावली। *Sārāvalī.*

Substance, country-made yellow paper. 19 × 3¼ inches. Folia, 43. Lines, 6 on a page. Character, Bengali. Appearance, fresh. Incomplete at the end.

The work deals with (Fol. 1–36A), the *pramāṇas* or authoritative texts on different rites in connection with initiation and describes the mode (*prayoga*) of performance of the rituals of initiation and the daily duties to be observed by the initiated.

Beginning:—

श्रीमन्महिष्टपदपङ्कजमिष्टलब्ध्यै
नत्वेष्टदायकमनिष्टविघातकञ्च ।
नानागमार्थमवगम्य गुरोर्निदेशात्
सारावलीं परहिताय तनोति कश्चित् ॥
मन्त्रा गुरोरधीना हि शैवाः शाक्ताश्च वैष्णवाः ।
वक्ष्येऽतो लक्षणं तस्य शिष्यस्यापि प्रसङ्गतः ॥

Of the various works and authors referred to in the work, mention may be made of the following:—

ज्ञानतन्त्र (1B, 12A), वैशम्पायनसंहिता (2A), तन्त्रसार (28A, 33B), रामार्चनचन्द्रिका (9B, 35A, 37A), वामकेश्वरतन्त्र (9B, 42B), रत्नावली (10A, 10B), विश्वसार (10A, 24B), योगिनीतन्त्र (10B), तारारहस्य (11A, 24A), विष्णुयामल (11B), सारसंग्रह (12A), तन्त्ररत्न (11B, 19A), योगिनीहृदय (12A), पिङ्गलामत (12B), मालिनीविजय (14B), तन्त्रराज (16A), राघवभट्ट (16B), तन्त्ररत्नधृतगवाक्षतन्त्र (19B), सिद्धेश्वरतन्त्र (20B), सङ्केततन्त्रोदय (23B), सिद्धसारस्वत (24A), शारदा (26B), क्रमदीपिका (29A), चन्द्रिका (36A).

6271.

10357. सर्व्वागमसारः । *Sarvāgamasāra.*

Substance, country-made paper. 10 × 5 inches. Folia, 14, of which the fourth is missing. Lines, 10 on a page. Extent in ślokas, 252. Character, Nāgara. Date, Saṃvat 1813. Appearance, discoloured. Complete.

This work deals with the details of initiation including the characteristics of the preceptor and the disciple, the ten *saṁskāras* of *mantras*, the purification of the rosary, *nyāsa*, *japa*, *homa* and *mudrā*.

Beginning:—

कुलीनः सर्व्वविद्यायामधिकारीति गीयते ।
दीक्ष[ा]प्रभुः स एवात्र सर्व्वमन्त्रस्य नापरः ॥
स्वेष्टदेवगुरु[ः] प्राज्ञो वनितापृजनोत्सुकः ।
नित्ये नैमित्तिके काम्ये रतः कर्म्मण्यनिन्दिते (स्वनंदिते) ॥

End:—

अथ चक्रमुद्रा ।

वामहस्ताङ्गुष्ठगर्भे कनिष्ठां दक्षिणां नयेत् ।
कनिष्ठागर्भके वामे दक्षिणाङ्गुष्ठं विनिक्षिपेत् ॥
अन्योन्ययोगतो देवि(ी) चक्रमुद्रेयमीरिता ॥

Colophon:—

इति श्रीसर्व्वआगमसार सम्पूर्णं ।

Post-colophon Statement:—

लीखतं जोसादय्याराम लषाइतं व्यासजी श्रीहरलालजी पीपलरामध्ये वासतव्यं संवत् १८१३ मीती श्रावण सुदे १५ वार भोमवार । श्रीरस्तु ॥

6272.

2895. भावचूड़ामणिः । *Bhāvacūḍāmaṇi.*

Substance, country-made yellow paper. $16\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 10. Lines, 5, 6, 7 on a page. Extent in ślokas, 200. Character, Bengali. Appearance, fresh.

The present MS contains the twelfth chapter of the work which is quoted in various digests but no MS of any part of which is reported in any Notice or Catalogue of Sanskrit MSS. This chapter describes the forms of worship known as *divya*, *vīra* and *paśu*. It is interspersed with quotations from नागभट्ट (Fol. 9B), अन्तर्यजनकाण्ड (7A), भगवान् दुर्वासाः (8A) and भगवद्वाक्य (8A).

Beginning:—

अथ भावचूड़ामणिः ।

भावानां वशमापन्नो भवेद्योगी महाकविः ।
तस्माद्भावं प्रवक्ष्यामि तदुक्तं भैरवेण च ॥

भैरव उवाच ।

समयाचारसंकेतं भावसंकेतमेव च ।
सूचितं तु महादेवि कथयस्वानुकम्पया ॥

सर्व्वमन्त्रेषु विद्यासु भावसंकेतमेव हि ।
इति सञ्चिन्त्य मनसा विशेषात् सर्व्वसिद्धिदम् ॥
रहस्यं न हि मन्त्राणां यदि भावो न विद्यते ।
मन्त्रसिद्धिः स्वतो न स्याज्जपहोमार्च्चनादिषु ॥

देव्युवाच ।

भावस्तु त्रिविधो देव दिव्यवीरपशुक्रमात् ।
गुरवश्च त्रिधा चैव तथैव मन्त्रदेवताः ॥
आद्यभावो महादेव श्रेयः सर्व्वसमृद्धिदः ।
द्वितीयो मध्यमः प्रोक्तस्तृतीयः सर्व्वनिन्दितः ॥
बहुजपात्तथा होमात् कायक्लेशादिविस्तरैः ।
न भावेन विना देव मन्त्रविद्याफलप्रदा ॥

Colophon:—

इति भावचूडामणौ भावनिर्णयो नाम द्वादशः पटलः ।

6273.

2771B. *Bhāvacūḍāmaṇi.*

Substance, country-made paper. 15 × 3½ inches. Folia, 4B–10. Lines, 7 on a page. Extent in ślokas, 180. Character, Bengali. Appearance, old. Incomplete.

The present MS contains the same chapter as found in the previous MS with the concluding portions missing. It comes up to the end of the last but one line of Fol. 10A of the previous MS, omitting the quotations found there. But the whole chapter looks like a quotation incorporated in some bigger work.

Beginning:—

अथ भावनिर्णयः ।

भावनावग्रसम्पन्नो भवेद्‌रागी महाकविः ।

इत्यादि सूचितं तद्विधिः कथ्यते ।

तदुक्तं भावचूड़ामणौ । भैरव उवाच ।

समयाचारसङ्केतं भावसङ्केतमेव च ।

6274.

4660. भावनिरूपणम् । *Bhāvanirūpaṇa.*

Substance, country-made paper. 12×5 inches. Folia, 8. Lines, 10 on a page. Extent in ślokas, 300. Character, Bengali. Appearance, discoloured. Complete.

It deals with the same topic as in the MS described above. It quotes from works like भावचूड़ामणि, निरुत्तरतन्त्र and कुब्जिकातन्त्र. On the obverse of Fol. 1 are found the introductory lines of a Tantric compilation—the तन्त्रचन्द्रिका of Rāmagati Sena—of which the present work may not unlikely be a part. These lines run:—

नत्वा गुरोश्चरणपङ्कजचारुरेणुं
संसारसागरसमुद्धरणैकसेतुम् ।
तन्त्रादिशास्त्रं परिलोक्य विशुद्धबुद्धिः
श्रीरामपूर्वगतिरत्र तनोति पुस्तीम् ॥
तन्त्रशास्त्राब्धिमालोड्य मुमुक्षूणां विमुक्तये ।
श्रीरामगतिसेनेन क्रियते तन्त्रचन्द्रिका ॥

Beginning:—

नमः श्रीनाथगुरवे । अथ भावनिरूपणम् ।

कुब्जिकातन्त्रे ।

देवदेव महादेव परमेश पुरातन ।
भावस्य श्रोतुमिच्छामि देवताया विशेषतः ॥
केन भावेन देवेश देवतासु प्रसीदति ।
भावस्य श्रोतुमिच्छामि कथ्यतां प्राणवल्लभ ॥

श्रीशिव उवाच ।

भद्रं भद्रं प्रवक्ष्यामि सावधानेन सुन्दरि ।
यं यं ज्ञात्वा विरिञ्चिश्च सृष्टिकर्त्ता न संशयः ॥
पालनं कुरुते विष्णुः रुद्रस्य नाशकः पुनः ।
जगद्वश्यश्च कुरुते यज्ज्ञात्वा साधकोत्तमः ॥
... ...
... ...
भावस्य त्रिविधो देवि दिव्यवीरपशुक्रमात् ।

भावचूड़ामणौ भैरव उवाच ।

समयाचारसंकेतं भावसंकेतमेव च ।
सूचितन्तु महादेवि कथयस्वानुकम्पया ॥
रहस्यानां हि मन्त्राणां यदि भावो न विद्यते ।
सिद्धिर्न जायते देवि सत्यं सत्यं हि शैलजे ॥

End:—

यथेक्षुगुड़माधुर्य्यं न परैर्ज्ञायते विभो ।
तथा भावविभावस्तु मनसा परिभाव्यते ॥
एक एव महाभावो नानात्वं जायते विभो ।
उपाधिभेदभावेन भावभेदो न इष्यते ॥

Colophon:—

इति भावनिरूपणम् ।

6275.

9926. महाविद्यानुमानम् । *Mahāvidyānumāna.*

Substance, country-made paper. $2\frac{1}{2} \times 5\frac{1}{2}$ inches. Folium, 1. Lines, 23 in all. Extent in ślokas, 30. Character, Nāgara. Appearance, tolerable. Complete.

It contains a polemic discussion about the logical interpretation of the term Mahāvidyā.

Beginning:—

ॐ श्रीगणाधिपतये नमः। ॐ श्रीविद्याप्रदातृभ्यो नमः।
स्वप्रकाशत्वसाधकमहाविद्यानुमानं स्पष्टीक्रियते यथामति। महती
विद्या महाविद्या तदुपयोग्यनुमानमपि तथा। विद्याया महत्त्वञ्च
द्वारात्यत्वरूपलाघवशालित्वे सति सिसाधयिषितार्थसाधकत्वम्।
तत्प्रयोजकः साध्यपदगतः श्लेषः। तत्र दृष्टान्तगता साध्यान्तर-
समत्वरूपा प्रसिद्धिर्द्वारभूता पक्षगता तु फलमिति विवेकः।

6276.

3173. ब्रह्मनिरूपणम् । *Brahmanirūpaṇa.*

Substance, country-made paper. 15×5 inches. Folia, 16. Lines, 12 on a page. Extent in ślokas, 650. Character, Bengali. Appearance, discoloured. Complete.

Beginning:—

येन रूपेण ब्रह्माण्डा जायन्ते शृणु तत् शिवे।
आकाशाज्जायते वायुर्वायोरुत्पद्यते रविः॥
रवेरुत्पद्यते तोयं तोयादुत्पद्यते मही।
पञ्चभूतैश्च ब्रह्माण्डा भवेयुः पर्व्वतात्मजाः॥
ब्रह्माण्डस्थापनार्थाय कूर्म्मपृष्ठे ह्यनन्तकः।
तन्मध्ये(?) वालुकाकारा ब्रह्माण्ड[ा] बहवः स्थिताः॥

कारण्ये (का)वारिमध्ये तु कूर्म्मश्चरति नित्यशः ।
अहमेव त्रिशूलेन पालयामि पुनः पुनः ॥

श्रीचण्डिकोवाच ।

किमाकारन्तु ब्रह्माण्डं तन्मे ब्रूहि महेश्वर(ः) ।
सृष्टिप्रकारं तन्मध्ये किमा[का]रं हि तत्त्ववित् ॥

श्रीशङ्कर उवाच ।

जम्बीराकारं ब्रह्माण्डं नानाविग्रहरूपकम् ।
ब्रह्माण्डं विग्रहं प्रोक्तं स्थूलसूक्ष्मादिकं हि यत् ॥
मेरुस्तन्मध्यके देवि तथा सप्त कुलाचलाः ।
मूलादिमस्तकान्तं वै सुमेरुर्नाम पर्व्वतः ॥
स्थिता मेरोरधोभागे अकुल्या ऊर्द्धदेशतः ।
भूर्लोकादि महेशानि सप्त स्वर्गाः क्रमेण हि ॥
ह्यकुल्यां सप्त पातालास्तिष्ठन्ति परमेश्वरि ।
सत्यलोके निराकारा महाज्योतिःस्वरूपिणी ॥
माययाच्छादितात्मानं चनकाकाररूपिणी ।
हस्तपादादिरहिता चन्द्रसूर्य्याग्निरूपिणी ॥
मया वन्दं नसतेय्य द्विधा भिन्ना जगन्मुखी ।
शिवशक्तिविभागेन जायते सृष्टिकल्पना ॥

इति ब्रह्मनिरूपणम् ।

शृणु देवि प्रवक्ष्यामि यथा सृष्टिः प्रजायते ।
सत्यलोके महाकाली महारुद्रेण संघटा ॥
चनकाकृतिविस्तारा चन्द्रसूर्य्याग्निरूपिका(ः) ।
अनादिपुरुषसंयुक्ता तदंशा जीवसंज्ञकाः ॥
ज्वलदग्निर्यथा देवि स्फुरन्ति विस्फुलिङ्गका[ः] ।
यस्यायुतं परं बिन्दुर्यथा भूमौ पतत्यपि ॥
तदेह सहसा देवि संज्ञायुक्तो भवत्यपि ।
शृणु देवि प्रवक्ष्यामि स्वरूद्रूपाख्यलक्षणम् ॥

मेरुपर्व्वतस्तन्मध्ये सर्व्वदेवाश्र · शिवे ।
महाघोरा नदी तत्र मध्ये देशे व्यवस्थिता ॥
सुमेरोस्त्वोर्द्धदेशे तु सत्यलोकं वरानने ।
अधोभागे महेशानि प्रतिष्ठितं रसातलम् ॥
एवं क्रमे मेरुमध्ये भुवनानि चतुर्द्दश ।
पाताला सप्तकस्योर्द्धे ब्रह्मपद्मं महेश्वरि ॥
अधोवक्त्रं हि तत् पद्मं घोरा मध्ये चतुर्द्दलम् ।
पद्ममध्ये बीजकोषे क्षितिचक्रं मनोहरम् ॥
वलयाकाररूपेण समुद्राः सप्त संस्थिताः ।
जम्बुद्वीपं मध्यदेशे चतुष्कोणं मनोहरम् ॥
त्रिकोणं मदनागारं कन्दर्पस्याधिदेवता ।
तत्स्वरूपं हिलबीजं गजेन्द्रवाहनं शिवे ॥
त्रिकोणे मदनागारे लिङ्गरूपो महेश्वर[ः] ।
मायाशक्तिर्महेशानि भुजगाकाररूपिणी ॥
तयैव वेष्टितं लिङ्गं सार्द्धत्रिवलयाकृति ।
लिङ्गच्छिद्रं स्ववक्त्रेण समाधित्य स्थिता सदा ॥
ऐन्द्रं बीजं वरारोहे लिङ्गस्य वामदेशके ।
सुसिद्धं ब्रह्मसदनं नादोपरि सुशोभनम् ॥
तत्रैव निवसेद्ब्रह्मा सृष्टिकर्त्ता प्रजापति[ः] ।
वामभागे च सावित्री वेदमाता सुरेश्वरी ॥
तस्याः प्रसादमात्रेण सृष्टिर्वितनुते सदा ।
यद्रूपं ब्रह्मसदनं लक्षयोजनविस्तृतम् ॥
तत् सर्व्वं परमेशानि ऋग्वेदाख्ये मयोदितम् ।
त्रिकोणे परमेशानि द्विषष्टितमकोष्ठकाः ॥
तदेव परतराः प्रोक्ताः सर्व्वदेवाश्रयं हि तत् ।
त्रिकोणमध्ये तद्ब्राह्म्ये पश्यापूर्व्वं वरानने ॥
स्थावरं पर्व्वतं पश्य कीटं पशुमनुत्तमम् ।
खगं लवादिकं तत्र नास्ति किं पृथिवीतले ॥

त्रिकोणबाह्ये गिरिजे पर्व्वतं बङ्गरूपकम् ।
नीलाचलं मन्दरञ्च पर्व्वतं चन्द्रशेखरम् ॥
हिमालयं सुमेरुञ्च मलयं भस्मपर्व्वतम् ।
चतुष्कोणे वसेद्देवि एतत् सप्तकुलाचलम् ॥
एतेषां शिखराज्जातं पर्व्वतं बङ्गरूपकम् ।
नानादेवालयं देवि तत्रैव दानवामयम् ॥
तृणगुल्मलतावल्लि नानारूपाणि तत्र वै ।
जायन्ते च म्रियन्ते च पूर्व्वोक्तेनैव वर्त्मना ॥
एतत्पद्मस्योर्द्ध्वदेशे भौमाख्यपङ्कजं शुभम् ।
पत्रषट्कं तथावृत्तं चतुर्द्वारविभूषितम् ॥
पद्ममध्ये बीजकोषे भुवर्लोकं मनोहरम् ।
सिन्दूरसदृशं रक्तवर्णेन शोभितं सदा ॥
सिन्दूरारक्तवर्णेन निर्म्मितं चक्रपाणिना ।
तस्योर्द्ध्वे निवसेद्विष्णुः श्रीवाणी वामदक्षिणे ॥
ब्रह्मणा सृज्यते लोकः पाल्यते चक्रपाणिना ।
वैकुण्ठं नाम तत् सर्व्वं (स्वर्गं) नानादेवालयं हि त[त्] ।
वैकुण्ठस्य दक्षभागे गोलकं सर्व्वमोहनम् ॥

Colophons:—

6B, इति श्रीचण्डिकाशङ्करसंवादे वृहच्छिव्वार्णतन्त्रे सत्यलोककथनं नाम सम्पूर्णम्; 9A, इति कालीतन्त्रे गुप्तचतुर्दशपटलः; 16B, इति कालीतन्त्रे आचारविधिरष्टमः पटलः ।

Though indicated as *Brahmanirūpaṇa* or *Brahmanirṇaya* on the left margins of the leaves, the work contains extracts from different Tantras treating of cosmology, cakras, *nāḍīs* and the worship of Śakti.

6277.

3458. मन्त्रमुक्तावली । *Mantramuktāvalī.*

Substance, country-made paper. 15 × 3½ inches. Folia, 58. Lines, 7 on a page. Extent in ślokas, 1,260. Character, Bengali. Appearance, discoloured. Incomplete.

The work begins on leaf 4B, the previous pages being taken up with the descriptions and illustrations of mystic diagrams called Ṛṇidhanicakra, Akathahacakra, Akaḍama-cakra, Rāśicakra and the Nakṣatracakra.

This gives the *mantras*, *dhyānas*, *stavas* and *kavacas* of various deities. Though a compilation, interlocutions, presumably quoted from other works, between Śiva and Pārvatī occur occasionally. It does not agree with the works of the same name described in IO. IV. 2852 and CS. V. 62.

Of the works quoted, mention should be made of the following:—

8A—ज्ञानयामल, 10A—यामलसार, 13B—आनन्दलहरी, श्रीकल्पसूत्र, 45B—कावेरीतन्त्र ।

Beginning:—

ॐ नमो गोपालाय ।

अनाद्यायाखिलाद्याय मायिने गतमायिने ।

अरूपाय स्वरूपाय शिवाय गुरवे नमः ॥

श्रीपार्व्वत्युवाच ।

भगवन् सर्व्वधर्म्मज्ञ सर्व्वागमविशारद ।

मन्त्रमुक्तावलिं देव कथयस्व कृपामय ॥

ब्रह्माद्यैरपि यद् गोप्यं यद् गोप्यममरैरपि ।
कथयस्व समासेन सर्व्वतन्त्रक्रमेण च ॥

ईश्वर उवाच ।

एकाग्रचित्तमना देवि पुराकृतक्रमेण च ।
सर्व्वतन्त्रं समालोच्य वक्ष्यामि हितकाम्यया ॥
शिवं भास्करं विष्णुञ्च गणेशादीन् क्रमेण च ।
सिद्धादिक्रमयोगेण वक्ष्यामि सारनिश्चयम् ॥
एकाक्षरे महामन्त्रे मालामन्त्रे तथैव च ।
स्वप्नलब्धे स्त्रिया दत्ते मित्रामित्रौ न शोधयेत् ॥

Colophons of the different chapters:—

7A, इति श्रीमन्त्रमुक्तावल्यां गणेशस्य प्रथमः पटलः ; 8B, ०श्रीसूर्य्यस्य मन्त्रध्यानन्यासकवचनिरूपणं द्वितीयः पटलः ; 10A, इति श्रीपार्व्वतीमहेशसंवादे गालवोपाख्याने मन्त्रमुक्तावल्यां तृतीयपटलः ; 12A, इति मन्त्रमुक्तावल्यां चतुर्थ-पटलः ; 13A, ० [मञ्जु]घोषस्य कवचराजकथने पञ्चमः पटलः ; 15A, ० श्री-विद्याश्रीबालाकथने षष्ठः पटलः ; 16B, ० सप्तमपटलः ; 17B, ०उत्तरयामले कामोदतन्त्रोक्तश्रीआगममहार्णवोक्त-च्यासुसिद्धिसाधनं नामाष्टमः पटलः ; 19B, इति श्रीमन्त्रमुक्तावल्यां श्रीमन्महेशविरचितं रुद्रयामलोक्तभुवनेश्वरीकवचं नाम नवमपटलः ; 24A, ०रुद्रयामलोक्तं भुवनेश्वर्य्याः सहस्रनामस्तवं सम्पूर्णम् ; 25A, ० दशमपटलः ; 29A, इति मन्त्रमुक्तावल्यां मन्त्रपूजासङ्केतं नाम एकादश-पटलः ; 33B, ० स्तवकवचविधानं नाम द्वादशपटलः ; 37A, ०योगेश्वरीमन्त्र-पूजासंकेतं श्यामामन्त्रपूजासङ्केतं नाम त्रयोदशः पटलः ; 43A, इति श्रीमहाभैरवो-पाख्याने मन्त्रमुक्तावल्यां छिन्नमस्ताकवचम् ; 45A ० चतुर्दशपटलः ; 47B, इति मन्त्रमुक्तावल्यां पञ्चदशपटलः ; 52B, ०षोडशपटलः समाप्तः ।

The 17th chapter which gives the 1,000 names of Chhinnamastā runs up to Fol. 57B but is not complete. After this Fol. there is another Fol., not numbered, containing three lines which belong to the 10th chapter, the colophon of which is also given there.

6278.

4706E. मन्त्रमाला। *Mantramālā.*

Substance, country-made paper. 13×4½ inches. Folia, 25B–42A. Lines, 8 on a page. Extent in ślokas, 300. Character, Bengali. Appearance, old. Complete.

This contains a collection of *mantras* meant for particular deities and rites, generally in the order followed in the *Tantrasāra*. Descriptions of *Ṛṣi*, *nyāsa* and *dhyāna*, though promised, are not usually given. A number of *dhyānas*, however, are found on Fol. 42–43B of this MS. These belong to Bhuvaneśvarī, Annapūrṇā, Padmāvatī, Jayadurgā, Durgā and Lakṣmī.

Beginning:—

नमामि सद्गुरुं शान्तं प्रत्यक्षं कुलनायकम्।
यस्य प्रसादमासाद्य तरणं भवसागरात्॥
आदौ मन्त्राक्षरं पश्चादृणिधणिक्रमेण च।
अष्टावर्णिष्टं सङ्ख्याङ्कं तथा पिङ्गलसम्मतम्॥
ऋषिन्यासध्यानकानि पौरश्चारणिकं तथा।
कथयिष्याम्यशेषेण परिभाष्य पुनः पुनः॥

अथ भुवनेश्वरी। ह्रीं १।४।४।३२। लक्ष॥ ऐं ह्रीं ऐं ३।४।८।१०। लक्ष॥ केचित्तु २४ लक्ष॥

Colophon:—

इति मन्त्रमाला समाप्ता।

6279.

5733. मन्त्रपद्धतिः। *Mantrapaddhati.*

Substance, country-made paper. 14½×6 inches. Folia (by counting), 24, marked 1 to 6, 18, 24, 27, 28, 29, 31. 36, 42, 49, 50, 57–62. There are two leaves without leaf-marks. Lines, 15, 16 on a page. Character, Nāgara. Appearance, old, worn out and discoloured. Fragmentary.

On a modern piece of paper, pasted on the obverse of the first Fol., the name of the work is given in a later hand as दशावतारादिमन्त्रपद्धति. The fragments preserved deal with *bhūtaśuddhi*, *nyāsa* of different types, *puraścaraṇa*, initiation and the worship of Vaiṣṇavite deities.

Beginning:—

+ + कमलपत्राक्षं वेणुवादनतत्परम् ।
देवकीनन्दनं + + कृष्णं गोपालरूपिणम् ॥
नमोऽस्तु + + + +
+ + + + +
अथ वक्ष्यामि मन्त्रस्य पद्धतिं नातिविस्तराम् ।
स्फुटं सिद्धिप्रदां पुंसां भुक्तिमुक्तिप्रदायिनीम् ॥

Colophons:—

3A, इति मन्त्रपद्धतौ भूतशुद्धिर्नाम प्रथमः कल्पः; 29A, इति मन्त्रपद्धत्यां चाक्षादिपुरश्चरणकथनं नाम सप्तमः कल्पः ।

6280.

5918. **मन्त्रपारायणक्रमः ।** *Mantrapārāyaṇakrama.*

Substance, country-made paper. 9 × 4¼ inches. Folia, 16. Lines, 8 on a page. Extent in ślokas, 272. Character, Nāgara. Date, Saṃvat 1819. Appearance, old and discoloured. Complete.

This deals with the rules and procedure for *mantra-pārāyaṇa* or the muttering of *mantras*.

Beginning:—

अथ मन्त्रपारायणक्रमः । स तु श्रीधर्माचार्यैः स्वकीये लघुस्तवे मायाकुण्डलिनीत्यादिश्लोके सूचितः ।

यथा ।

माया कुण्डलिनी क्रिया मधुमती काली कलामालिनी
मातङ्गी विजया भगवती देवी शिवा शाम्भवी ।
शक्तिः शङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी
ह्रींकारी त्रिपुरा परापरमयी माता कुमारीत्यसीति ॥ १ ॥

माया ह्रीं, कुण्डलिनी ऐं, क्रिया क्लीं, मधुमती शुद्धा विन्दुयुता विसर्गयुक्ता चेति चतुर्विधमातृकाः । काल्यादीनि दश नामानि शक्त्या द्वादशविद्या एभिः श्रीमूलविद्यायाः श्रीमदाराध्यचरणकृपा-प्राप्तो मन्त्रपारायणक्रमः प्रदर्श्यते ।

तत्र कृतप्रातराह्निकक्रियो विविक्ते स्थाने स्वासनमास्तीर्य्य ह्रीं आधारशक्तिकमलासनाय नमः इति तत् संपूज्य तत्र प्राङ्मुख उपविश्य गुरुगणपति + + + प्रणम्य मूलविद्यया प्राणायामं कृत्वा संक्षेपतः कृत्वा संक्षेपतो भूतशुद्धिं कृत्वा गणपतिमातृकान्यासं मूलविद्याया ऋष्यादिकरषडङ्गन्यासं + + + देवतकरन्यासं च विधाय देवीं ध्यात्वा मानसैरुपचारैः श्रीपरदेवतात्मकपारायण-जपमारभे । तत्र तावत् मूलविद्या ह्रीं अ काली सौः । मूल ह्रीं आ काली सौः । मू० ह्रीं इ काली सौः । मूल ह्रीं ई काली सौः । मू० ह्रीं उ काली सौः ।

Colophon :—

14B, इति मन्त्रपारायणक्रमः ।

This colophon is followed by 28 verses which speak of *Antyayāga* :—

अथातो वक्ष्ये संक्षेपादन्त्ययागविधिक्रमम् ।
साधकानां च सिद्धानां दीक्षितानां शिवागमे ॥
दीक्षितास्त्रिविधाः प्रोक्ता उत्तमाधममध्यमाः ।
तत्रोत्तमस्य नान्त्येष्टिः सर्व्वोत्तीर्णात्मदर्शनात् ॥

अधमस्यापि नान्त्येष्टिर्मोचिका पापयोगनात् ।
पारिशेष्यादथान्त्येष्टिः मध्यमस्येति नः स्थितिः ॥

This portion of the manuscript ends without any colophon, but with a date:—

संवत् १८१६ मौती भादो सुदी ७ वार सनीचर ।

6281.

9309. गायत्रीमाला । *Gāyatrīmālā.*

Substance, country-made paper. 8½ × 5 inches. Folia, 10. Lines, 10 on a page. Extent in ślokas, 130. Character, Nāgara. Appearance, old. Complete.

This MS contains the gāyatrīs of Brahman, Viṣṇu, Rudra, Mahālakṣmī, Nṛsiṃha, Lakṣmaṇa, Kṛṣṇa, Gopāla, Paraśurāma, Tulasī, Hanumān, Garuḍa, Agni, Pṛthvī, Jala, Ākāśa, Sūrya, Candra, Guru, Paramahaṃsa, Pavana, Haṃsa, Gaurī, Devī, numbering 24 in all.

Colophon:—

इति श्रीचौविस गायत्री सम्पूर्णा । शुभमस्तु ।

6282.

10250. बलिदानमन्त्रः । *Balidānamantra.*

Substance, country-made paper. 7 × 4½ inches. Folia, 2. Lines, 7 on a page. Character, Nāgara. Appearance, fresh. Complete.

This contains the *mantras* in connection with offerings to Vaṭuka, Kṣetrapāla, Yoginī and Gaṇapati.

6283.

9153. **वीरभद्रतन्त्रोक्तप्रयोगः ।** *Vīrabhadratantroktaprayoga.*

Substance, country-made paper. 13 × 6 inches. Folia, 7. Lines, 13 on a page. Extent in ślokas, 175. Character, Nāgara. Appearance, old. Complete.

This MS contains a number of *mantras* the applications of which in magical rites are indicated in Hindi. The *mantras* appear to be taken from the *Vīrabhadratantra*, colophons of the first four chapters of which are found here (Fol. 3A, 4A, 5B, 6B).

Beginning:—

अथ शिवशिवासंवादे वीरभद्रतन्त्रोक्तप्रयोगः ।

6284.

7856. **मन्त्रशुद्धिप्रकरणम् ।** *Mantraśuddhiprakaraṇa.*

Substance, country-made paper. $12\frac{1}{4} \times 4\frac{3}{4}$ inches. Folia, 10. Lines, 12 on a page. Character, Nāgara. Appearance, fresh. Incomplete.

It describes how *mantras* favourable for particular individuals are to be determined.

Beginning:—

अथ मन्त्रशुद्धिप्रकरणम् ।

मन्त्राणां तत्तचक्राविरुद्धत्वमेवेह शुद्धिः ।

निबन्धे ।

साधकानां शीघ्रसिद्धौ मन्त्रशुद्धिमथो ब्रुवे ।

स्वताराराशिकोष्ठानामनुकूलान् भजेन्मनून् ॥

... ...

... ...

बौद्धमन्त्रा जैनमन्त्रा नैषु सिद्धादिशोधनं ।
एतद्भिन्नेषु मन्त्रेषु शुद्धिरावश्यकी मता ॥

6285.

10333. आम्नायः । *Āmnāya.*

Substance, country-made paper. $6\frac{1}{2} \times 4$ inches. Folia, 41. Lines, 7 on a page. Extent in ślokas, 260. Character, Nāgara. Appearance, discoloured. Complete.

This contains *mantras* for the worship of various deities.

Beginning:—

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।
वीरान् द्व्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥
पूर्वं दक्षिणपश्चिमोत्तरमनुं चोर्द्धं ततोनुत्तरं
स्रोतद्वन्द्वपरागुरूंश्च चरणान् रक्तादिमिश्रान्तकान् ।
पञ्चाम्बा नवनाथषोडशषडाधारं च षड्दर्शनं
वागाद्यष्टकसप्तविंशतिरहस्यान्तान् न्यसेत् पूजयेत् ॥

Colophons of the different chapters:—

4A, इति पूर्वाम्नायः; 6B, इति दक्षिणाम्नायः; 10A, इति पश्चिमाम्नायः; 11B, इत्युत्तराम्नायः; 13A, इत्यूर्द्धाम्नायः; 13B, इति दिव्यौघः; इति सिद्धौघः; 14A, इति मानवौघः, इत्यूर्द्धौघः; इति दिव्यौघः; इति सिद्धौघः; 14B, इति मानवौघः; इति परौघः; 15A, इति दिव्यौघः, इति सिद्धौघः; 15B, इति मानवौघः; इति कामराजौघः; इति दिव्यौघः; इति सिद्धौघ; 16A, इति मानवौघः; इति लोपामुद्रौघः; 17A, इति कामराजविद्याचरणवासना; 17B, इति लोपामुद्राविद्याचरणवासना; 18A, इति स्रोतश्चरणवासना; 19B, इति शाम्भवचरणविद्याः; 20A, इति शाम्भवचरणवासना; 21A, इति परापादुकाक्रमः; 21B, इति लोपामुद्रापादुकाक्रमः; 22A, इति दिव्यौघः; 22B, इति

सिद्धौघः ; 23A, इति मानवौघः ; इति पारम्पर्य्यम् ; 25A, इति महापादुका ; 28B, इति सप्तविंशतिरहस्यानि ; 29A, इति पञ्चाम्बाः ; 29B, इति नवनाथाः ; 32B, इति षडाधारविद्याः ; 33A, षडध्वविद्याः ; 33B, इति षड्दर्शनविद्याः ; 34A, इति वाग्देवताष्टकम् ; 34B, इति षड्योगिनीविद्याः ; 37A, इति नित्यामन्त्राः ; 39A, इति पञ्चपञ्चिकाः ; 40B, चक्रे[श्व]रीविद्याः ; 41A, इत्यखिलमन्त्राः । इति श्रीआम्नायः समाप्तः ।

Post-colophon Statement:—

इदं पुस्तकं कोतपल्युपनामकचिन्तामणिमणिशर्म्मणेन लिखितं । श्रीगुरुचरणारविन्दार्पणमस्तु ॥ संवत् १८९६ पौष्य शुद्ध १४ शुक्रवासरे समाप्तः शुभं ॥

6286.

6550. *Āmnāya.*

Substance, country-made paper. 11¾ × 3¾ inches. Folia, 17. Lines, 7 on a page. Extent in ślokas, 300. Character, Nāgara. Appearance, fresh. Complete.

In the last colophon the work is called *Amnāyaprakāśa*, the word *prakāśa* being added in a later hand. This agrees closely (though not fully) with the work of the same name described above.

Post-colophon Statement:—

श्रीललिताम्बार्पणमस्तु । श्रीदक्षिणाचारमतप्रवर्त्तककाशीनाथभट्टभड्डेन लिखितमिदं । श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः । श्रीअन्नपूर्णायै नमः । श्रीकालभैरवाय नमः ।

6287.

10356. माहेश्वरी विद्या । *Māheśvarīvidyā.*

Substance, country-made paper. 9 × 5½ inches. Folia, 4, marked 4, 5, 7, 8. Lines, 14–16 on a page. Extent in ślokas, 110. Character, Nāgara Date, Saṃvat 1814. Appearance, discoloured. Incomplete.

This contains a number of magical *mantras*. Along with this is found one leaf of the *Nṛsiṃhasahasranāma* (*Stotraratnamālā*, Madras, 1927, Vol. I, pp. 418ff).

Colophon:—

इति श्रीआगमोक्तमहामाहेश्वरी महाविद्या चक्रेश्वरी ।

Post-colophon Statement:—

श्रीसंवत् १८२४ ॥ शाके शोला १६७९ ॥ एदं पुस्तकं लिषायत व्यासजी श्री५ हरलालजी । लिषत्तं जोसी दयाराम ॥ वासतव्य पीपलादमध्ये ॥

6288.

11338. [निर्वाणमन्त्राः] । *Nirvāṇamantra.*

Substance, country-made paper. 8½ × 4½ inches. Folia, 8. Lines, 7 on a page. Extent in ślokas, 75. Character, Nāgara. Appearance, fresh. Complete.

This gives the application of six *mantras* associated with the six *āmnāyas*.

Beginning:—

अस्य श्रीनिर्वाणमहासंवर्तानन्दनाथनिर्वाणमन्त्रस्य कालाग्निरुद्र ऋषिः बृहतीछन्दः श्रीनिर्वाणदक्षिणाकालिका देवता हसौ शक्तिः ह्रौ कीलकं योगमोक्षसिद्ध्यर्थे विनियोगः ।

6289.

10189. मन्त्रसंग्रहः । *Mantrasaṃgraha.*

Substance, country-made paper. 12 × 4½ inches. Folia, 20, of which Fol. 3 is missing. Lines, 11 on a page. Extent in ślokas, 740. Character, Nāgara. Date, Saṃvat 1837. Appearance, discoloured and worn out. Complete.

It relates to the black rites of the Tantras and contains *mantras* in Hindi. After the fifth chapter there is a section on *dhārācakra*.

Beginning:—

महादेवं नमस्कृत्य गिरिजाङ्गविभूषितम् ।
सर्व्वकामप्रदातारं सावरोयं प्रलिख्यते ॥
... ...
भाषा संस्कृतयुक्तोयं सबीजो गोप्यश्च सर्व्वदा ।
तं सर्व्वं कथयिष्यामि प्रत्यक्षं भुवि कामदम् ॥
... ...
... ...

अथ बाबा आदममन्त्र। गुरुसत्य विस्मिदचाहंकाफजोमिगावनकार० आदिगरु-इष्टिकरतारवेदनहरंज + हियको आ जुग चारि वेद चजु पांच पाण्डव छव मार साह समुद्र आठ वसु नव ग्रह दश एवनस्क गारह रुद्र बारह राशि तेरह चमोल चोदहइ भुवन पंद्रह तिथि......।

Colophons of the different chapters:—

4B, इति श्रीशावरतन्त्रे मन्त्रसंग्रहे भानुमत्यादिदेवीचरिते प्रेताच्छान्युप[श]मनपर्य्यन्तः प्रथमः प्रका[शः] ।

8B, ०भानुमतीसोनचिर-इयाकवुत्तरकलाप-उपदेशाच्छरीर[व्याधु]पशमन द्वितीयः प्रकाशः ।

11B, ०भानुमतीसोणाचरी-आकवुन्तरकालोपदेशबंधमोक्षपटोद्घाटनपसुररक्षागर्भमोचनबालकरक्षादिप्रयोगस्तृतीयः प्रकाशः ।

15B, ०भानुमतिसोनाचर उआकवुन्तरकलापदेशस्थावरजंगमोपविषोपशमनादिप्रयोग एव चतुर्थप्रकाशः ।

19A, ०उर्ज्जामदविचित्रकलोपदेशान्मोहनमारणोच्चाटनोद्वेषादि पंच प्रकाशः।

Post-colophon Statement:—

शुभ सम्बत् १८३७ समेनाम श्रावण सुदि द्वादशी वार शुक्रवार पूर्व्वाह्नवेलायां उल्लेषितं ।

6290.

10031. *Mantrasaṃgraha.*

Substance, country-made paper. 6½ × 5 inches. Folia, 54. Lines, 8-9 on a page. Extent in ślokas, 700. Character, Nāgara. Appearance, fresh. Complete.

In the present as well as the following MS, the fourth and fifth chapters are referred to, presumably through inadvertence, as the third and fourth. The section on *dhārācakra* is attributed in these MSS to Gorakṣanātha.

This and the following two MSS have a different beginning which runs :—

अथ भूतावेशलक्षणम् । आदित्यहृदयात् ।

कृष्ण उवाच—

राक्षसेनाभिभूतस्य विकारं शृणु पाण्डव ।
गायते नृत्यते नग्न आस्फोटयति धावति ॥

6291.

10544. *Mantrasaṃgraha.*

Substance, country-made paper. 11 × 5 inches. Folia, 27. Lines, 9–11 on a page. Extent in ślokas, 650. Character, Nāgara. Appearance, discoloured. Complete.

The concluding portion of the second chapter along with its colophon is absent in the present MS.

6292.

10436. *Mantrasaṃgraha.*

Substance, country-made paper. 10½ × 4½ inches. Folia, 8. Lines, 8, 9 on a page. Extent in ślokas, 144. Character, Nāgara. Appearance, fresh, though worn out. Incomplete.

The present MS contains only the first chapter of the work.

6293.

1172B. वर्णकोषः। *Varṇakoṣa.*

Substance, country-made paper. 10 × 4 inches. Folia, 10B–16. Lines, 7 on a page. Extent in ślokas, 85. Character, Nāgara. Appearance, old. Incomplete.

The work is called *Varṇakoṣa* in the first stanza and referred to by the same name in one of the introductory lines while the other, apparently through inadvertence, calls it *Bījakoṣa.* The work gives a list of words used in the Tantras to indicate the different letters of the alphabet. The present MS runs up to the letter ल.

Beginning:—

अथ वर्णकोष उच्यते। श्रीगणेशाय नमः। अथ बीजकोषः।
नत्वा भगवतीं दृष्ट्वा श्रीविनायकसंहितां।
तन्त्रोद्धारसुबोधाय वर्णकोषः प्रतन्यते॥
अकारः केशवो विष्णुः श्रीकण्ठः कीर्त्तिरेव च।
पर्णोदरी महाब्राह्मी स्वरादिर्ब्राह्मणो मृगः॥

6294.

180. मातृकाकोषः। *Mātṛkākoṣa.*

Substance, machine-made paper. 17 × 5 inches. Folia, 3. Lines, 10 on a page. Extent in ślokas, 70. Character, Bengali. Date, 1727 Ś.E. Appearance, tolerable. Complete.

The present MS has been described in L. I. 425. The work is of the same nature as the one described above.

Beginning:—

उद्यत्प्रद्योतनप्रख्यमतर्क्यगुणवैभवम् ।
स्वेरमास्यमम्बाया ह्यङ्कस्थं नौमि भूतये ॥
श्रीमच्चतुर्भुजाचार्य्यचरणाम्बुरुहद्वयम् ।
नत्वा संक्षेपतो वक्ष्ये मातृकाकोषमद्भुतम् ॥
ॐकारः प्रणवस्तारस्तारको ज्योतिरादिमः ।

End:—

संक्षेपात् मातृकावर्णनामान्येतान्यनुक्रमात् ।
साधूपकृतये सम्यक् प्रोक्तानि विदुषां मुदे ॥
अयन्तु मातृकाकोषः सर्व्वकोषोत्तमोत्तमः ।
धारणादस्य मन्त्राणां भवेदुद्धरणे क्षमः ॥

Post-colophon Statement:—

शकाब्दाः १७२७

6295.

9652. **बीजवर्णसङ्केतः ।** *Bījavarṇasaṃketa.*

Substance, country-made paper. 10¾ × 5¼ inches. Folia, 2. Lines, 10 on a page. Extent in ślokas, 55 Character, Nāgara. Date, Saṃvat 1913. Appearance, old. Complete.

This work describes a number of *bījas* and contains a list of words used in the Tantras for the letters of the alphabet.

Beginning:—

ॐ श्रीगणेशाय नमः ।

तत्रादौ बीजवर्णानां सङ्केतः स्फुटमुच्यते ।
ग्रन्थं प्रवर्त्तयेत्तच्च त्वन्तायादि न पूर्व्वभाक् ॥ १ ॥
वर्णाक्षरं रश्मिवर्णः स्वरास्तु कथिताश्च च ।
व्यञ्जनानि हलो वर्णाः कादयोऽष्टौ प्रकीर्त्तिताः ॥ २ ॥

कादीनि पञ्च पञ्चैव चतुष्कं यादि शादि च ।
लादिद्वयश्च मालायां स्वरैराद्योनलादिकः । ३ ।

End:—

अकुलो नकुलीशश्च हंसशून्यश्च शाकिनी ।
अनन्तो नकुलीबीजं परमात्मा ललाटजः ।
ह्रस्तु सर्वर्त्तको शान्तो वर्णान्तोन्तश्च लोहितः ॥

Post-colophon Statement:—

सं० १९१३ मार्ग सुदि ।

After the colophon there are a few lines about *mālāsaṁskāra.*

6296.

1172A. बीजकोषः । *Bījakoṣa.*

Substance, country-made paper. 10 × 4 inches. Folia, 3–10. Lines, 7 on a page. Extent in ślokas, 60. Character, Nāgara. Appearance, old. Complete.

The earlier portion of the MS appears to have contained another work of which the colophon is found in the beginning of the present MS:—

[मा]टकावर्णनिर्घण्टः समाप्तः । मन्त्रमहोदध्यनुसारी ।

The present work which describes various *bījas* begins with the four stanzas occurring at the beginning of *Prakārāntaramantrābhidhāna* (Tantrik Texts, Vol. I, pp. 5ff). These are followed by the verses quoted below:—

अव्यक्तश्च त्रिमात्रश्च मूलज्योतिः शिवोऽव्ययः ।
प्रकाशं ॥ ॐ ॥

शिवचन्द्रशिवैः शक्तः स्वरोपेतैः सबिन्दुभिः ।
महाप्रेतमिति ख्यातं मन्त्रसिद्धिप्रदायकम् ॥
प्रकाशं + ॥

तृतीयबीजं तत्प्रोक्तं प्रेतबीजं सुखावहम् ।
हयग्रीवस्य बीजं तत् भुक्तिप्रसादसङ्कृतम् ॥ ह्स्ँौ ॥

End:—

संवर्तो दक्षनेत्राद्यो बिन्दुनादविभूषितः ।
गारुडं बीजमाख्यातं शिवं सर्वविषापहम् ॥ क्ष्रौं ॥
हंसप्राणाख्यजपा प्राणवायुः स एव हि ॥ हंसः ॥

Colophon:—

इति बीजकोषः समाप्तः ।

6297.

9158. *Bījakoṣa.*

Substance, country-made paper. 11½ × 5½ inches. Folia, 3. Lines, 14. Extent in ślokas, 80. Character, Nāgara. Date, Saṃvat 1815. Appearance, tolerable. Complete.

This work gives the names and forms of the various *bījas* used in the Tantras.

Beginning:—

श्रीगणेशाय नमः । अथ बीजकोषः ।

ॐ प्रणव तार अक्षर तोमा त्र्यम्बक त्रासतारकवेदादि इति प्रणवनाम । श्रीं । लक्ष्मी पद्मा हरिणाक्षी सरोरुहकमला रुक्मणी इमे हरिप्रिया इति लक्ष्मीबीजनाम । ह्रीं पराभूति लज्जा माया सकला शक्ति सत्ता क्षमा देवी प्रणव इति लज्जाबीजनाम । क्लीं कामराज पञ्चेषु मदन मन्मथ मार प्रद्युम्न कन्दर्प इति कामराजबीजनाम । ऐं वाग्भवं ऊर्द्ध्वबीजं परां पाशिकेश्वरं चन्द्रचर्मवसना पार्वती इति वाग्भवबीजनाम ।

End:—

ह्रां छवि कान्ति शोभा सुषमा इति छविबीजनाम। वीँ अभ्रं जीमूत अम्बुभृत् अवलं घन इति अभ्रबीजनाम।
वर्णानां देवदेवेशि कोशं प्रोक्तं मया शिवे।
नाभामन्त्रमयुक्तं देवि सर्व्वागमविनिश्चितम् ॥ १ ॥

Colophon:—

इति बीजकोश सम्पूर्णं ॥

Post-colophon Statement:—

श्रीसं० १८२५ ज्यैष्ठे कृष्णपक्षे त्रयोदश।

6298.

9101. *Bījakoṣa.*

Substance, country-made paper. 10×6 inches. Folia, 11. Lines, 5 on a page. Extent in ślokas, 55. Appearance, fresh. Character, Nāgara. Complete.

Unlike other works of the same name, the present work contains only a collection of names.

Beginning:—

प्रणव। १। वागभव। २। माया। ३। लक्ष्मी। ४। काम। ५। पाश। ६। कला। ७। गरुड़। ८। अङ्कुश। ९। काली। १०। सिद्धा। धर्म। जया। हयग्रीव। गौरी। साध्य। वधू। महाक्रोध।

B. Works dealing with particular deities.

I. Śakti.

(1) Kālī.

Pūrṇānanda.

6299.

811. श्यामारहस्यम् । *Śyāmārahasya.*

Substance, country-made paper. 14¼ × 3 inches. Folia, 118. Lines, 6 on a page. Extent in ślokas, 2,700. Character, Bengali. Appearance, old and repaired. Incomplete.

The present MS runs up to the end of the 18th chapter. MSS of the work, complete in 22 chapters, have been described in IO. IV. 2597, L. II. 591. The work has been published in the *Vividhatantrasaṃgraha* and by Prabodh Chandra Pal and Brothers (Calcutta, Saṃvat 1948).

6300.

3880. *Śyāmārahasya.*

Substance, country-made paper. 15 × 4 inches. Folia, 159. Lines, 7, 8 on a page. Extent in ślokas, 3,560. Character, Bengali. Appearance, old and discoloured. Complete in 22 chapters.

6301.

4510. *Śyāmārahasya.*

Substance, country-made paper. 19 × 3 inches. Folia, 97. Lines, 6 on a page. Extent in ślokas, 2,700. Character, Bengali. Date, Śaka 1713. Appearance, fresh. Incomplete with 18 chapters.

Post-colophon Statement:—

श्रीअनन्तराम शर्म्मणः स्वाक्षरं पुस्तकश्च ।

शकाब्दा १७१३ ।

6302.

9345. *Śyāmārahasya.*

Substance, country-made paper. 9½ × 4 inches. Folia, 35. Lines, 8 on a page. Extent in ślokas, 420. Character, Nāgara. Appearance, tolerable. Incomplete.

This MS contains the first two chapters and a portion of the third.

Kāśīnātha Tarkālaṅkāra.

6303.

3177. श्यामासपर्य्याविधिः । *Śyāmāsaparyāvidhi.*

Substance, machine-made paper. 12½ × 4¼ inches. Folia, 47. Lines, 12 on a page. Character, Bengali. Appearance, fresh. Incomplete.

The work deals with the details of the worship of Kālī. A manuscript of the work, complete in seven chapters, is described in HPR. II. 224 where the date of composition is given as Śaka 1699. Another MS, complete in five chapters, but presumably containing the same material, is described in Mad. T. (VI. 5122). One more MS, complete in five chapters and written in the Nāgarī script, is in the old collection of the Society (I.E. 28). The present MS contains only a portion of the work. We have in the present MS only one colophon (of chapter I) on Fol. 23B. Another work of Kāśīnātha belonging to the old collection of the Society is the *Saparyāsāra.*

It is not known whether the *Tithitattvaṭīkā* (HPR. I. 150), *Prāyaścittakadambasāra* (HPR. I. 237) and *Prāyaścittatattvaṭīkā* (HPR. I. 238) are also by the same author. *Cat. Cat.* (I. 105) confuses him with Kāśīnātha, son of Jayarāma.

A list of Tantra works on which the present treatise is based is given as follows (Fol. 1):—

कालीतन्त्रं कौलतन्त्रं कामाख्यां कुब्जिकां तथा ।
कालिकोपनिषत्सारं कालीकल्पं कुलार्णवम् ॥
कुमारीतन्त्रकञ्चैव तस्याश्च कल्पमुत्तमम् ।
तारातन्त्रं योनितन्त्रं शक्तिसङ्गमतन्त्रकम् ॥
ज्ञानतन्त्रं तन्त्रराजं गुप्तसाधनतन्त्रकम् ।
पुरश्चर्य्यारसोल्लासं महाकालस्य संहिताम् ॥
रुद्रयामलतन्त्रञ्च तारासूक्तं तथोत्तरम् ।
तन्त्रं निरुत्तरञ्चैव मातृकाभेदमेव च ॥
बालाविलासं विमलां वाण्याश्चैव विलासकम् ।
वीरतन्त्रं विश्वसारं योगिनीं गुरुतन्त्रकम् ॥
संगोपनञ्च समयां स्वतन्त्रञ्च सरस्वतीम् ।
राधातन्त्रोत्तरातन्त्रमन्नदाकल्पमुत्तमम् ॥
उड्डीशोत्तरखण्डञ्च तथाचारस्य सारकम् ।
चिन्तामणिं भूतसिद्धिं तथाचाथर्व्वणः श्रुतिम् ॥
तोडलं नीलतन्त्रञ्च फेत्कारीं भैरवीं तथा ।
एतानि मूलतन्त्राणि बहूनपि च संग्रहान् ॥
कालीतत्त्वं तत्त्वबोधं तत्त्वानन्दतरङ्गिणीं ।
ताराप्रदीपकं चैव त्रिपुरासारसंग्रहम् ॥
तारारहस्यवृत्तिञ्च ताराकल्पलतां तथा ।
तन्त्रसारं तन्त्रजीवं ताराभक्तिसुधार्णवम् ॥
शाक्तक्रमं शारदाञ्च शाक्तानन्दतरङ्गिणीं ।
श्यामारहस्यं विमलं कालिकार्च्चाविधिं तथा ॥

तन्त्रार्णवञ्च विमलं कौलिकार्चनदीपिकां ।
कौलावलिं पञ्चचक्रपूजाक्रमलतां तथा ॥
मन्त्रदर्पणसंज्ञञ्च तथा ग्रन्थमहोदधिं ।
इत्यादिकुलशास्त्राणि समालोच्य पुनः पुनः ।
साधकानां हितार्थाय ग्रन्थमेनं वदाम्यहम् ॥

Kāśīnātha.

6304.

6528. **कालीभक्तिरसायनम् ।** *Kālībhaktirasāyana.*

Substance, country-made paper. 11 × 5 inches. Folia, 29. Lines, 10 on a page. Extent in ślokas, 550. Character, Nāgara. Appearance, fresh. Complete in eight chapters.

Beginning : --

श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।
महाकालीपदद्वन्द्वं निधाय हृदि सुन्दरम् ।
काशिनाथः(मत्ते)[प्रत]नुते कालीपूजारसायनम् ॥

तत्रादौ आचारनिर्णयः ।

श्यामारहस्यादिग्रन्थेषु ।

देवगृहं प्रविश्य खासनं सम्पूज्य स्वस्तिकाद्यासनेनोपविश्य पूर्व्वदिन-पूजावशिष्टासवं पीत्वा पूजनं कर्त्तव्यमिति वदन्ति ।

तन्त्रवचनान्यत्र पठन्ति ।

भावचूडामणौ—

विना हेतुकमाखाद्य क्षोभयुक्तो महेश्वरः ।
न पूजामासनं कुर्य्यान्न च ध्यानं न चिन्तनम् ॥
तस्माद्भक्त्वा च पीत्वा च पूजयेत् परमेश्वरीमिति ... ...
... ...
... ... तथापि ब्राह्मणजातेरासवदानपानं

निषिद्धमेव। किन्तु शूद्रस्यैवासवदानपानयोरधिकारः। तथा च महाकालसंहितायां।

द्रव्येण सात्त्विकेनैव ब्राह्मणः पूजयेच्छिवामिति।

भैरवतन्त्रे।

क्षीरेण ब्राह्मणैस्तर्प्या घृतेन नृपवंशजैः।

माध्विकैर्वैश्यवर्णैस्तु आसवैः शूद्रजातिभिरिति॥

Colophons of the different chapters :—

3A, इति कालीभक्तिरसायने आचारनिर्णयाख्यः प्रथमः प्रकाशः; 4A, ०द्वाविंशत्यक्षरीमन्त्रोद्धाराख्यो द्वितीयः प्रकाशः; 7A, ०प्रातःकृत्यादितान्त्रिकसन्ध्याविधानान्तः तृतीयः प्रकाशः; 14A, ०द्वारपूजनादिन्यासविधानाख्यश्चतुर्थप्रकाशः; 21B, ०यन्त्रोद्धारादिप्रधानदेवतापूजनविधानाख्यः पञ्चमप्रकाशः; 26B, आवरणपूजाविधानाख्यः [षष्ठ]प्रकाशः; 28A, ०विद्यामाहात्म्योपासकधर्म्मविधानाख्यः सप्तमः प्रकाशः; 29A, इति श्रीमद्गडोपनामकशिवरामभट्टात्मजजयरामभट्टसुमशिवभक्तसूनुतन्त्रशास्त्रप्रवीणदक्षिणाचारानुसारिकाशीनाथभट्टविरचिते कालीभक्तिरसायने पुरश्चरणविधानाख्योऽष्टमः प्रकाशः।

Post-colophon Statement :—

मालवीयबालमुकुन्दस्येदं पुस्तकम्।

Authorities quoted and referred to :—

1, श्यामारहस्य, भावचूडामणि, कुलार्णव, समयाचार; 2A, महाकालसंहिता, कुलचूड़ामणि, ज्ञानार्णव, लघुस्तव, बृहत्श्रीक्रमसंहिता, कालमाधवनिबन्ध; 2B, मेरुतन्त्र, रुद्रयामल, कुलार्णव; 3B, भैरवतन्त्र; 4B, कालिकाश्रुति; 5B, नीलतन्त्र, स्वतन्त्र, तन्त्रसार; 6A, शारदाटीका; 6B, चूड़ामणि, कौमारीतन्त्र; 7A–B, कुमारीकल्प, फेत्कारिणीतन्त्र; 11A, दक्षिणामूर्त्तिसंहिता; 14A, सिद्धेश्वरीतन्त्र; 14B, कालिकाकुलसद्भाव, कुलसद्भाव, कालीक्रम; 20A, मेरुतन्त्र, मन्त्ररत्नावली, कालीकल्प; 21A, मत्स्यसूक्त; 22A, तन्त्रचूड़ामणि; 24B, विशुद्धेश्वरमहातन्त्र; 25A, हंसपारमेश्वर, कालीतन्त्र; 26B, तत्त्वसारसंहिता; 29A, मुण्डमाला; 29B, उत्तरतन्त्र।

Rāmacandra Kavicandra Cakravartī.

6305.

3459. श्यामाकल्पलता। *Śyāmākalpalatā.*

Substance, country-made paper. 15¼ × 4 inches. Folia, 124. Lines, 8 on a page. Extent in ślokas, 3,900. Character, Bengali. Date, Śaka 1722. Appearance, fresh. Complete in 11 stavakas.

Last Colophon :—

इति श्रीमाधवकविकण्ठाभरणचक्रवर्त्तिसुतरामचन्द्रकविचन्द्र-
चक्रवर्त्तिविरचिता श्यामाकल्पलता समाप्ता।

Post-colophon Statement :—

यदत्र भ्रान्त्या लिखितं विरुद्धं
विमर्षितव्यं खलु तत् सुधीरैः।
यतो भवाब्धौ पतितस्य भ्रान्ति-
र्न जायते कस्य पदे पदे वै॥

शुभमस्तु शकाब्दाः १७२२ सौरभाद्रस्य त्रयोदशदिवसे सोमज-
वासरे शुक्लपक्षीयाष्टम्यां समाप्तश्चायं ग्रन्थः।

श्रीशिवप्रसाददेवशर्म्मणः स्वाक्षरमिदं पुस्तकञ्च।
भवान्याः पदाब्जे मनो मे सदास्तु।

The special features of the work and the works consulted in preparing it are thus indicated (Fol. 1A) in the beginning:—

यद्यपि पूर्णानन्दैः सर्व्वरहस्यं वर्णितं व्यक्तया
तत्र स्वातन्त्र्येण प्रायो लोको बिभेति युगधर्म्मात्।
अत इह सर्व्वजनानामविगीताचारमार्गेण
साधकसिद्धिफलेयं कल्पलता तन्यतेऽस्माभिः॥
स्वतन्त्रं वीरतन्त्रञ्च फेत्कारीतन्त्रमेव च।
कालिकाकुलसर्व्वस्वं कालीतन्त्रञ्च यामलम्॥

कुलचूडामणिश्चापि कुमारीतन्त्रमेव च ।
कुलार्णवं तथा कालीकल्पं भैरवतन्त्रकम् ॥
कालिकाकुलसद्भावं तथा चोत्तरतन्त्रकम् ।
वीक्ष्य तत्तत्प्रमाणेन वक्ष्ये मोक्षप्रदायिनीम् ॥
कलौ कल्पद्रुमप्रख्यां कालिकां भवभीतिहाम् ॥

MSS of the work have been described L. I. 267, HPR. I. 372.

Rāghava Bhaṭṭa.

6306.

5893. कालीतत्त्वम् । *Kālītattva.*

Substance, country-made paper. 10½ × 4½ inches. Folia, 6-39, with Folio Nos. 15, 16, 24, 26-30 missing. Lines, 13 on a page. Extent in ślokas, 845. Character, Nāgara. Appearance, old and discoloured. Incomplete.

A MS of the work, complete in 21 chapters, is described in Bik., p. 586. The present MS contains the colophons of chapters 3, 4 and 8 (Fol. 6A, 6B, 35B). The work is noticed under the name °*rahasya* in several catalogues (*Cat. Cat.* I. 99). For a note on the work cf. *Ind. Cult.* V. 211ff. The eighth chapter in the present MS comes to an end in the middle of the same chapter (Fol. 50B) of the following MS where the chapter ends on Fol. 62B.

6307.

11277. *Kālītattva.*

Substance, country-made paper. 11½ × 3½ inches. Folia, 1-95, of which 78B is blank. Lines, 7. Extent in ślokas, 1,950. Character, Newari. Appearance, fresh. Incomplete.

The present MS contains the first 17 chapters of the work. After the first introductory verse quoted in Bik.

the present MS runs, giving an outline of the contents of the different chapters:—

विचार्य सर्वतन्त्राणि कुलनाथगणैः सह ।
साधकानाञ्च पश्वानं गुरूणाञ्च तथात्मनाम् ॥
उपनिषत् तथा स्तोत्रं निबन्धानपि भूयशः ।
श्रीमत्राघवभट्टेन कालीतत्त्वं वितन्यते ॥
प्रातःकृत्यं भवेदादौ स्नानं द्वितीयकं मतम् ।
सन्ध्या तृतीये तत्त्वे वै तुरीये तर्पणं तथा ॥
पूजा च पञ्चमे ज्ञेया शुद्धिर्द्रव्यस्य षष्ठके ।
सप्तमे कुलसम्पत्तिः पुरश्चर्य्याष्टमे तथा ॥
निमित्तं नवमे ज्ञेयं देवताप्रीतिकारकम् ।
दशमे काम्यकर्माणि आचारो दशमान्तिके ॥
द्वादशे स्थानपुष्पादि त्रयोदशे विधिर्बलम् ।
चतुर्दशे प्रायश्चित्तं भावः पञ्चदशे तथा ॥
षोड़शे तु कुमारीणां पूजाविधिरुदाहृतः ।
सप्तदशे तु मालोक्ताऽष्टादशे स्तवसंकथा ॥
ऊनविंशतिमे शान्तिर्विंशतिमे तु मन्त्रकाः ।
ततः परं रहस्यादिः स्यादिति कर्मपद्धतिः ॥

Works and authors quoted and referred to :—

2A, कुलचूड़ामणि ; 4B, श्रीक्रमसंहिता, आथर्वणतन्त्र ; 6A, शारदा-टीका ; 6B, कुमारीतन्त्र ; 7B, नीलतन्त्र ; 8A, स्वतन्त्रतन्त्र ; 8B, कुमारी-कल्प ; 9B, भावचूड़ामणि, विजयाकल्प ; 10B, कालीक्रम ; 11B, भैरवतन्त्र ; 16A, कुलार्णव ; 35A, उत्तरातन्त्र ; 35B, कुमारीतन्त्र ; 38B, मातङ्गीतन्त्र, समयाचार ; 44A, कुलसम्भव ; 47A, एकवीराकल्प ; 48B, कुलप्रकाश ; 49A, ज्ञानप्रकाश ; 50A, कालीकल्प, तन्त्रराज ; 50B, वीरतन्त्र ; 62A, मुण्डमाला ; 62B, मत्स्यसूक्त ; 64A, मन्त्रचूड़ामणि ; 71A, लिङ्गागम ; 76A, फेत्कारिणी ; 77A, मुण्डमाला ; 83A, ब्रह्मयामल ; सर्वतन्त्र 95A, हंसपारमेश्वर ।

Ādyānandana (Navamīsiṃha).

6308.

5473. **कुलमुक्तिकल्लोलिनी ।** *Kulamuktikallolinī.*

Substance, country-made paper. 16 × 6 inches. Folia, 226. Lines, 12 on a page. Extent in ślokas, 9,450. Character, Nāgara. Date, Saṃvat 1877. Appearance, discoloured. Complete in 22 chapters.

The work deals with the details of the Tantra form of worship in general, with special reference to the worship of Kālī. A MS of it is described in L. VII. 2342. Another MS, also copied in 1877 V.S., is found in the Indian Museum collection (2689). Some of the works and authors referred to in the work are:—

सिद्धान्तशेखर, क्रियाकाण्डशेखर, सारसंग्रह, मन्त्रसारसंग्रह, रत्नावली, प्रयोगसार, क्रियासार, शारदा, मन्त्रमुक्तावली, लक्षणसंग्रह, त्रैलोक्यसार, रामवाजपेयी, आगमसिद्धान्त, त्रिपुरासारसमुच्चय, होमसागर, मन्त्रतन्त्रप्रकाश, सोमशम्भु, दीपिका, मायार्णव, महाकर्म्मार्चन, नित्याह्निकतिलक, रत्नसागर, कुलामृतदीपिका, त्रिशक्तिरत्न, etc.

Beginning :—

श्रीगुरुगणेशाय नमः ।

नमामः सदानन्दरूपामनाद्या-
मगोचाद्य गोत्रावतारां सुनन्दाम् ।
सुगोत्रोद्भवां भासमानां भवाब्धौ
त्वगां तारिणीं तारसर्गामनिन्द्याम् ॥

वन्दे श्रीगुरुपादुकां पशुपतिं गुह्येश्वरीं पीठगां
ब्रह्माविष्णुमहेशसेव्यचरणां श्रीकालिकां चिन्मयीम् ।
अज्ञानेन्धनदाहिनीं त्रिजगतां भक्त्यैकगम्यां पराम्
अष्टैश्वर्य्यनिदानदानदपदां भक्तैककल्पद्रुमाम् ॥

श्रीनेपालपतेरमात्यनवमीसिंहो गुरूणां मुखात्
ज्ञात्वा कौलिकवामदक्षिणमतं तन्त्रादिशैलोद्भवाम् ।
श्रीकालीकुलमुक्तिशब्दपरतः कल्लोलिनीं निर्मलां
दीक्षानित्यपुरस्क्रियादिलहरीं रम्यां तनोति स्वयम् ॥
आद्यानन्द इत्येव ख्यातनामा गुरोर्मुखात् ।
भक्त्युद्रेकादपर्णायां चञ्चलत्वं व्रजाम्यहम् ॥

End :—

यामीशो हरिरब्जयोनिरमरा राकापतिस्तच्छिरः-
स्थाप्यप्यहिरहःपतिर्न परमामाद्यन्तमध्यातिगाम् ।
या चानन्दमयी हृषीकगहना प्राविःकृताधीन्द्रियैः
गुर्व्वाज्ञामनुगम्यमानहृदयैस्तस्यै भवत्यै नमः ॥
कल्लोलिनीकलितबोधसहस्रपत्र-
प्रोद्यन्मधुक्रमगकौलिकसङ्घभृङ्गाः ।
वर्गार्थिनः सरभसं प्रपिबन्तु नित्यं
गुर्व्वङ्घ्रिपद्मभजनात्तदपीह लभ्यम् ॥

Colophon :—

इति श्रीआद्यानन्दनविरचितायां कुलमुक्तिकल्लोलिन्यां द्वाविंशति-
तमः पटलः समाप्तः ।

Post-colophon Statement :—

श्रीरणोद्योतसाहो विरेजे जगत्यां
दरिद्रान्धकारे दिनेशो निशेशः ।
प्रतापे च शीते च दानेऽमरद्रुः
गिरि श्रीगिरीशः क्षमासु क्षमा सुन्दरेसौ स्मरः ॥

... ...

... ...

तस्याज्ञाप्तप्रमोदोऽमृतसुगतजनोऽलेलिखत् पुस्तकन्तत्
वर्षे श्रीवैक्रमेऽस्मिन् गिरिगिरिकरिभेशान्विते मार्गकृष्णे ।

सावित्रीशे तिथौ भे अदितिसमभिधे ब्रह्मयोगे च वारे
नाकस्थब्रह्मगामीश्वरगमनगुरोर्मन्त्रिणः सिद्धयोगे ॥
शुभमस्तु । काली प्रसन्नाऽस्तु '

In a later hand :—

शिवनारायणसुतो काशिपुरनिवासिना ।
मालवीयकुलोत्पन्न-बालमुकुन्दो हि नामतः ॥

At the end the MS contains a table of contents covering two leaves.

Cakravartī.

6309.

5958. **श्यामापूजापद्धतिः ।** *Śyāmāpūjāpaddhati.*

Substance, country-made paper. 11½ × 5½ inches. Folia, 15-45. Lines, 10. Extent in ślokas, 600. Character, Nāgara. Date, Saṃvat 1746. Appearance, good. Complete.

Beginning :—

कलानिधिकलोल्लासिमौलिस्मेरमुखाम्बुजाम् ।
कालिन्दीलोलकल्लोलकोमलां श्यामलां भजे ॥
यद्यपि पद्धतयोऽन्याः सन्ति च धन्याः कृता[ः] कृतिभिः
श्यामासौख्यसपर्य्यां तथापि कुर्य्यां मितैर्वचनैः ॥
प्रातःकृत्यमकृत्वा तु यो देवीं भक्तितोऽर्चयेत् ।
तस्य पूजा च विफला शौचहीना यथा क्रिया ॥

अतो ब्राह्ममुहूर्त्ते चोत्थाय बद्धपद्मासनः शिरस्थधोमुखः सहस्र-दलकर्णिकामध्यवर्तौ चन्द्रमण्डलान्तर्गतहंसपीठे श्रीनाथं ध्यायेत् ।

End :—

मातः पूजितासि क्षमस्वेति संहारमुद्रया पुष्पमाघ्राय तद्वायु-[द्वा]रा शैवं [ते]जः प्रवहन्नासामार्गेण मूलाधारमानीय आत्मानं

कामकलाख्यं विभाव्य बाह्यतो वैष्णवाचारपरायणो यथासुखं विहरेदिति ज्ञात्वा नन्दभूधरे गुरुपदाम्भोगैकसंसेवनं चेति ।

Last Colophon (Fol. 44A) :- -

इति श्रीचक्रवर्त्तिविरचिता साधकानां सुखबोधना[य] रत्नाकर-सर्व्वश्यामापूजापद्धतिः समाप्ता ।

Post-colophon Statement : —

संवत् १७४६ । समये चैत्रशुक्लपञ्चम्यां बुधवासरे ।

The work deals with the details of the worship of Kālī and the morning rites of the worshipper. Another MS, copied in 1677 V.S., is found in the Indian Museum collection (No. 4590). The preliminary portion of the MS (Fol. 1–15A) is occupied by topics like the worship of Sumukhī (Mātaṅgī), Vagalāmukhī and Śrīvidyā. The beginnings and colophons of some of these topics are given below.

I. Sumukhīpaṭala.

Beginning :—

अथातः सम्प्रवक्ष्यामि देवि गुह्यमतं प्रिये ।
उच्छिष्टपूर्व्विकां देवीं मातङ्गीं सर्व्वसिद्धिदाम् ॥
सर्व्वपापहरां देवीं सर्व्वदोषविवर्ज्जित[ा]म् ।
यथा विज्ञापनाद्देवि क्षयं गच्छन्ति चापदः ॥

Colophon (Fol. 4A):—

इति श्रीरुद्रयामले सुमुखीपटलं समाप्तम् ।

II. Rudrākṣamāhātmya.

Beginning :—

रुद्राक्षस्य फलं यच्च त्रिषु लोकेषु विश्रुतम् ।
सन्दर्शनाल्लक्षपुण्यं स्पर्शनात् कोटिरुच्यते ॥

Colophon (Fol. 6B):—

इति श्रीलिङ्गपुराणे शिवस्कन्दसंवादे महालक्ष्मीमाहात्म्यं समाप्तम् ।

III. Taleśīstava.

Beginning:—

षडाधारपद्मान्तराले मृणाले
सुषुम्नापथा ब्रह्मरन्ध्रे प्रविश्य ।
सहस्रारपद्मामृतेनोल्लसन्तीं
भजे श्रीभवानीं कुलेशीं तलेशीम् ॥

Colophon (Fol. 8B):—

इति श्रीचित्रविलासभट्टाचार्य्यविरचितं तलेशीभुजङ्गस्तवं सम्पूर्णम् ।

Fol. 8B-15A deal with Vagalāmukhī and Śrīvidyā.

Fol. 44B-45A contain an extract styled छायाकालज्ञान which begins:—

तस्य तत्र प्रवक्ष्यामि छायापुरुषलक्षणम् ।
येन विज्ञानमात्रेण त्रिकालज्ञो भवेन्नरः ॥
कालो ह्यायुर्बलस्यापि येनोपायेन लक्ष्यते ।
तं वदामि समासेन यथा दृष्टः शिवागमे ॥

Along with the present MS is found another MS (Fol. 2-9), written in the same hand, dealing with Tantric topics like भूतशुद्धि and मातृकान्यास. Fol. 1 of this portion, which describes the अकडमचक्र, may have belonged to a work called श्यामापद्धतिरत्नाकर, a name found on the back of the Fol.

Anonymous.

6310.

6380. **दक्षिणकालिकार्चनपद्धतिः ।** *Dakṣiṇakālikārcana-paddhati.*

Substance, country-made paper. 11 × 4½ inches. Folia, 48. Lines, 10. Extent in ślokas, 900. Character, Nāgara. Appearance, discoloured. Complete.

This deals with the daily rites of a worshipper of Kālī with special reference to the worship of that deity.

Beginning :

श्रीगणेशाय नमः । श्रीगुरुमूर्त्तिर्जयति ।

नमः कर्पूरगौराय कैलासाचलवासिने ।
गौरीकण्ठग्रहानन्दनिष्पन्दायान्धकद्विषे ॥
उत्पत्तिस्थितिसंहारकारिकां जगतां पतिम् ।
देवतां कालिकां देवीं चिदानन्दस्वरूपिणीम् ॥
कालिकापूजनविधिं वक्ष्यामो[ह] सविस्तरात् ।
तत्र श्रीमान् साधकेन्द्रः प्रातःसन्ध्यापूर्व्वं दण्डद्वयात्मके ब्राह्ममुहूर्त्ते समुत्थाय ... ...

End : –

सुसाधकानां भुवि कल्पवृक्षः
प्रोक्तः सपर्याविधिरम्बिकायाः ।
विचार्य्य तन्त्राणि गुरुप्रसादे
त्रैलोक्यतत्त्वेन प्रिवोदितानि ॥

Colophon :

श्रीदक्षिणकालिकार्चनपद्धतिः संपूर्णा ।

6311.

10054. पूजनप्रयोगसंग्रहः । *Pūjanaprayogasaṃgraha.*

Substance, country-made paper. 7½ × 3½ inches. Folia, 65. Lines, 6. Extent in ślokas, 390. Character, Nāgara. Date, Saṃvat 1743. Appearance, old and discoloured. Complete.

This work is of the same type as the one described under the previous number.

Beginning: -

श्रीगुरुचरणकमलेभ्यो नमः । श्रीदक्षिणायै नमः ॥

प्रणम्य दक्षिणापदारविन्दयुग्ममादरात् ।

करोति कोपि पूजनप्रयोगसंग्रहं बुधः ॥

तत्र साधकः प्रातरुत्थाय शय्यायामेव बद्धपद्मासनः कुलवृक्षं प्रणम्य स्वशिरसि श्वेतसहस्रदलकमलकर्णिकामध्यवर्तिचन्द्रमण्डलान्तर्गतं स्वगुरुं ध्यायेत् ।

श्वेतं श्वेतविलेपमाल्यवसनं वामेन रक्तोत्पलं
बिभ्रत्या प्रिययेतरेण तरसा श्लिष्टं प्रसन्नाननम् ।
हस्ताभ्यामभयं वरञ्च दधतं शम्भुस्वरूपं परम्
हालालोहितलोचनोत्पलयुगं ध्यायेच्छिरस्थं गुरुम् ॥

End: --

श्रीपात्रामृतं स्वपात्रे कृत्वा स्वीकृत्य भूमौ न्युब्जीकृत्य तदुपरि पुष्पं दत्वा पात्रं प्रक्षाल्य संगोप्य तदमृतस्निग्धभूमौ मायाबीजं विलिख्य वामहस्तकनिष्ठाङ्गुल्या तत्तिलकं कुर्यात् ।

यं यं स्पृशामि पादेन यं यं पश्यामि चक्षुषा ।
स एव दासतां यातु यदि शक्रसमो भवेत् ॥

इति कृत्वा नत्वा यथासुखं विहरेत् ।

Colophon: -

इति पूजाप्रयोगसंग्रहः समाप्तः ॥

Post-colophon Statement:—

शिवेन रचितं शिवम् ।

संवत् १७४३ चैत्रकृष्णादशम्यां भौमवासरे लिखितम् सदा-
शिवेन आत्मपठनार्थं । श्रीमन्मत्ताकालरतां भजामि ।

6312.

10205. दक्षिणकालीविधिः । *Dakṣiṇakālīvidhi.*

Substance, country-made paper. 9 × 4 inches. Folia, 34, of which Fol. 2 is missing. Lines, 6. Extent in ślokas, 476. Character, Nāgara. Date, Saṃvat 1679. Appearance, old and discoloured. Complete.

A work of the same nature as the two described above; it contains authoritative extracts from different Tantras including a section on *vīrācāra* from the *Bhairavatantra* (Fol. 32A–34). It also deals in detail with different types of the rite called *puraścaraṇa* (Fol. 14Aff).

Colophon (Fol. 32A):—

इति दक्षिणकालीविधिः ।

Post-colophon Statement:—

संवत् १६७९ वर्षे चैत्रवदी १३ । राम राम ।

6313.

10. श्यामापूजापद्धतिः । *Śyāmāpūjāpaddhati.*

Substance, country-made paper. 9½ × 3¼ inches. Folia, 19. Lines, 6. Extent in ślokas, 250. Character, Nāgara. Appearance, old. Complete.

The present MS has been described in L. II. 726. This and the two following works describe the procedure of the worship of Kālī.

6314.

5259. कालिकापूजाप्रयोगः । *Kālikāpūjāprayoga.*

Substance, country-made paper. 17 × 4 inches. Folia, 9. Lines, 5. Character, Bengali. Appearance, discoloured. Incomplete at the end.

6315.

10768B. [दक्षिणकालिकापूजापद्धतिः] । *Dakṣiṇakālikā-pūjāpaddhati.*

Substance, palm-leaf. 16½ × 2 inches. Folia, 2-19. Lines, 3. Character, Bengali. Appearance, discoloured. Incomplete.

6316.

11301. गुह्यकाल्ययुताक्षरमालामन्त्रः । *Guhyakālya-yutākṣaramālāmantra.*

Substance, country-made paper. 8½ × 3¼ inches. Folia, 10. Lines, 6, 7. Appearance, fresh. Extent in ślokas, 380. Character, Newari. Appearance, fresh. Complete.

Colophon:

इति महाकालसंहितोक्तमहाकालोपासि[त]बीजमालामयी नाम श्रीगुह्यकाल्ययुताक्षरमालामन्त्रः समाप्तः ।

6317.

11319. *Guhyakālyayutākṣaramālāmantra.*

Substance, country-made paper. 7½ × 3 inches. Folia, one large sheet of paper with 19 folds. Lines, 6. Extent in ślokas, 200. Character, Newari. Appearance, fresh. Complete.

This is also stated to belong to the *Mahākālasaṃhitā* though it does not fully agree with the *mantra* found in the foregoing MS.

6318.

11273. [गुह्यकालीपूजा । *Guhyakālīpūjā.*]

Substance, country-made paper. 7½ × 3¼ inches. Folia, one long sheet of paper with 17 folds without any leaf-mark and with writing generally on one side of the paper. Lines, 7. Extent in ślokas, 90. Character, Newari. Appearance, old. Incomplete.

It deals with the details of the worship of Guhya-kālī (e.g., कलसस्थापन, शङ्खस्थापन, अर्घ्यस्थापन, तर्पण, अमृतेश्वरीपूजन).

Along with this MS is found one page (8½" × 3½") in 7 lines of a work called *Gīrvāṇavāṇīmañjarī* by one Ḍhuṇḍhi-rājakavi of Benares. It begins:

नत्वा श्रीपतिपादपद्ममलं विश्वेश्वरं प्राग्दां
तद्वत् श्रीगुरुपादपङ्कजयुगं ध्यात्वा ततः शारदाम् ।
काशीस्थेन हि ढुण्ढिराजकविना गीर्वाणवाङ्मञ्जरी
बालानां सुखबोधनाय रचिता सा शोधनीया बुधैः ॥

6319.

5909. [पूजाविधिः । *Pūjāvidhi.*]

Substance, country-made paper. 8¾ × 4 inches. Folia, 9, of which Fol. 3 and 4 are missing. Lines, 9. Character, Nāgara. Appearance, discoloured. Incomplete.

The portion contained in the MS deals with rituals in connection with the worship of Kālī, specially in connection with the use of wine. The name of the work is given as *Tiraskariṇīvidhi* on the obverse of the first fol.

Along with this MS are found two folia numbered 2 and 3 which contain verses 4-6 of the *Pañcaratnamālikā* of Śaṅkarācārya with a vernacular commentary thereon by Sivarāmasvāmī.

Beginning: —

श्रीगुरुगणपत्यादिसर्व्वेष्टदेवताभ्यो नमः ।

श्रीदक्षिणाकालिकाम्बायै नमः ।

अथ गृहप्राङ्गणैकदेशे प्रत्यङ्मुख आजानुपादौ वा मणिबन्धौ वा प्रक्षाल्य आचम्य द्वारे स्थित्वा शुद्धोदकेन प्रणवेन द्वारं प्रोक्ष्य द्वां द्वारश्रियै नमः ।

(2) TĀRĀ.

Śaṅkara.

6320.

221. **ताराहस्यवृत्तिका ।** *Tārārahasyavṛttikā.*

Substance, country-made yellow paper.* Folia, 126. Lines, 6. Extent in ślokas, 2,500. Character, Bengali. Date, Śaka 1583. Appearance, old. Complete in 15 chapters.

The work deals with the details of the worship of Tārā. The present MS has been described in L. I. 512 where the work is wrongly stated to be a commentary on the *Tārā-rahasya*. Other MSS of the work are described in IO. IV. 2603, CS. V. 76 and VSP (p. 58). The real name of the author seems to be Śaṅkara Āgamācārya as given in the colophon of the India Office MS of the work. He is, however, generally represented as Śaṅkarācārya of Bengal (*Śaṅkarācārya of Bengal* —C. Chakravarti, *Pravāsī*, 1340 B.S., Vaiśākha, pp. 7–9).

Colophon:

इति गौड़भूमिवासिमहामहोपाध्यायश्रीशङ्करागमाचार्य्यविरचिता ताराहस्यवृत्तिका समाप्ता ।

Post-colophon Statement:

श्रीनन्ददुलालशर्म्मणः स्वाक्षरं पुस्तकञ्च ।

शाके वह्न्यष्टतर्कचन्द्रे मधुमासस्य शुक्लाद्यम्यां समाप्तोऽयं ग्रन्थः ।

* 1, , wanting. — 27/3/1952

6321.

2790. *Tārārahasyavṛttikā.*

Substance, country-made paper. 18×3½ inches. Folia, 9. Lines, 6. Character, Bengali. Appearance, fresh. Incomplete.

The present MS contains a portion of chapter I covering the first 11 folia of the previous MS.

Lakṣmaṇa Deśika.

6322.

3373. **ताराप्रदीपः ।** *Tārāpradīpa.*

Substance, country-made yellow paper. 15×3 inches. Folia, 70. Lines, 5. Extent in ślokas, 1,260. Character, Bengali. Date, Śaka 1673. Appearance, discoloured. Complete in five paṭalas.

MSS of the work are described in VSP. (p. 58), L. I. 236, 284, Bik. 618 and HPR. III. 128 in the last of which the author's name is given as Yādava Paṇḍita and the number of chapters is six instead of five. For a note on the work cf. *Ind. Cult.* V. 210ff.

The list of works consulted by the author is indicated thus (Fol. 2A) :

स्वगुरोर्मतमालोच्य फेत्कार्यादिमतं तथा ।
कालीयबीजकातन्त्रं वीराख्यं सिद्धियामलम् ॥
मत्स्यसूक्तञ्च गान्धर्व्वयोगिनीनामतन्त्रकम् ।
उत्तराख्यं महातन्त्रं कालिकाख्यं पुराणकम् ॥
सिद्धभैरवतन्त्रञ्च नीलसारस्वतन्तथा ।
तथा च यन्त्रिणीतन्त्रं तारार्णवमतं पुनः ॥
इत्यादिशास्त्रतत्त्वानि निबध्नामि यथोचितम् ।
साधकानां हितार्थाय सुबुद्धिविभवाय च ॥

Chapter I of the work is introductory. The topics dealt with in the remaining four chapters are referred to thus (Fol. 9B): --

पूजासङ्केतको देव्या मन्त्रसङ्केतकस्तथा ।
साधनस्य च सङ्केतो नानामन्त्रादिकस्य च ॥
चतुष्केष्वपि सङ्केतो मधुमत्यादिसिद्धिदः ।
चतुष्कपटलान् कृत्वा निबध्नामि समासतः ॥

Post-colophon Statement : --

शाक १६७३ ।

6323.

2775. *Tārāpradīpa.*

Substance, country-made paper 16 3½ inches Folia, 12. Lines, 7 Extent in ślokas, 350 Appearance, discoloured Character, Bengali. Incomplete.

The present MS contains only the fifth chapter of the work, which is attributed here to Yādavācārya.

Beginning :

यक्षिणीं संप्रवक्ष्यामि मद्यः प्रत्ययहेतवे ।
यां प्राप्य विधिना मन्त्री भवेद्भूमिपुरन्दरः ॥
धनदायाः मनुं युग्मं विचित्रामभ्रमेव च ।
विभ्रमा च तथा हंसी भीषणा जनरञ्जिका ॥

Colophon :

12A, इति यादवाचार्य्यविरचिते ताराप्रदीपे पञ्चमः पटलः ।

Narasiṃha.

6324.

4187. ताराभक्तिसुधार्णवः । *Tārābhaktisudhārṇava.*

Substance, country-made paper. 19½ 4 inches. Folia, 45. Lines, 7, 8. Character, Bengali. Date, Śaka 1697. Appearance, old and discoloured. Incomplete.

The present MS contains the first four chapters and a very small portion of the fifth. IO. IV. 2596 and CS. V. 31 describe MSS containing chapters V–VIII and I–XI respectively. L. X. 3312 and Ulwar 2146. Extr. 625 describe MSS of the work complete in 20 chapters. The work deals comprehensively with the details of the worship of Tārā with sections devoted to a number of other Śākta deities as well.

Beginning: -

सौनासौरमणिप्रवीणजलदग्रामाभिरामच्छविं
न्रत्यत्पीतपटद्वयैककपटप्रोद्यत्परागोज्ज्वलम् ।
वंशीवादनकैतवप्रवि(वी)लमद्गाम्भीरघोरध्वनिं
वन्दे कश्चिदहं मुदा मधुलिहं हृत्पद्ममध्यस्थितम् ॥
हासव्याजविराजमानकुसुमां वक्षोजराजत्फलां
उद्यत्कुण्डलकैतवप्रविलसन्मत्तालिमालाकुलाम् ।
स्थाणुस्थां रमणीयनूपुरलता बालामपर्णामहं
काञ्चित् कल्पलतां नमामि ललितां शैलाधिराजोद्गताम् ॥
ललाटतटसङ्गमाद् व्रजति बालचन्द्रात्मतां
शिरोरुहनिवेशनाद्भवति शाङ्गवीरूपधृक् ।
विभाति हृदि कौस्तुभात्मकतया मतां यः सदा
शरोरुहशरेणवे निरुपमाय तस्मै नमः ॥

नानातन्त्राणि विज्ञाय गदाधरगुरोर्मुखात् ।
करोति नरसिंहोयन्तारा भक्तिसुधार्णवम् ॥
शम्भुप्रणीतवचनानि विचिन्वतोपि
नैपुण्यमन्यजनतो न विभाति किम्मे ।
मध्येसमुद्रमुपजातमहामणीनां
न्यासो गुणेन गुणिनां किमु कौतुकाय ॥

रुद्रजामले । श्रीमहादेव उवाच ।
अतः परं किमन्तव्यं कथयस्व हरप्रिये ।

पार्व्वत्युवाच ।
महाविद्यां महादेव कथयस्व मम प्रियाम् ॥

श्रीमहादेव उवाच ।
नष्टे सृष्टे महादेवि नष्टे स्थावरजङ्गमे ।
हृहदण्डमभूदेकं सृष्टे[ः] पूर्व्वं महत्तरम् ॥
तत्र ज(य)ज्ञे स्वयं विष्णुस्चतुर्भुजसमन्वितः ।
शङ्खचक्रगदापद्मचतुर्भुजधरो हरिः ॥
तस्य नाभौ ततो ब्रह्मा जज्ञे सृष्टस्य च दाये ।
ललाटदेशे तस्यैव रुद्रो [ज](य)ज्ञे स्वयं हरेः ॥
ब्रह्मा पप्रच्छ देवेशं विद्यान्त्रिभवमोचनम् ।
कस्य विद्यां समाराध्य चतुर्व्वेदो निगद्यते ॥
विद्यानां प्राह देवेशं हरं एच्छस्व शङ्करम् ।
सरस्वती महाविद्या शिवदेहप्रतिष्ठिता ॥
तस्य तद्वचनं श्रुत्वा ब्रह्मा पप्रच्छ शङ्करम् ।
कथयास्माकं महेवेश नाम्ना नीलसरस्वतीम् ॥
ब्रह्मणो वचनं श्रुत्वा प्रजहास महेश्वरः ।
प्रणम्यावस्थितो विप्र विद्यां नीलसरस्वतीम् ॥
यस्याः प्रसादमासाद्य चतुर्व्वेदान् वदिष्यसि ।
मेरोः पश्चिमकूले च चोलनामा हृदः स्मृतः ॥

तत्र जज्ञे स्वयं विद्या माता नीलसरस्वती ।
एतस्मिन्नेव काले तु मेरोः पश्चिमपार्श्वगाः ॥
जपजाप्यं समासाद्य त्रियुगाश्च ततः स्थितम् ।
ममोर्द्धवक्त्रान्निःसृत्य तेजोराशिर्विनिर्गतः ॥
ह्रदे चोले निपत्यैव नीलवर्णा भवेत् पुरा ।
ह्रदस्य चोत्तरे भागे ऋषिरेकोऽभवत्ततः ॥
अक्षोभ्यं नाम चाश्रित्य मुनिवेशधरः शिवः ।
एतस्मिन्नेव काले तु कैलासशिखरस्थितम् ॥
पार्व्वती प्राह देवेशं देवी प्रकृतिसुन्दरी ।
वक्षःस्थले सुखासीना पृच्छति स्म नगात्मजा ॥
कथमीशान सर्व्वे च मलभंक्ते तपोधनाः ।
कां विद्यां प्राप्य कवयो भारतादीन् प्रचक्रिरे ॥

Colophons and sectional headings: –

3B, इति श्रीमहामहोपाध्यायसत्ठाकुरश्रीनरसिंहविरचिते ताराभक्तिसुधार्णवे प्रथमस्तरङ्गः; 7A, अथ दीक्षाविधिः; 7B, अथ दीक्षाकालाः; 8A, इति मासनिर्णयः, अथ पक्षनिर्णयः; अथ तिथिनिर्णयः; 8B, अथ नक्षत्रनिर्णयः; 9A, अथ योगनिर्णयः; अथ करणनिर्णयः, अथ लग्ननिर्णयः; 10A, इति कालनिर्णयः; अथ दीक्षामाहात्म्यम्; 15A, इति वास्तुयागविधिः; 16B, इति मण्डपलक्षणम्; अथ कुण्डानि, अथ चतुरस्रकुण्डम्; 17B, अथ योनिकुण्डलक्षणम्; अथ अर्द्धकुण्डलक्षणम्; इति त्रिकोणकुण्डलक्षणम्; इति वृत्तकुण्डलक्षणम्; अथ षट्कोणकुण्डलक्षणम्; 18A, अथ पद्मकुण्डलक्षणम्; अथाष्टकोणकुण्डलक्षणम्; 18B, अथ मेखला; 19B, अथ योनिः; 20A, अथ नालं, अथ नाभिलक्षणम्; 21A, अथाङ्कुरार्पणम्; 22B, इति श्रीमहामहोपाध्यायसत्ठाकुरश्रीनरसिंहविरचिते ताराभक्तिसुधार्णवे द्वितीयस्तरङ्गः ।

23A, अथ दीक्षा; 27A, अथाशुभाः; 27B, अथ स्वप्ननिवेदनम्; 33B, अधिवासविधिः; अथ दीक्षादिनकृत्यम्; 37B, अथ वीरदीक्षायां विशेषः;

अथ तारादीक्षायां विशेषः; 38A, इति क्रियावतीदीक्षाविधिः; इति कलावतीदीक्षाविधिः; अथ वेधमयीदीक्षा; 39A, अथ पूर्णाभिषेकः; 39B, अथानिष्टफलदमन्त्रपरित्यागविधिरुच्यते; 40A, ०तृतीयस्तरङ्गः।

40A, अथ गुरुभक्तिः; 44B, ०चतुर्थस्तरङ्गः।

Fol. 45 which contains only the initial portion of chapter V deals with the morning rites to be performed by the worshipper. The remaining portion of the work was not accessible to the scribe as is clear from the post-colophon statement which runs :—

लिखितं श्रीसदाशिवदेवशर्मणः। शकाब्दा १६६७। पुस्तकाभावः।

Works referred to :

2A, फेत्कारिणीतन्त्र; मत्स्यसूक्त; 2B, तत्त्वबोध, तन्त्रचूडामणि; 3A, तारार्णव; ब्रह्मसंहिता; 3B, भावचूडामणि; 4A, महाकपिलपञ्चरात्र, तत्त्वसार, वाराहीतन्त्र, षोडशार्णव, वीरागम; 4A, शिवपद्धति; 4B, हयशीर्षपञ्चरात्र, मोहशूरोत्तर; 4B, सिद्धयामल, नारदपञ्चरात्र; 5A, ज्ञानोशयन, योगिनीतन्त्र; 5B, वैशम्पायनसंहिता; 5B, चन्द्रपीठ, कुलार्णव; 6B, प्रपञ्चसार; शैवागम; 7A, देवीयामल, याज्ञवल्क्यसंहिता; शारदा, सौत्रामणितन्त्र, कुलमूलावतार; 7B, आगमकल्पद्रुम; श्रीकण्ठसंहिता; 8A, सिद्धान्तशेखर; क्रियाकाण्डशेखर, गौतमीतन्त्र; अगस्त्यसंहिता; 8B, सारसंग्रह; कालोत्तर; रुद्रयामल; तत्त्वसारसंहिता, रत्नावली; 9A, नीलतन्त्र; 9B, विष्णुयामल; समयातन्त्र; 10A, वाराहीतन्त्र; महोग्रताराकल्प, वीरचूड़ामणि; मृडानीतन्त्र, महाहारकतन्त्र; 10B, प्रयोगसार, प्रपञ्च; 12A, कादिमत, हयशीर्षपञ्चरात्र; दिव्यसारस्वत; 15B, सिद्धान्तशेखर; 18B, गणेशविमर्षिणी; पिङ्गलामत; 19A, वायवीयसंहिता; क्रियासार; योगिनीहृदय, वशिष्ठसंहिता; 19B, त्रैलोक्यसार; पिङ्गलामत; 20A, वायवीयसंहिता; 20B, फेत्कारिणी; 22A, सारस्वतमत; 25A, वशिष्ठसंहिता; 26B, आगमसिद्धान्त; 28B, अत्रि; उड्डीश; 29A, त्रिपुरासारसमुच्चय, यामल;

राघवभट्ट, वीरचूडामणि ; 30A, कात्यायन ; 33A, गणेश्वरविमर्षिणी ; 33B, त्रिपुरासार ; 35B, नारायणीय ; 36B, दीपिका ; तन्त्रराज, 37B, दक्षिणामूर्त्तिसंहिता ; 39A, सारसंग्रह, त्रिशक्तिरत्न, 39A, तन्त्रशेखर ; 40B, समयाचार, भैरवतन्त्र, सारसंग्रह ; 41A, स्वच्छन्दभैरवतन्त्र ।

6325.

379. *Tārābhaktisudhārṇava.*

Substance, country-made yellow paper. 18 4 inches. Folia, 5–8. Lines, 7, 8. Extent in ślokas, 120. Character, Bengali. Appearance, fresh. Fragment

This portion which is without any colophon, but which contains the name on the left-hand margin of every leaf, does not form part of the first four chapters which are found in the foregoing MS of the work. It contains a part of a later section dealing with the worship of Kālī.

Jagannātha Bhaṭṭācārya.

6326.

6537. तारार्च्चनचन्द्रिका । *Tārārcanacandrikā.*

Substance, country-made paper. 12½ 5¾ inches. Folia, 26. Lines, 9 Extent in ślokas, 450. Character, Nāgara. Appearance, fresh. Complete.

The work describes in detail the procedure of the worship of the deity beginning with the morning rites to be performed by the worshipper.

Beginning: —

श्रीगणेशाय नमः ।

साधको ब्राह्मे मुहूर्त्ते उत्थाय मुक्तस्वापः सहस्रदलकमलावस्थितं नीलवर्णं द्विभुजं वरदाभयकरं नीलमाल्यानुलेपनं नीलाम्बरं शुक्लादि-भूषिततनुमुदितं द्विनेत्रं स्वप्रकाशरूपं वामाङ्गस्थितनीलशक्तिं पञ्चोपचारैर्मानसैराराध्य नमस्कुर्य्यात् ।

नीलाम्बरं नीलविलेपयुक्तं

शङ्खादिभूषिततनुं मुदितं त्रिनेत्रम् ।

वामाङ्कपीठे स्थितनीलशक्तिं

वन्दामि वीरं करुणानिधानम् ॥

... ...

प्रातर्ध्यानम् ।

खर्व्वां नीलविशालाक्षीं पञ्चमुद्राविभूषिताम् ।

कपालकर्त्तृकाहस्तां खड्गेन्दीवरधारिणीम् ॥

व्यालमालाजटाजूटां पीनोन्नतपयोधराम् ।

नवयौवनसम्पन्नां मदाघूर्णितलोचनाम् ॥

एवं ध्यात्वा महादेवीं सर्व्वज्ञः साधको भवेत् ॥

Colophon :

इति श्रीजगन्नाथभट्टाचार्य्यविरचिता तारार्च्चनचन्द्रिका समाप्ता ।

Post-colophon Statement :

श्रीशुभं । श्रीराम ।

मालवीयबालमुकुन्दस्येदं पुस्तकम् ।

Vāsudeva Kavikaṅkaṇa Cakravartī.

6327.

790. ताराविलासोदयः । *Tārāvilāsodaya.*

Substance, country-made paper. 14 × 3½ inches. Folia, 47. Lines, 6-7. Extent in ślokas, 900. Character, Bengali. Date, Ś.E. 1620. Appearance, old and faded. Complete in ten ullāsas but for two folia (30, 31) missing.

The present MS is described in L. IV. 1602. Another MS of the work is described in CS. V. 30. The work deals with details of the worship of Tārā.

After the *mangalācaraṇa* verse quoted in L., the work runs: —

श्रीनक्रमोल्लसिततन्त्रपयोधिमध्यात्
उद्धृत्य चारुवचनानि विचारपूर्व्वम् ।
ताराविलाससमुदयान्तममुं प्रचक्रे
श्रीवासुदेवकविकङ्कणचक्रवर्त्ती ॥
कैलासे शिवमासीनं चन्द्रखण्डविभूषितम् ।
वक्षःस्थले समासीना पृच्छति स्म नगात्मजा ॥
कथमीशान सर्व्वज्ञ भवतस्ते तपोधनाः ।
तां विद्यां प्राप्य कवयो भारतादि प्रचक्रिरे ॥
श्रुत्वा नगात्मजावाक्यं प्रहस्य परमेश्वरः ।
प्राह प्रियां परिश्रुत्य साधु साध्विति पूजयन् ॥
शृणु साध्वि महाविद्यामज्ञानेन्धनदाहिनीम् ।
यामवाप्य महात्मानो धर्म्मकामार्थमुक्तिषु ॥
नासाध्यं मेनिरे किञ्चित् कवयः शुद्धबुद्धयः ।

Post-colophon Statement:

शकाब्दाः १६२० फाल्गुन कृष्णा पञ्चमी बुधवारे एकादशादिवसे समाप्ता पुस्तिकेयं ।

6328.

3455. *Tārāvilāsodaya.*

Substance, country-made paper. 16½ × 3¼ inches. Folia, 12–35 (as marked on the right-hand side) and 26–49 and 1–24 (as marked on the left-hand side). Lines, 7. Extent in ślokas, 700. Character, Bengali. Incomplete.

This MS runs up to the end of the eighth chapter covering up to Fol. 39B of the previous MS.

From the folio marks the present MS appears to be a part of a larger MS.

On the reverse of the last leaf there is a section on the worship of the Ganges quoted from the *Āgamakalpa.* This section begins as follows: –

अथ गङ्गामनुं वक्ष्ये लोकत्रयफलप्रदम् ।
यस्याः स्मरणमात्रेण सर्व्वपापैः प्रमुच्यते ॥
तारदीर्घेन्दुशाङ्गौ ङेन्तां गङ्गां समुद्धरेत् ।
विश्वमुख्या ङेयुता च ङेन्ता शिवाम्रता भवेत् ॥

The colophon of this section: —

इत्यागमकल्पे चतुर्थशाखायां तृतीयः पटलः ।

Rāmakṛti.

6329.

4267. ताराचर्नतरङ्गिणी । *Tārārcanataraṅgiṇī.*

Substance, palm-leaf 12 1 inches Folia, 47. Lines, 5. Extent in Ślokas, 1,100 Character, Udiyā Appearance, fresh. Incomplete

The present MS contains the first three chapters of the work and a portion of the fourth, all dealing with the details of the worship of Tārā.

Beginning:

श्रीगणेशाय नमः ।
आनन्दमधुसन्दोहं सन्मनोमधुपाकुलम् ।
तारिणीचरणाम्भोजयुगलं समुपास्महे ॥
श्रीगुरोश्चरणद्वन्द्वमत्तविन्दु मनीषिणा ।
क्रियते रामकृतिना ताराचर्नतरङ्गिणी ॥

तत्रादौ मन्त्राः ।

पेत्कारिणीतन्त्रे ।

प्रथमं सपरं दत्त्वा चतुर्थस्वरभूषितम् ।
रेफाक्रुतं स्फुरद्दीप्तिमिन्दुविन्दुसमन्वितम् ॥

Colophons of the different chapters :—

2A, इति श्रीतारार्चनतरङ्गिण्यां मन्त्रोद्धारो नाम प्रथमस्तरङ्गः ; 8A, ०प्रातःकृत्यादिविधिर्द्वितीयस्तरङ्गः ; 46B, ०नित्यपूजाविधिस्तृतीयस्तरङ्गः ।

Kāśīnātha.

6330.

6540. **तारापूजारसायनम् ।** *Tārāpūjārasāyana.*

Substance, country-made paper. 13 × 5¼ inches. Folia, 13. Lines, 9. Extent in ślokas, 280. Character, Nāgara. Date, Saṃvat 1961. Appearance, fresh. Complete.

It lays down the procedure of the worship of Tārā, beginning with a description of the morning rites of the worshipper.

Beginning :—

श्रीगणेशाय नमः । श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।
या विद्येत्यभिधीयते श्रुतिपथे शक्तिः सदाद्या परा
सर्व्वज्ञा भवबन्धभीतिनिपुणा सर्व्वाशये संस्थिता ।
दुर्ज्ञेया सुदुरात्मभिश्च मुनिभिर्ध्यानास्पदं प्रापिता
प्रत्यक्षा भवतीह सा भगवती बुद्धिप्रदा मेऽस्तु वै ॥
नानातन्त्राणि विज्ञाय जयरामपितुर्मुखात् ।
करोति काशीनाथोयं तारापूजारसायनम् ॥

तत्र श्रीमान् साधकेन्द्रो ब्राह्मे मुहूर्त्ते चोत्थाय रात्रिवाससी परित्यज्य वासोत्तरं परिधाय सशिरसि सहस्रारे कमले निजगुरुं ध्यायेत् ।

प्रातः शिरसि शुक्लेऽब्जे द्विनेत्रं द्विभुजं गुरुं ।
वराभयकरं शान्तं संस्मरेन्नामपूर्व्वकमिति ॥

Works quoted and referred to :—

10B, शक्तिसङ्गमतन्त्र ; 11A, बृहत्तन्त्रराज ; 12B, पुरश्चरणदीपिका ।

Colophon :—

इति श्रीमत्श्रुतिस्मृतिमतप्रमाण-पारावारपारीण-सर्व्वतन्त्र-दक्षिणाचारतन्त्रधुरीणदक्षिणामूर्त्तिचरणारविन्दमिलिन्देन जयराम-भट्टभट्टात्मजकाशीनाथेन विरचितं तारापूजारसायनं पूर्णग्रामे समाप्तम् ।

Post-colophon Statement :

शुभं मौः श्रावन वदी ११ संवत् १९६१ । मालवीयबालमुकुन्द-स्येदं पुस्तकम् ॥

Anonymous.

6331.

5882A. [तारापञ्चाङ्गम् । *Tārāpañcāṅga.*]

Substance, country-made paper 8¾ × 6 inches. Folia, 56 Lines, 9, 10, 11. Extent in ślokas, 1,300 Character, Nāgara. Appearance, new. Complete.

This contains a number of hymns to Tārā and descriptions of several rites in connection with the worship of the deity. A short description of the contents is given below.

I. Thousand names of Tārā (Fol. 1–15A):

Beginning :—

श्रीगणेशाय नमः । ॐ नमो देव्यै ।

कैलासशिखरे देवं महादेवं महेश्वरम् ।

भवानी रहसि प्रीत्या पप्रच्छ वरदायकम् ॥

देव्युवाच ।

कथमीशान सर्व्वज्ञ लभन्ते सिद्धिमुत्तमां ।
साधकाः सर्वदा येन तन्मे कथय सुप्रभो ॥

शिव उवाच ।

विना पूजां विना ध्यानं विना जापं विना बलिं ।
लभन्ते येन कल्याणं तन्मे निगदतः शृणु ॥
यादृशं पुस्तकं दृष्ट्वा, तादृशं लिखितं मया । इदं शुद्ध-मशुद्धं वा मम दोषो न दीयते । तैलाद्रक्षेद् जलाद् रक्षेद्रक्षेत् शिथिलबंधनात् । मूर्खहस्ते न दातव्यं एवं वदति पुस्तकं । भग्न-पृष्ठकटीग्रीवं बद्धमुष्टिरधोमुखं । कष्टेन लिखितं ग्रंथं यत्नेन परिपालयेत् । चैत्र शुक्ल ११ भानुवे संवत् १८३६ स्वार्थं परार्थं च ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥

6375.

11298. महात्रिपुरसुन्दरीसिद्धिविद्यायुताक्षरीमन्त्रः ।

Mahātripurasundarīsiddhividyāyutākṣarīmantra.

Substance, country-made paper. 8 × 3¾ inches. Folia, 17. Lines, 8-10. Extent in ślokas, 313. Character, Newari. Appearance, old. Complete.

This contains a *mantra* of the deity in 10,000 syllables.

Beginning : —

ॐ अस्य श्रीमहाराजराजेश्वर्य्ययुताक्षरीसिद्धिमालामन्त्रस्य महोड्डीशभैरव ऋषिः गायत्र्युष्णिगनुष्टुप्जगतीशक्करीति छन्दांसि श्रीमहाषोडशीराजराजेश्वरी देवता सकलपुरुषार्थसिद्ध्यर्थे महा-निर्वाणमोक्षप्राप्त्यर्थे जपे विनियोगः ।

Colophon :—

इति श्रीएकवीराकल्पे श्रीनीलकण्ठनाथावतारे श्रीमहात्रिपुर-सुन्दर्याः सिद्धिविद्यायुताक्षरी समाप्ता ।

6376.

10222. षोढान्यासः । *Ṣoḍhānyāsa.*

Substance, country-made paper. 13 × 5 inches. Folia, 4. Lines, 12, 14. Character, Nāgara. Appearance, discoloured. Complete.

This gives a description of *Ṣoḍhānyāsa* (*gaṇeśa*°, *graha*°, *nakṣatra*°, *yoginī*°, *rāśi*° and *pīṭha-nyāsa*) in connection with the worship of Tripurā. This is prefaced by a description of the *mātṛkānyāsa*. Extracts from the *Jñānārṇava* (Fol. 1B, 2B, 3A, 3B, 4A) and *Tārārṇava* (Fol. 3B) are quoted in support of the details of the procedure described.

Beginning :—

ॐ नमः परदेवतायै ।

अत्र त्रिपुरसुन्दर्य्याः षोढान्यासो यथा ।

आदौ केवलं मातृकां कुर्य्यात् । यथा । अस्य मातृकामन्त्रस्य ब्रह्मऋषिर्गायत्रीछन्दो मातृकासरस्वती देवता हलो बीजं स्वराः शक्तिर्मातृकामन्त्रकीलकं मातृकान्यासे विनियोगः ।

6377.

2719. महाषोढान्यासः । *Mahāṣoḍhānyāsa.*

Substance, country-made paper. 9 × 3½ inches. Folia, 10. Lines, 10. Extent in ślokas, 180. Character, Nāgara. Complete.

This speaks of the *Mahāṣoḍhānyāsa* of Śrīvidyā, which includes *vyāpaka*°, *bhuvana*°, *mūrti*°, *mantra*°, *daivata*° and *mātara-nyāsa.*

Beginning :—

श्रीगणेशाय नमः ।

ॐ श्रीग्लौ इन्द्रं वायग्लौ नमः श्रीमहात्रिपुरसुरसुन्दर्य्यै नमः श्रीगुरवे नमः परशाम्भवे नमः ।

ईश्वर उवाच ।

अवश्यकादिषोढान्यासान्तं महाषोढान्यासं कुर्य्यात् । तद्यथा । अस्य श्रीपराप्रासादपरामन्त्रस्य शिरसि परमशम्भुऋषिः ललाटे अव्यक्तगायत्रीच्छन्दः जिह्वायां सर्व्वमन्त्रेश्वरी परास्बा देवता हृदये हसां सहौं बीजं कटिमूले हसीं सहौं शक्तिः जान्दो हसूं सहूं कीलं पादयोः मम श्रीप्रासादपरापराप्रासादमन्त्रेश्वरीप्रसिद्ध्यर्थे जपे विनियोगः ।

End :—

ब्रह्मरन्ध्रे क्लीं श्रीं स्फूं ह्सौः स्हौः अश्नां ५० । मातृकामुच्चार्य्य सकलमातृपान्यं वा देव्यै श्रीपादुकेभ्यो नमः ।

इति मातृन्यासः ।

Colophon :—

इति महाषोढान्यासः ।

6378.

10395. नाभिविद्या । *Nābhividyā.*

Substance, country-made paper. 7¾ × 4 inches. Folia, 12. Lines, 9. Extent in ślokas, 120. Character, Nāgara. Appearance, old. Complete.

The work gives the text of the *mantra* of Tripurasundarī called the *nābhividyā* and describes the procedure for its muttering.

Beginning :—

अनेकपुण्यैः संप्राप्य श्रीविद्यां षोडशाक्षरीं ।
यदुच्चारणमात्रेण पापसङ्घः प्रलीयते ॥

अथ नाभिविद्याप्रारम्भः ।

अगस्त्य उवाच ।

हयग्रीव दयासिन्धो सर्व्वशास्त्रविशारद ।
केन प्राप्नोति नियतमात्मज्ञानमचञ्चलम् ॥
केन संप्राप्नुयान्मोक्षमानन्दरससंभृतम् ।
तन्मे ब्रूहि पराशक्तिविषये शास्त्रगोचरे ॥

हयग्रीव उवाच ।

अगस्त्य मुनिशार्दूल शृणु वक्ष्यामि सादरम् ।
शिवाशिवरहस्यं च गोपनीयं महामुने ॥

रहस्यमपि यद्वच्ये देवं साक्षाच्छिवोदितम् ।
एकान्ते रहसि प्राप्तौ कैलासशिखरे शुभे ॥
... ...
सच्चिदानन्दमद्वैतं उमा प्रोवाच सादरम् ।
नत्वा स्तुत्या निशैकाग्रदृष्ट्या तुष्ट्या विलोकितुं ॥
... ...
... ...

शिव उवाच ।

शृणु देवि प्रवच्यामि रहस्यं यद्वचोऽधुना ।
गोपनीयं प्रयत्नेन पूर्णाहंतामयं परम् ॥
परापरमयं भेदं मन्त्रं त्रैलोक्यदुर्लभम् ।
नाभिविद्यात्मकं दिव्यं षट्त्रिंशत्तत्त्वसङ्ख्यकम् ॥
मातृकानाथबालाभिर्युवत्या परया सह ।
चत्वारिंशत्संख्यकाभिराख्या नाभिरितीरिता ॥
पिकशरबलयुग्मं कम्बुका त्र्यम्बकाभा
बलशरपिकयुग्मं राजविद्यास्तनाभा ।
नृपतियुगवतंसा मातृकानाथबाला
परयुवतिसमेता पातु मां नाभिविद्या ॥
अथ नाभिविद्योद्धारः ॥ ॐ ऐँ क्लीँ ...

End :—

श्रीमत्पञ्चदशाक्षर्या लक्षावृत्त्या तु यत्फलम् ।
नाभिविद्यां सकृत् जप्त्वा तत्फलं लभते भृशम् ॥
... ...
श्रीविद्ये परिपूर्णरत्नखचिते बिन्दुत्रिकोणस्थिते
वागीशेशमहेशभूतचरणे मध्ये शिवाकारके ।
कामाक्षीं करुणारसार्णवमयीं कामेश्वराङ्कस्थितां
काञ्चित् चिन्मयकामकोटिनिलयां श्रीब्रह्मविद्यां भजे ॥
श्रीचिदम्बरमहानटाय नमः ॥

6379.

5903. ललिताऽर्चनपद्धतिः । *Lalitārcanapaddhati.*

Substance, country-made paper. 9×4½ inches. Folia, 34. Lines, 11. Extent in ślokas, 750. Character, Nāgara. Date, Saṃvat 1875. Appearance, old and discoloured. Complete.

A very long description of the deity is given in Fol. 10A-11A.

Beginning :—

श्रीगणेशाय नमः ।

ॐ । गृहप्राङ्गनैकदेशे प्रत्यङ्मुख आजानुपादावामणिब[न्धं] प्रक्षाल्याचम्य ऐँ आत्मतत्त्वाधिपाय स्वाहा क्लीँ विद्यातत्त्वाधिपाय स्वाहा शौः शिवतत्त्वाधिपाय स्वाहा ऐँ क्लीँ सौः सर्वतत्त्वाधिपाय स्वाहा ।

End :—

पठित्वेति गुरोर्ध्यानं कुर्व्वन्नेव यथासुखम् ।
विहरेदिति सम्प्रोक्ता ललिताऽर्चनपद्धतिः ॥
भूमिश्चन्द्रः शिवो माया शक्तिः कृष्णाध्वमादनौ ।
अर्द्धचन्द्रश्च बिन्दुश्च नवार्णो मेरुरुच्यते ॥
लसहईएरकलम । श्रीरस्तु ॥

Post-colophon Statement :—

श्रीगुरुदेवार्पणमस्तु । संवत् १८७५ मिति वैशाख वद्य ८ मङ्गले श्रोत्तपल्यूपनामकविश्वनाथेन लिखितम् । ॐ तत्सत् ।

6380.

5811. ललितापरिशिष्टम् । *Lalitāpariśiṣṭa.*

Substance, country-made paper. 9×3½ inches. Folia, 16. Lines, 9. Extent in ślokàs, 300. Character, Nāgara. Appearance, fresh. Incomplete.

This appears to form part of a work called *Lalitā-pariśiṣṭa*. It contains several *mantras* of Tripurā with an indication of the benefits accruing from their application. The names of the *mantras* are मिथुनशुद्धमाला[मन्त्र], मिथुननमो०, मिथुनस्वाहा०, मिथुनतर्पण० and मिथुनजय० .

Beginning :—

अस्य श्रीमिथुनशुद्धमालामन्त्रस्य अहङ्कारतत्त्वाधिष्ठायी त्वष्टा-दित्य ऋषिः अष्टीच्छन्दः सात्त्विकक्लीङ्कारभट्टारकपीठस्थितहिरण्य-ललिताभूषिताङ्गो हृदयेश्वरकामेश्वरभट्टारको देवता सर्व्वसम्मोहन-सिद्धौ विनियोगः ।

अम्बिके तव भक्तानामवलोकनमात्रतः ।
किंकर्त्तव्यविमूढाः स्युर्नरनारीनृपादयः ॥

ऐँ क्लीँ श्रीँ ॐ नमस्त्रिपुरसुन्दरि त्रिपुरसुन्दरहृदयदेवि हृदयदेव शिरोदेवि शिरोदेव शिखादेवि शिखादेव ।

End :—

ललिताभक्तियुक्तानां भोगमोक्षैककारणम् ।
मालामन्त्रैरमीभिस्तु मन्त्रिता भूतिपांसवः ॥
क्षिप्ता भूताभिभूतानां मूर्ध्नि भूतविनाशनम् ।
ज्वरिणां च ज्वरा यान्ति नाशं पातकिनामपि ॥
असाध्यरोगग्रस्तानां रोगा यान्ति परिक्षयम् ।
एतन्मन्त्रिततोयेन भस्मना वा समुत्क्षणात् ॥
पठित्वा हस्तस्पर्शाद्वा नात्र कार्य्या विचारणा ।
सप्ताष्टसंख्यामालाभिर्मन्त्रयित्वा घटोदकम् ॥
सप्ताहं सेचनं कुर्याद्वन्ध्या पुत्रवती भवेत् ॥

Colophon :—

इति ललितापरिशिष्टे पञ्चदशमालाः समाप्ताः ।

6381.

46. उपाङ्गललितापूजनम् । *Upāṅgalalitāpūjana.*

Substance, country-made paper. 7¾ × 4½ inches. Folia, 26. Lines, 7. Extent in ślokas, 300. Character, Nāgara. Appearance, fresh. Complete.

The present MS has been described in L. II. 709. It describes the worship of the deity in connection with a *vrata* in her honour performed by the southerners on the fifth day of the bright fortnight of the month of Āśvina. The *vrata* is described in detail in the *Vratārka* of Śaṅkarabhaṭṭa (Calcutta, Saṃvat 1914, pp. 44ff) and the *Vratarāja* of Viśvanātha Daivajña (Bombay, Śaka 1789, pp. 67ff). A *kathā* of the *vrata*, stated to belong to the *Skandapurāṇa*, is given in the above-mentioned works as well as in a MS described in ASB. V. 3956. The details of worship as found in the present MS appear to be based on an *Upāṅgalalitākalpa.* These details generally agree with those in the printed works.

The deity is described as follows in the present MS (Fol. 4A):—

चन्द्राननां स्मितमुखीं स्तनलोलहारां
श्वेताम्बरां त्रिनयनां सगदां सखेटां ।
पद्मासनां सनयनां भवतीं मृडानीं
ध्यायामि चेतसि सदा ललितां प्रसन्नां ॥ १ ॥
कर्पूरताटङ्कमुखारविन्दां माणिक्यमञ्जीरपदारविन्दां ।
हालामदाघूर्णितलोचनां तां बालां भजे बालतमालनीलाम् ॥ २ ॥
सुधाकराकारस्फुरत्स्फुरितचन्द्रकान्तप्रभाम्
प्रभाकरसिताम्बराम्बरधरां विपञ्चीकरां ।
समुन्नतपयोधरां तनुविमुक्तमुक्तावलीं
वलीकवलितोदरां कलय चित्त वागीश्वरीम् ॥ ३ ॥

गले गुञ्जाबीजावलिमपि च कर्णे शिखिशिखाम्
शिरोऽङ्के न्यस्यत्कनककदलीमञ्जुलदलाम् ।
धनुर्वामे चांसे शरमपरपाणौ च दधतीं
नितम्बे वर्हालिं कुटिलकबरीं नौमि शबरीम् ॥ ४ ॥
नीलकौषेयवसनां हेमाभां कमलासनां ।
भक्तानां वरदां नित्यं ललितां चिन्तयाम्यहम् ॥ ५ ॥

(4) BHUVANEŚVARĪ.

Vāsudeva.

6382.

4274. **भुवनेशीप्रकाशः ।** *Bhuvaneśīprakāśa.*

Substance, palm-leaf. $14\frac{1}{2} \times 1\frac{1}{2}$ inches. Folia, 97. Lines, 4. Extent in ślokas, 1,900. Character, Uḍiyā. Appearance, good. Incomplete.

The work deals with the details of the worship of Bhuvaneśvarī.

Beginning:—

श्रीभुवनेश्वर्य्यै नमः ।

भुवनेशीं नमस्कृत्य तत्प्रसादावलम्बनात् ।
भुवनेशीप्रकाशोऽयं वासुदेवेन रच्यते ॥
यस्याः प्रसादतोऽहं जातो विद्याटवीसिंहः ।
पश्चाधिकपश्चसमः ख्यातोऽहं वासुदेवाख्यः ॥
विशिन्द्ररुद्रदिनकरब्रह्मादिसुरैरुपास्यमानाङ्घ्रिं ।
मूलप्रकृतिं जगतो नित्यामाद्यां महामायाम् ॥
शारदहिमकरवदनां विकसितपद्माभलोचनै रम्याम् ।
दरहसिताननपद्मां पाशाङ्कुशशालिकरयुगलाम् ॥

अभयवरौ करयुगले दधतीं मालां चतुर्भुजैराढ्याम् ।
हिमकरकिशोरमौलिं उद्यद्भास्वद्विराजितद्योताम् ॥
तुङ्गपयोधरयुगलां समस्तनेपथ्यशोभिसर्व्वाङ्गीम् ।
अरुण-कुसुमैकभूषां परिदधतीमरुणमम्बरमिमाम् ॥

... ...

भक्तैकवश्यां भुवनेशीं तामहं वन्दे ॥
प्रणयाच्च मे दिशन्तं सर्व्वागमसारसर्व्वस्वम् ।
दीक्षागुरुं प्रभावाञ्जेग्रष्ठपितृव्यं सदा वन्दे ॥
काशीनाथरथो योऽभूत् प्रख्यातो धरणीतले ।
तत्पुत्रोऽहं महादेवीमाहात्म्यज्ञो निसर्गशास्त्राभ्याम् ॥
आलोच्यागमपुञ्जं तस्यास्त्वैकार्णमन्त्रवरम् ।
मूलीकृत्य च वक्ष्ये तस्यास्तद्विधानानि ॥
तत्रादौ देवतामाहात्म्यम् ॥

Colophons and headings of the different chapters and sections :—

19A, इतिश्रीवासुदेवीये भौवनेशीप्रकाशके ।
पुरश्चर्य्याविधानाख्यः प्रथमः पटलोऽगमत् ॥

काशीनाथरथो योऽभूत् पावकः पृथिवीतले ।
तस्मात् कुलप्रदीपो यः प्रकाशस्तस्य शोभताम् ॥

51B, इतिश्रीवासुदेवीये भौवनेशीप्रकाशके ।
तदर्च्चनाभिधानाख्यो द्वितीयः पटलो गतः ॥

55B, ०यन्त्रशुद्धिविधानाख्यस्तृतीयः पटलो गतः ॥

81A, अथ शरत्कालपूजाभिधीयते ; 88A, इति पूर्णाहुतिविधिः ; 88B, इति महाष्टमीनिर्णयः ; 89A, इति महानवमीनिर्णयः ; 92B, इति चण्डी-पाठफलम् ; 93A, इति भुवनेश्वर्य्यष्टकम् ।

Vaidyanātha.

6383.

5934. **भुवनेशीकल्पलता ।** *Bhuvaneśīkalpalatā.*

Substance, country-made paper. 9 × 4 inches. Folia, 1–22 of which No. 10 is missing. Lines, 9–14. Character, Nāgara. Appearance, old and discoloured. Incomplete.

The work deals with the daily duties to be performed by a worshipper of Bhuvaneśvarī as also with the details of her worship. The MS runs up to a portion of the third chapter.

Beginning:—

श्रीगणेशाय नमः ।

ताडङ्काङ्गदहारकङ्कणलसद्ग्रैवेयकाञ्चीवृतं
ब्रह्मोपेन्द्रमुखैः किरीटमणिभिर्नीराजिताङ्घ्रिद्वयम् ।
पाशञ्चापमथाङ्कुशं शरगणं बिभ्रत् करैर्भास्वरैः
पायान्मां शरणागतं सुखकरं रक्ताभदिव्यं महः ॥
भगवन्तं गुरुं नत्वा श्रीविद्याञ्च गणाधिपम् ।
भुवनेशीकल्पलतां वच्येऽहं प्रमिताक्षराम् ॥

तत्र श्रीमान् साधकेन्द्रो ब्राह्मे मुहूर्त्ते उत्थाय रात्रिवासः परित्यज्य गुरुं स्मरेत् ।

Colophons and headings of the different sections:—

13A, इति श्रीमत्पदवाक्यप्रमाणपारीणराघवभट्टसूरिसूनुमहादेवभट्टसुत-वैद्यनाथभट्टविरचितायां भुवनेश्वरीकल्पलतायां प्रथमः स्तवकः । अथ पुरश्चरणम् । 17B, ०द्वितीयः स्तवकः । 18A, अथ किञ्चिन्नैमित्तिकमुच्यते । 18B, इति दमनपूजा । अथ पवित्रार्च्चा । 19B, अथ काचिच्छारदी पूजा । 20A, अथ कुमारीपूजा ; 21A, अथ किञ्चित् काम्यमुच्यते ; 21B, प्रसङ्गाद्धोमद्रव्यपरिमाण-मुच्यते ; 22A, अथ मालासंस्कारः ; 22B, अथ छिन्नादिदोषशान्त्यर्थं मन्त्राणां दशसंस्कारा निरूप्यन्ते ।

Anonymous.

6384.

6447. [भुवनेश्वरीपञ्चाङ्गम् । *Bhuvaneśvarīpañcāṅga.*]

Substance, country-made paper. 11 × 4½ inches. Folia, 28. Lines, 11. Extent in ślokas, 750. Character, Nāgara. Appearance, fresh. Incomplete.

Beginnings and colophons of the different topics:—

I. Bhuvaneśvarīpaṭala:

Beginning:—

श्रीगणेशाय नमः ।

अथ वक्ष्ये जगद्धात्रीमधुना भुवनेश्वरीम् ।
ब्रह्मादयोपि यां ज्ञात्वा लेभिरे श्रियमूर्ज्जिताम् ॥

ह्रं बीजं इति शक्तिः ।

नकुली(ति)शोमिमारूढो वामनेत्रार्द्धचन्द्रवान् ।
बीजं तस्याः समाख्यातं सेवितं सिद्धिकांक्षिभिः ॥

Colophon:—

6A, इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये उमामहेश्वरसंवादे श्रीभुवनेश्वरीपटलं समाप्तम् ।

II. Bhuvaneśvarīpūjāpaddhati:

Beginning:—

श्रीईश्वर उवाच ।

अथ वक्ष्ये जगद्धात्रीमधुना भुवनेश्वरीम् ।
ब्रह्मादयोऽपि यां ज्ञात्वा लेभिरे श्रियमुत्तमम् ॥
अथ पूजाविधिं वक्ष्ये सर्वकामार्थसिद्धये ।
तत्र श्रीमान् साधकः ब्राह्मे मुहूर्त्ते शयनतलादुत्थाय ... ...

Colophon:—

19A, ०श्रीभुवनेश्वरीपूजापद्धतिः ।

III. Bhuvaneśvarīsahasranāma:

Beginning:—

भैरव उवाच ।

शृणु देवि प्रवक्ष्यामि साम्प्रतं त्वत्परंपरम् ।

सहस्रनामपरमं मुख्यं श्रीभुवनेश्वरी ।

Colophon:—

26A, ०श्रीभुवनेश्वरीसहस्रनाम समाप्तम् ।

IV. Bhuvaneśvarīstotra:

Beginning:—

कर्णस्वर्णविलोलकुण्डलधरामापीनवक्षोरुहां

मुक्ताहारविभूषणां परिलसद्धम्मिल्लसन्मल्लिकाम् ।

लीलाललितलोचनां शशिमुखीमाबद्धकाञ्चीस्रजं

दिव्यन्तीं भुवनेश्वरीमनुदिनं वन्दामहे मातरम् ॥

The stotra is not complete in the MS.

6385.

9628. **भुवनेशीपद्धतिः ।** *Bhuvaneśīpaddhati.*

Substance, country-made paper. 8½ × 4 inches. Folia, 28. Lines, 8–9. Extent in ślokas, 378. Character, Nāgara. Date, Saṃvat 1880. Appearance, tolerable. Complete.

This describes the procedure of the worship of Bhuvaneśvarī.

Beginning:—

श्रीगणेशाय नमः ।

जपं कुर्य्याद्विधानेन लक्षं ध्यानपरायणः ।

लिखेदष्टदलं पद्मं बाह्ये तच्चन्द्रसंयुतं ॥

द्वादशारं ततो बाह्ये तद्बहिः शिखिमण्डलं ।
ततो वायुसमायुक्तं मध्ये मायासमन्वितं ॥
श्चल्लेखां वेष्टयेत्तत्र चन्द्रबिम्बसमप्रभां ।
मध्ये च स्थापयेद्देवं ब्रह्माद्यांश्च सुरेश्वरं ॥
हरं हरिञ्च तत्रैव इन्द्रादीन् क्रमशो न्यसेत् ।
मेधा प्रज्ञा तथा श्रद्धा धारणा कान्तिरेव च ॥
शान्तिः पुष्टिस्तथा लक्ष्मीः पद्मस्याष्टदले स्थिता ।
जातीपुष्पैर्महासिद्धैः पूजयेन्मूलमन्त्रतः ॥

End :—

डाकिनीनां मुखे यान्तु मम निन्दाकराश्च ये ।
दृष्टा[:] तत्पिशिते(ः) स्तु ता[:] श्वावो नाशमायान्तु ॥
द्वेष्टारः साधकानाञ्च विनश्यन्तु शिवाज्ञया ।
ये निन्दकास्ते विलयं प्रयान्तु ये साधकास्ते प्रभवन्तु सिद्धाः ।
सर्व्वत्र देवी करुणावलोकैः पुरः पुरीशी मम संनिधत्तां ॥
इति स्तोत्रं पठन् सर्व्वासामपि कान्तभिषिञ्चेत् ।

Colophon :—

इति श्रीमन्महादेवेन रचिता भुवनेश्याः पद्धतिः समाप्ता ।

Post-colophon Statement :—

संवत् १८८० वर्षे मौती माघ सुदि १ रविवारे लिषितं ।

(5) CHINNAMASTĀ.

Akhaṇḍānanda.

6386.

5787. **मुक्तिसोपानम् ।** *Muktisopāna.*

Substance, country-made paper. 8½ × 5 inches. Folia, 16. Lines, 14. Extent in ślokas, 450. Character, Nāgara. Date, Saṃvat 1777. Appearance, old and discoloured. Complete.

The present MS contains a portion of the work dealing with the origin and worship of Chinnamastā. A MS of the work is referred to in *Cat. Cat.* (I. 460).

This forms part of the *Siddhakhaṇḍa* of the *Muktisopāna* compiled by Akhaṇḍānanda.

Beginning:—

श्रीगणेशाय नमः।

अथ छिन्नमस्तापद्धतिः। रुद्रयामले।

पार्व्वत्युवाच।

पुरा कैलासशिखरे देवदेवमहेश्वर।
छिन्नायाश्च महादेव छिन्ना सा वा कथं भवेत्॥
तस्यास्तद्वचनं श्रुत्वा विहस्य परमेश्वरः।
कथयामास विद्यायाश्छिन्नायाः प्रभवं महत्॥

महादेव उवाच।

शृणु देवि महाप्रा[ज्ञे] छिन्नायाः सम्भवं शुभम्।
पुरा कृतयुगे देवि कैलासे पर्व्वतोत्तमे॥
महाल+महामाया शृङ्गारे तत्परा ह्यभूत्।
ममोपरि समासाद्य विपरीतरता ह्यभूत्॥
शुक्रोत्सारणकाले तु चण्डमूर्त्तिरभूत्तदा।
उत्सार्य्य शुक्रमात्मीयं बहिर्देशं गता तदा॥
एतस्मिन्नेव काले तु सख्यौ तस्य बभूवतुः।
तस्याः शरीरसम्भूते द्वयशक्ती शुभदायकं॥
डाकिनी वर्णिनी देवी सर्व्वशक्तिसमन्विता।
सख्यौ सा समुपालभ्य चण्डदेवी महोदया॥
साधूनां संहितार्थाय दुष्टानां च वधाय च।
पुष्पभद्रानदीकूलं जगाम उषःकाले
तत्र मज्जनं समुपालभत्।

वर्णिनी डाकिनी तस्यां मज्जनं समुपालभत् ।
मध्याह्नसमये ते तु क्षुधायुक्ते बभूवतुः ॥
पप्रच्छतुश्चण्डिकां तु भक्ष्यां परिकल्पय ।
तयोस्तद्वचनं श्रुत्वा विहस्य चण्डिका शुभा ॥
चिच्छेद निजमूर्द्धानं निरीक्ष्य सकलां दिशम् ।
वामनाड्या गलद्रक्तैर्डाकिनीं पर्य्यतोषयत् ॥

Colophon:—

इति श्रीमुक्तिसोपाने अखण्डानन्दकृते सिद्धखण्डे उन्मुख्याः पूजाप्रकरणं समाप्तम् ।

Post-colophon Statement:—

संवत् १७७७ माघ शुक्ल एकादश्यां शनौ लिखितं पट्टनपुरे ।

Anonymous.

6387.

5930. [छिन्नमस्तापञ्चाङ्गम् । *Chinnamastāpañcāṅga.*]

Substance, country-made paper. 10 × 4½ inches. Folia, 18. Lines, 7. Extent in ślokas, 360. Character, Nāgara. Date, Saṃvat 1934. Appearance, fresh. Complete.

Beginnings and colophons of the different topics:—

I. Chinnamastāpaṭala:

Beginning:—

श्रीगणेशाय नमः ।

अथ वक्ष्ये महेशानि पटलं देवदुर्लभम् ।

Colophon:—

2B, इति श्रीरुद्रयामले फेत्कारीतन्त्रे उमामहेश्वरसंवादे छिन्नमस्तापटलः ।

II. Chinnamastāpūjāpaddhati :

Beginning :—

वक्ष्यामि छिन्नमस्तायाः विद्यां सर्वार्थसिद्धिदाम् ।
यां ज्ञात्वा मुनयः सर्वे परां सिद्धिमवाप्नुयुः ॥
फेत्कारतन्त्रमुद्दिष्टं मन्त्रोद्धारं प्रयत्नतः ।
कथयामि समासेन साधकानां शुभावहम् ॥

Colophon :—

7B, इति श्रीरुद्रयामले तन्त्रे फेत्कारीतन्त्रान्तर्गत-उमामहेश्वरसंवादे छिन्नमस्तापूजापद्धतिः ।

III. Chinnamastākavaca :

Beginning :—

कथिता छिन्नमस्ताया या या विद्या सुगोपिता ।
त्वया [नाथेन] (मनेन) देवेश श्रुतास्ताधिगता मया ॥
इदानीं श्रोतुमिच्छामि कवचं पूर्व्वसूचितम् ।
त्रैलोक्यविजयं नाम कृपया कथय प्रभो ॥

Colophon :—

9A, इति श्रीरुद्रयामले फेत्कारीतन्त्रे उमामहेश्वरसंवादे. छिन्नमस्ताकवचं समाप्तम् ।

IV. Chinnamastāsahasranāma :

Beginning :—

पार्वत्युवाच ।

प्रचण्डचण्डिका विद्या पूर्वोक्ता सर्वसम्भव ।
तस्या नामसहस्रं मे महेश कथय प्रभो ॥
कैलासशिखरे रम्ये नानाधातुसमन्विते ।
सिद्धकिन्नरगन्धर्वसेविते काननोत्तमे ॥

Colophon :—

17A, इति श्रीरुद्रयामले फेत्कारितन्त्रे उमामहेश्वरसंवादे छिन्नमस्ता-सहस्रनामस्तोत्रं समाप्तम् ।

V. Chinnamastāstotra:

Beginning :—

श्रीगणेशाय ।

क्रीं छिन्नमस्तास्तोत्रमन्त्रः ।

नाभौ शुद्धसरोजमध्यविलसद्बन्धूकपुष्पारुणां
भास्वद्भास्करमण्डलं तदुदरे यद्योनिचक्रं महत् ।
तन्मध्ये विपरीतमैथुनपरा प्रद्युम्नतत्कामिनी-
पृष्ठस्था तरुणार्ककोटिविलसत्तेजःस्वरूपा स्थिता ॥

Colophon :—

18A, इति श्रीरुद्रयामले फेत्कारीतन्त्रे उमामहेश्वरसंवादे छिन्नमस्ता-स्तोत्रं समाप्तम् ।

Post-colophon Statement :—

शुभमस्तु । श्रीसंवत् १९३४ मीः आषाढ़ कृष्ण ४ वार शुक्रवार । कालीकाप्रसाद । रामः । रामः ।

6388.

10600. *Chinnamastāpañcāṅga.*

Substance, country-made paper. 10½ × 5 inches. Folia, 1–16, 1–3, 1–8. Lines, 7. Character, Nāgara. Date, Saṃvat 1915. Appearance, worm-eaten. Complete.

The contents of the present MS fully agree with those of the MS described under the previous number.

Colophons of the different chapters in the first batch of leaves:—

3B, इति श्रीरुद्रयामले फेत्कारीतन्त्रे उमामहेश्वरसंवादे छिन्नमस्ताकवचं समाप्तं ।

14A, ०छिन्नमस्तासहस्रनामस्तोत्रं समाप्तं ।

15B, ०छिन्नमस्तास्तोत्रं समाप्तं ।

Post-colophon Statement:—

संवत् १९१५ शाके १८८० [१७८० ?] मिति चैत वदि ४ शनिवासरे ।

Colophon in the second batch of leaves:—

3B, छिन्नमस्तापटलः समाप्तः ।

Colophon in the third batch of leaves:—

8A, ०छिन्नमस्तापूजापद्धतिः समाप्ता ।

6389.

9648. **उच्छिष्टचाण्डालीकल्पः ।** *Ucchiṣṭacāṇḍālīkalpa.*

Substance, country-made paper. 9½ × 4 inches. Folia, 7. Lines, 8. Extent in ślokas, 106. Character, Nāgara. Appearance, decayed. Complete.

The details of the worship of Ucchiṣṭacāṇḍālī, specially with reference to black rites, are given in Fol. 1–5A. In this connection a long extract from the *Rudrayāmala* is quoted. Fol. 5A–6B describe the procedure of the worship to be performed by a vīra in the cemetery. Fol. 6B–7A deal with the worship of Dakṣiṇakālī. This section, which also quotes from the *Rudrayāmala,* has the only colophon in the whole MS, which runs:—

इति रुद्रयामले सुमुखीकल्पः समाप्तिमगमत् ।

(6) VAGALĀMUKHI.

Anantadeva.

6390.

10384. **वगलाक्रमकल्पवल्ली ।** *Vagalākramakalpavallī.*

Substance, country-made paper. 9¾ × 4½ inches. Folia, 38. Lines, 9. Extent in ślokas, 950. Character, Nāgara. Date, Saṃvat 1772. Appearance, old and discoloured. Complete in three chapters.

The work lays down the procedure of the worship of Vagalāmukhī beginning with the morning rites of the worshipper. The leaves are marked with the letters प and व.

Beginning:—

गुरुं गणपतिं नत्वा वटुकं शिवमव्ययम् ।
क्रियतेऽनन्तदेवेन वगलायास्तु पद्धतिः ॥

Colophons of the different sections:—

7B, इत्यनन्तदेवेन विरचितायां वगलाक्रमकल्पवल्ल्यां प्रातरादिविवरणं प्रथमस्तवकः ।

18B, इति रेणुकापुरस्थितेन अनन्तदेवेन विरचितायां वगलाक्रमकल्पवल्ल्यां न्यासविवरणं द्वितीयस्तवक [:] ।

37A, ०वगलाकल्पवल्ल्यां पूजाविवरणं तृतीयस्तवक [:] ।

Post-colophon Statement:—

संवत् १७७२ पौष शुदि पञ्चमी सोमवासर उद्धवजी-नागेश्वर-लिखिता (:) ।

After this there are nine ślokas about drinking wine, with the colophon इति पात्रश्लोकाः (Fol. 38b). Eight of these ślokas generally agree with the first eight verses of the *Ṣoḍaśapātra* described under 6058 above.

These ślokas are followed by two ślokas about the utility of taking hemp (*vijayā*).

Anonymous.

6391.

10039. **वगलामुखीपञ्चाङ्गम् ।** *Vagalāmukhīpañcāṅga.*

Substance, country-made paper. 11 × 4½ inches. Folia, 19. Lines, 9. Extent in ślokas, 525. Character, Nāgara. Date, Saṃvat 1939. Appearance, fresh. Complete.

Beginning:—

श्रीभैरव उवाच ।

देवदेवेशि वक्ष्या(त्या)मि रहस्यमुत्तमोत्तमम् ।
पटलं वगलामुख्या गोप्यं कुरु सुरार्चिते ॥

Colophons:—

3B, इति श्रीईश्वरमततन्त्रे श्रीवगलामुख्याः पटलः समाप्तः ।

8B, ०वगलामुखीनित्यपूजापद्धतिः समाप्ता ।

11B, इति श्रीरुद्रियामले तन्त्रे उक्तं श्रीवगलामुखीत्रैलोक्यविजयं नाम कवचं समाप्तम् ।

18B, इति श्रीईश्वरमततन्त्रे श्रीदेवीवरदाचाकुंभनि (?) श्रीवगलामुखीनामसहस्रं संपूर्णम् ।

19B, इति श्रीईश्वरमततन्त्रे वगलामुखीस्तोत्रं समाप्तं । श्रीसमाप्तोयं वगलामुखीपञ्चाङ्गः ।

Post-colophon Statement:—

शुभमस्तु संवत् १९३९ मी अगहण वदी ७ शनीचर राम ।

(In a later hand) लिखवाया व्यासगणेशरामने काशीजीमे सत्पुरुषोपकारार्थं सत्यम् ।

6392.

9136. *Vagalāmukhīpañcāṅga.*

Substance, country-made paper. 12 × 5 inches. Folia, 27. Lines, 8. Extent in ślokas, 540. Character, Nāgara. Date, Saṃvat 1937. Appearance, fresh. Complete.

The contents of this MS fully agree with those of the MS described under the previous number. Here, however, the topics are said to belong to the *Viṣṇuyāmala* and not to the *Īśvaramatatantra* or the *Rudrayāmala* as in the previous MS.

Colophons of the different sections:—

5A, इति श्रीविष्णुयामले तन्त्रे श्रीवगलामुखीपटलं सम्पूर्णम्; 12A, ०त्रैलोक्यविजयवगलामुखी-नित्यपूजापद्धति सम्पूर्णम्; 15A, ०त्रैलोक्यविजयं नाम कवचं सम्पू[र्णम्] शुभम्; 25A, ०वगलामुखीसहस्रनाम सम्पूर्णम्; 27A, इति श्रीदेवीश्वरसम्वादे वगलामुखीस्तोत्रं सम्पूर्णम्।

Post-colophon Statement:—

श्रीराम राम राम असार मासे कौसुपक्षे ६ संमत १९३७ साल।

6393.

6444. ब्रह्मास्त्रविद्या। *Brahmāstravidyā.*

Substance, country-made paper. 9¼ × 4½ inches. Folia, 20. Lines, 7. Extent in ślokas, 280. Character, Nāgara. Appearance, discoloured. Complete.

This may be a part of some Tantra digest. The portion we have here deals with the procedure of the worship of Vagalāmukhī, especially in connection with black rites.

Beginning :—

अथ ब्रह्मास्त्रविद्या ।

तत्र भैरवयामले ।

श्रीदेव्युवाच ।

प्रभो त्वं भैरवश्रेष्ठ सर्व्वतन्त्रानुजीवक ।
नानारहस्यसारं च त्वत्प्रसादात् श्रुतोम्यहम् ॥
दिव्यतन्त्रं महातन्त्रं पूर्व्वपश्चिमसंज्ञकम् ।
दक्षिणोत्तरमूर्द्धञ्च ह्युपायाः कथिताः प्रभो ॥
वश्याकर्षणादिव्यञ्च मारणोच्चाटनादिकम् ।
विद्वेषं मोहनं चान्यद् विविधं कामनादिकम् ॥
विस्तारपूर्व्वं कथितं ज्ञातं व्यासेन तन्मया ।
इदानीं स्तम्भनं देव कथयस्व प्रसादतः ॥

6394.

10332. **ब्रह्मास्त्रविद्यानित्यपूजा ।** *Brahmāstravidyā-nityapūjā.*

Substance, country-made paper. $11\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 26. Lines, 8. Extent in ślokas, 600. Character, Nāgara. Date, Saṃvat 1730. Appearance, old and discoloured. Complete.

This lays down the procedure of the worship of Vagalāmukhī including the morning rites to be performed by her worshippers. The guru of the author seems to be referred to in one introductory verse which follows eight verses in the form of an interlocution between Śiva and Pārvatī. It runs:—

शिवानन्द यतिं वन्दे सर्वज्ञकरुणाकरम् ।
शिवमानन्ददातारं दृष्टिवाचामृतप्रदम् ॥

6395.

2132. वगलामुखीपद्धतिः । *Vagalāmukhīpaddhati.*

Substance, country-made paper. 5½ × 3¾ inches. Folia, 8. Lines, 12, 13. Extent in ślokas, 150. Character, Nāgara. Appearance, discoloured. Incomplete.

This gives the procedure of the worship of Vagalāmukhī. The name is given in a colophon in Fol. 6B.

Beginning :—

श्रीवगलामुख्यै नमः ।

ब्रह्मास्त्रपूजां विधिवत् प्रवक्ष्यामि समासतः ।
साधकानां हितार्थाय स्तम्भनाय च वैरिणाम् ॥

प्राणायामपूर्व्वकं गुरुचरणारविन्दं शिरसि समभ्यर्च्य षडङ्गन्यासं विधाय ऐं वगलामुखि हृदयाय नमः ।

6396.

10334. पीतासपर्य्याविधिः । *Pītāsaparyāvidhi.*

Substance, country-made paper. 7 × 4½ inches. Folia, 87, of which Fol. marked 1-11, 20, 21, 28, 30, 33, 39, 40, 44, 50, 58, 76, 78, 81 and 83 are missing. Lines, 7. Character, Nāgara. Date, Saṃvat 1818. Appearance, old and repaired. Incomplete.

This lays down a detailed procedure for the worship of Vagalāmukhī.

Colophon :—

पीतासपर्य्याविधिः समाप्तः ।

Post-colophon Statement :—

लि० मंनुजी मीती जेठ सुदी ६ वार चन्द्रे संवत १८१८ ।

6397.

237. वगलापटलः । *Vagalāpaṭala.*

Substance, country-made yellow paper. 16 × 5 inches. Folia, 3. Lines, 8. Extent in ślokas, 78. Character, Bengali. Appearance, old. Complete.

The present MS has been described in L. I. 464. It lays down a brief procedure for the worship of Vagalāmukhī. This seems to be based on the section of the *Tantrasāra* of Kṛṣṇānanda dealing with the same deity.

(7) VINDHYAVĀSINĪ.

Anonymous.

6398.

5271. विन्ध्यवासिनीपूजाप्रयोगः । *Vindhyavāsinīpūjā-prayoga.*

Substance, mill-made paper. 13 × 2½ inches. Folia, 3. Lines, 7. Extent in ślokas, 75. Character, Bengali. Appearance, fresh. Complete.

This work describes the procedure of the worship of Vindhyavāsinī. Rules of the worship of the deity under the name Śūlinī are also given in short outlines in the *Tantrasāra* of Kṛṣṇānanda.

6399.

2158. देवीपूजा । *Devīpūjā.*

Substance, country-made paper. 9½ × 5 inches. Folia, 5. Lines, 10, 11. Extent in ślokas, 80. Character, Nāgara. Appearance, old. Complete.

This contains a collection of verses uttered in connection with the worship of the Devī, especially on the occasion of the offering of different materials to her. Some of these

agree with similar *mantras* used in connection with the *Svarṇagaurīvrata* (*Vratārka*, p. 19f, *Vratarāja*, p. 31f).

Beginning :—

श्रीगणेशाय नमः। अथ देवीपूजाप्रारम्भः।

तत्रादौ कलसं पूज्य देवतां ध्यायेत्।

धृत्वा श्रीमातुलिंगं तदुपरि जगतां खेटकं पानपात्रम्
नागं लिंगं च योनिं शिरसि धृतवती राजते हेमवर्णा।
आद्या शक्तिस्त्रिरूपा त्रिगुणपरिवृता ब्रह्मणो हेतुभूता
विश्वेशा सृष्टिकर्त्री मम वसतु गृहे सर्व्वदा सुप्रसन्ना॥

ध्यायामि।

देवि देवि समागच्छ प्रार्थयेऽहं जगन्मये।
इमां मया कृतां पूजां गृहाण सुरसत्तमे॥ आवाहनम्॥
भवानि त्वं महादेवि सर्वसौभाग्यदायिके।
अनेकरत्नसंयुक्तमासनं प्रतिगृह्यताम्॥ आसनम्॥

Colophon :—

इति देवीव्रतोपयोगिपूजनं समाप्तम्।

(8) ŚĀRIKĀ.

Anonymous.

6400.

5727. **शारिकानित्यपूजापद्धतिः।** *Śārikānityapūjā-paddhati.*

Substance, country-made paper. 8¾×6 inches. Folia, 1-20+1-17 with one additional Fol. containing diagrams. Lines, 14. Extent in ślokas, 1,000. Character, Nāgara. Appearance, fresh. Complete.

The work describes the procedure of the worship of Śārikā beginning with the morning rites of the worshipper.

For other works dealing with the worship of Śārikā cf. IO. II. 5755 (*Śārikāsahasranāma*), 6958 (*Śārikā-māhātmya*).

The first part of the MS constitutes a manual of worship of the deity. With the exception of the introductory verses its beginning generally agrees with a portion of the MS (Fol. 4B) described in IO. IV. 2549. This incidentally gives the *mantras* for the use of wine (Fol. 19-20) which are also given in the *Mahākālasaṃhitāyāṃ ṣoḍaśapātram* (6058 above).

The beginning, colophon and post-colophon statement of this portion are given below.

Beginning :—

ॐ श्रीस्वात्मने गुरवे शिवायों नमः ।
ॐ श्रीदेव्यै सदा स्वफलदायिन्यै नमः ।

श्रीगणेशाय नमः ।

ॐ अधुना पद्धतिं वक्ष्ये श्रीशारिकार्चनसंज्ञितां ।
गद्यपद्यादिवाक्येन सकलागमनिश्चिताम् ॥
प्रातःकृत्यमकृत्वा तु यो देवीं भक्तितोऽर्चयेत् ।
तस्य पूजा तु विफला शौचहीना यथा क्रिया ॥
ॐ ब्राह्मे मुहूर्त्ते शयनतलादुत्थाय ... ...

Colophon :—

इति श्रीशारिकाभगवतीनित्यपूजापद्धतिः समाप्ता ।

Post-colophon Statement :—

संवत् १८३० अश्वति त्रयोदश्यां मया श्रीगोवर्द्धनकौलेन इयं शारिकापद्धतिः सम्पूर्णा कृता चित्रिता ।

The second part of the MS contains the *kavaca* (Fol. 1-2B), *sahasranāma* (2B–7A), *stava* (7A–8B) and *paṭala*

(12B–14B) of the deity. All these agree with similar topics as found in the MS described in IO. IV. 2549. According to the colophons in the present MS all these, except the *sahasranāma*, belong to the *Daśavidyārahasya* section of the *Rudrayāmala*.

This part contains the following small extracts as well :

I. *Śārikāstava* by Sāhibkaula :

Beginning (8B) :—

ॐ वन्दे देवीं शारिकां मोक्षदात्रीं ।
सर्व्वस्थां तां सर्व्वतो मोक्षदात्रीं ॥

Colophon (9B):—

इति श्रीमत्महामाहेश्वराचार्य्यवर्य्यश्रीमत्साहिबकौलविरचितः श्रीशारिकास्तवः सम्पूर्णः ।

II. *Bhairavanāthastotra* by Abhinavagupta :

Beginning (10A) :—

श्रीभैरवाय नमः ।

ॐ व्याप्तचराचरभावविशेषं
चिन्मयमेकमनन्तमनादिं ।
भैरवनाथमनाथशरण्यं
तन्मयचित्ततया हृदि वन्दे ॥

Colophon (10B) :—

इत्यभिनवगुप्ताचार्य्यविरचितं श्रीभैर[व]नाथस्तोत्रं समाप्तम् ।

III. Verses by Abhinavagupta :

Beginning (10B) :—

दत्तो मूर्द्धनि लीलयैव चरणः संसारनाम्नो रिपोः
पीतं सर्व्वरसातिशायि भरितं ज्ञानौघधारामृतम् ।
भातः स्वात्ममहेश्वरः किमपरं सम्पूर्णसर्व्वाशिषाम्
कायो भ्रश्यतु नश्यतु श्रयतु वा स्थैर्य्यं न मोक्ष ग्रहः ॥

Colophon (11A) :—

इत्यभिनवगुप्ताचार्य्यपादानां ।

IV. Verses by Utpalācārya :

Beginning (11A) :—

विश्वमेतदखिलं भवन्मयं
विश्वमध्यगत एव नन्वहम् ।
पाहि मामिति न याच्यते मया
पालनं मम तवैव पालनम् ॥

Colophon (11A) :—

इत्युत्पलाचार्य्यकृतिः ।

V. Verses by Sāhibkaula :

Beginning (11A) :—

नमस्तुभ्यं मदेकाय त्वदेकाय च मे नमः ।
तुभ्यं मह्यं सदा कस्मायनेकस्मै नमो नमः ॥

Colophon (11B) :—

इति श्रीमच्छ्रीमन्महामाहेश्वराचार्य्य-श्रीसाहिबकौलानन्दनाथ-पादानां कृतिः ।

VI. *Śukāṣṭakam* [Fol. 11B–12A] (same as the one described in ASB. VII. 5773) :

VII. *Mantra* of Chinnamastā (12A).

VIII. Rules for the consecration of a rosary (14B).

IX. *Tripurāpaṭala* (giving the details of the worship of Tripurā) :—

Beginning (15A):—

... ...

देव्युवाच । ....

देव देवी महादेवी महात्रिपुरसुन्दरी ।
त्रिकूटा षोडशी विद्या श्रीविद्यामृतरूपिणी ॥
तस्याः पञ्चाङ्गमखिलं सारात्सारोत्तमोत्तमम् ।
वद शीघ्रं महादेव यद्यहं प्रेयसी तव ॥

Colophon (17A):—

इति श्रीरुद्रयामले तन्त्रे देवीभैरवसम्वादे श्रीदेवीत्रिपुरसुन्दरी-सम्वादे श्रीत्रिपुरापटलं सम्पूर्णम् ।

(9) RĀJÑĪ.

Anonymous.

6401.

6007. **राज्ञीनित्यपूजापद्धतिः ।** *Rājñīnityapūjāpaddhati.*

Substance, country-made paper. 8×6 inches. Folia 1–9+1–26. Lines, 16. Character, Nāgara. Appearance, fresh. Complete.

The first portion of the MS lays down the procedure of the morning rites, including bathing, *sandhyā* and *tarpaṇa*, to be performed by a worshipper of Rājñī. The second portion gives the procedure of the worship of the deity which includes *pātravandana* (Fol. 19Aff—cf. No. 6058 above). For other works on this deity cf. Cat. Cat. I. 503, II. 118, III. 107.

Beginning:—

ॐ नमो राज्ञीभगवत्यै ।
अथ श्रीराज्ञीनित्यपूजापद्धतिर्लिख्यते ।

श्रीभैरव उवाच ।

शृणु देवि प्रवक्ष्यामि गद्यपद्यस्वरूपिणीम् ।
श्रीराज्ञीपद्धतिं गोप्यां मन्त्रसिद्धिप्रदायिनीम् ॥

प्रातःकृत्यमकृत्वा तु यः श्रीराज्ञीं समर्च्चयेत् ।
तस्य पूजा तु विफला शौचहीना यथा क्रिया ॥
तत्र श्रीमान् साधको ब्राह्मे मुहूर्त्ते शयनतलादुत्थाय करचरणौ
प्रक्षाल्य......

The description of the deity runs as follows in 4A (first portion) and 6A (second portion):—

ॐ उद्यद्दिवाकरसहस्ररुचिं त्रिनेत्रां
सिंहासनोपरिगतामुरगोपवीतां ।
खड्गाम्बुजा + कलशाम्रतपात्रहस्तां
राज्ञीं भजामि विहसद्वदनारविन्दाम् ॥

(10) DHANADĀ.

Anonymous.

6402.

7850. **धनदायक्षिणीप्रयोगः ।** *Dhanadāyakṣiṇīprayoga.*

Substance, country-made paper. $8\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 4. Lines, 12. Extent in ślokas, 100. Character, Nāgara. Date, Saṃvat 1904. Appearance, fresh. Complete.

This lays down the procedure of the worship of Dhanadā which partially agree with a section of the *Tantrasāra* of Kṛṣṇānanda dealing with the same topic.

Beginning :—

अथ धनदायक्षिणीप्रयोगः ।

सर्व्वमुदङ्मुखेन ।

ततूर्ध्वं बिन्दुसंयुक्तं लज्जाबीजं समुद्धरेत् ।
लक्ष्मीबीजं ततो माया सम्बोधय रतिप्रिये ॥

वह्निजायावधिः प्रोक्तो मन्त्रराजोऽयमुत्तमः ।
लक्ष्मीबीजं कुवेरानुमतोऽयं मन्त्रः ।

प्रातःकृत्यादिनित्यविधिं सम्पाद्य ततः पूजामण्डपं समागत्य ॐ ऐं ह्रीं श्रीं धनदापुष्पमण्डपाय नमः । इति मण्डपं सम्पूज्य अस्त्राय फडिति द्वारमुद्घाट्य द्वारोर्द्ध्वशिखायां गं गणपतये नमः वां श्रियै नमः द्वारदक्षिणशाखोपरि गङ्गायै नमः......

End:—

जपं देव्या हस्ते समर्प्य प्रदक्षिणनमस्कारैः परितोष्य विसृजेत् ।

Colophon:—

इति संक्षिप्तप्रयोगः ।

Post-colophon Statement:—

संवत् १९०४ मार्गशीर्षकृष्ण ति ५ मन्दे विद्याधरेण लिखितं ।

(11) CAṆḌĪ.

Paramānandanātha.

6403.

8418. **नवार्णचन्द्रिका ।** *Navārṇacandrikā.*

Substance, machine-made paper. 9×4 inches. Folia, 45. Lines, 10. Extent in ślokas, 675. Character, Nāgara. Date, Śaka 1715. Appearance, fresh. Complete in five chapters.

The work deals with the worship of Caṇḍī including the daily duties of a worshipper of the deity. Compare in this connection No. 5869 above.

Beginning:—

श्रीगणेशाय नमः । श्रीआर्यादुर्गायै नमः ।
अथ नवार्णचन्द्रिकाप्रारम्भः ।

शिवं गुरुं गणाध्यक्षं प्रणम्य परदेवतां ।
नवार्णाया महादेव्याः प्रवक्ष्येऽर्चनचन्द्रिकां ॥ १ ॥

तत्रादौ नवार्णोद्धारः।

उक्तं च डामरतन्त्रे।

वाङ्माया मदनो दीर्घा लक्ष्मीस्तन्त्रीश्रुतीन्दुयुक्।
डायै सदृग्जलं कूर्म्मद्वयं झिंटीशसंयुतं॥

अस्यार्थः।

वाक् ऐं इति माया ह्रीं मदनः क्लीं दीर्घा लक्ष्मीश्चकारः तन्त्री मकारः श्रुति[ः] उकारः इन्दुयुक् बिन्दुसंयुक्तं मुं। इति डायै स्वरूपं दृक् इकारः जलं वकार एतत्संयुक्तं वि इति। कूर्म्मद्वयं चकारद्वयं झिंटीश एकारः एतत्संयुक्तं च्चे इति। एवम्प्रकारेण जातो नवार्णमन्त्रः॥ ऐं ह्रीं क्लीं चामुण्डायै विच्चे इति॥

त्रैलोक्यडामरं तन्त्रं शृणु भूप नवाक्षरं।
यस्य विज्ञानमात्रेण परमैश्वर्य्यवान्नरः॥१॥

End :—

अथ चण्डीहृदयं पठेत्।

ऐं ह्रीं क्लीं जयजय चामुण्डे चण्डिके चिदशमु[कु]टकोटिसंघृष्टचरणारविन्दे गायत्रि सावित्रि सरस्वति महाहिकृताभरणे भैरवरूपधारिणि प्रकटितदंष्ट्रोग्रवदने घोरघोरानने ज्वलज्ज्वालापरिवृते महाट्टहासधवलितदिगन्तरे दिनकरसहस्रकोट्युदयसमप्रभे यमस्वरूपे......

Colophons of the different chapters :—

9B, इति परमानन्दनाथेनोक्तनवार्णचन्द्रिकायां आह्निकाख्य[ः]प्रथमप्रकाशः।

21A, इति परमानन्दनाथोक्तनवार्णचन्द्रिकायां न्यासविधानाख्यो द्वितीयः प्रकाशः।

30A, ०अर्घ्यसाधनाद्युपचारान्ताख्यः तृतीयः प्रकाशः।

40A, ०आवरणपूजादिदेवीविसर्ज्जनान्ताख्यः चतुर्थः प्रकाशः।

44A, ०पात्रविसर्ज्जनान्ताख्यः पञ्चमः प्रकाशः।

Post-colophon Statement:—

शके १७१५ प्रमादी संवत्सरे पौषकृष्णपञ्चम्यां भौमे गुर्ज्जरोप-
नाम्ना लक्ष्मीजनार्द्दनसूनुना कृष्णेन लिखितं स्वार्थं परं, पयोग्यं च ।

Śrīnivāsa.

6404.

1793. चण्डीसपर्य्याक्रमकल्पवल्ली । *Caṇḍīsaparyākrama-kalpavallī.*

Substance, country-made paper. 10 × 4¼ inches. Folia, 56. Lines, 11. Extent in ślokas, 1,210. Character, Nāgara. Date, Saṃvat 1777. Appearance, old. Complete in five stavakas.

MSS of the work have been described in L. V. 1855 and Mad. XII. 5750.

The subject-matter of every chapter is indicated in the concluding verse of it:—

Fol. 12B, श्रीश्रीनिवासेन विनिर्मितायां
श्रीमत्सपर्याक्रमकल्पवल्ल्याम् ।
गतोऽयमाद्य[ः] स्तवकः प्रमाण-
निरूपणाख्योत्तमसौरभाढ्यः ॥

Fol. 21A, ...गतो द्वितीयः स्तवकः प्रभातस्नानादिकर्मोत्तमसौरभाढ्यः ।

Fol. 29B, ...गतस्तृतीयः स्तवकोऽत्र नित्यपूजाप्रयोगाभिधसौरभाढ्यः ।

Fol. 44A, ...गतश्चतुर्थस्तवकोऽत्र नानाकाम्यप्रयोगोत्कटसौरभाढ्यः ।

Fol. 55B, ...गतः किलायं स्तवकस्तु पञ्चमः स्तवमद्यपाद्युत्कटसौरभाढ्यः ।

Post-colophon Statement:—

संवत् १७७७ साधारणनाम-संवत्सरान्तर्गतमङ्गलमासोत्कृष्टप्रद-
श्रावणशुद्धसप्तमीशनौ सत्स्वातिनक्षत्र तस्मिन् शुभदिने काशीस्थ-
गोविन्दभट्टब्रह्मपुरीकरेण लिखितो ग्रन्थश्चायं समाप्तः ।

Kāśīnātha.

6405.

10473. चण्डिकार्चनदीपिका । *Caṇḍikārcanadīpikā.*

Substance, country-made paper. 10 × 4½ inches. Folia, 51. Lines, 8. Extent in ślokas, 800. Character, Nāgara. Date, Saṃvat 1896. Appearance, discoloured. Complete.

The work deals with the details of the Navarātra festival, giving both the *pramāṇa* (Fol. 1–20) and the *prayoga* (Fol. 21–37). The *pramāṇa* section quotes from original texts and digests. Reference is made in this connection to *Pratāparudranibandha* (Fol. 1B), *Gauḍanibandha* (4A), Bhojarāja (9B), Nṛsiṃhaprasāda (10A), Viśvarūpācārya (12A), *Dhavalanibandha* and Rūpanārāyaṇa (20B). The concluding portion of the work (Fol. 37B–51) deals with miscellaneous matters like *śatacaṇḍīvidhāna* and *sahasracaṇḍīvidhāna.*

Beginning :—

करधृतवीणां वाणीं जगत्प्रवीणां प्रसूनधृतवेणीं ।
विद्वत्प्रवीणताप्यै शोभनवाणीमहं प्रणमे ॥
एकवीरापदद्वन्द्वं निधाय हृदि सुन्दरं ।
काशीनाथः प्रतनुते चण्डिकार्चनदीपिकां ॥

तत्र श्रीरुद्रयामले ।
आश्विने मासि सम्प्राप्ते शुक्लपक्षे विधेस्तिथौ ।
प्रारभ्य नवरात्रं स्याद्दुर्गा पूज्या तु तत्र वै ॥

Colophon :—

इति श्रीमद्भट्टोपनामकजयरामभट्टसुतवाराणसीगर्भसम्भव-काशीनाथविरचिता चण्डिकार्चनदीपिका समाप्ता ।

Post-colophon Statement :—

संवत् १८६६ शक १७६१ मार्गशीर्ष कृष्ण १४ बुधे लिखितं ब्रजवासी ज्योतिर्वित् काश्यां ।

6406.

6017. *Caṇḍikārcanadīpikā.*

Substance, country-made paper. 9½×4½ inches. Folia, 4 to 50. Lines, 10. Extent in ślokas, 900. Character, Nāgara. Date, Saṃvat 1908. Appearance, new. Incomplete.

Post-colophon Statement :—

संवत् १९०८ मौ० माघवदि २ वारवौहपैके समात संपुणः राम दृसषतसंव संकरलाल कारथ अस्थान सथवा ॥ राम ॥

Divākara.

6407.

8939. **शतचण्ड्यादिप्रदीपः ।** *Śatacaṇḍyādipradīpa.*

Substance, country-made paper. 10×4 inches. Folia, 7. Lines, 9. Extent in ślokas, 130. Character, Nāgara. Appearance, fresh. Complete.

This contains the *pramāna* and *prayoga* of *Śatacaṇḍī* (Fol. 1–6A) and *Sahasracaṇḍī* (Fol. 6A–7A). Rules for *Śatacaṇḍī* are given both according to the *Rudrayāmala* (Fol. 1–2A) and the *Ḍāmarakalpa* (Fol. 2A–3B).

Beginning :—

नमस्कृत्वाव्ययं देवं महादेवतनूद्भवः ।
दिवाकरः प्रकुरुते शतचण्ड्यादिपद्धतिम् ॥

तत्रादौ मूलवाक्यानि । रुद्रयामले ।

शतचण्डीविधानन्तु प्रोच्यमानं शृणुष्व तत् ।
सर्वोपद्रवनाशार्थं शतचण्डीं समारभेत् ॥

Colophon :—

इति श्रीभारद्वाजमहादेवसूरिसूनुदिवाकरसूरिविरचिताः शत-चण्ड्यादिप्रदीपाः ।

Śrīkṛṣṇa.

6408.

8940. **शतचण्डीप्रयोगः ।** *Śatacaṇḍīprayoga.*

Substance, country-made paper. 9½ × 4 inches. Folia, 13. Lines, 9. Extent in ślokas, 270. Character, Nāgara. Appearance, fresh. Complete.

It begins by quoting a number of verses from chapter XVIII of the *Mantramahodadhi* dealing with the ceremony, and then describes the procedure of its performance.

Colophon :—

इति चित्पावनकरोपनामक-नृसिंहभट्टात्मज-नारायणभट्टसूनु-श्रीकृष्णकृतो मन्त्रमहोदध्यनुसारी शतचण्डीप्रयोगः ।

Nīlakaṇṭha.

6409.

5791. [सप्तशत्यङ्गषट्कव्याख्यानम् । *Saptaśatyaṅgaṣaṭka-vyākhyāna.*]

Substance, country-made paper. 12 × 5 inches. Folia, 25. In Tripāṭha form. Character, Nāgara. Appearance, fresh (except a portion of the right-hand side of some leaves damaged by worms). Incomplete.

The work explains the six *aṅgas* of the *saptaśatī* (e.g., *kavaca*, *argalā* and *kīlaka*, and the three *rahasyas*—*vaikṛtika-rahasya*, *prādhānika-rahasya* and *mūrti-rahasya*). It has an introduction which brings out the real significance of

the worship of Śakti. In the present MS the commentary is accompanied by the text; the portions on the *rahasyas* are absent here. The introduction, which covers Fol. 1–11A, refers to several other works of the commentator, e.g., commentaries on the *Devībhāgavata* and the *Śaktitattva-vimarśinī* (Fol. 9B). This work has been referred to by the author in the concluding portion of the introduction to his commentary on the *Devībhāgavata*.

Beginning of the commentary:—

बन्धूकबन्धूभवदाननाया भामैव दासीकृतशोणसिन्धोः ।
सानन्दवृन्दारकवन्दिताङ्घ्रेः भामः शिवाया वयमेव दासाः ॥
तिथ्यै[:] शिष्यैश्चतुर्भिर्योऽमुष्य लोकस्य शान्तये ।
अवाततार तारात्मा तं वन्दे शङ्करं गुरुम् ॥
श्रीलक्ष्मीं मातरं रङ्गनाथाख्यं पितरं गुरुम् ।
काशीनाथश्रीधराख्यौ गुरू नत्वा यथामति ॥
शैवोपनामकेनैव नीलकण्ठेन केनचित् ।
सप्तशत्यङ्गषट्कस्य व्याख्यानं तन्यते मुदा ॥

Colophons of the different sections:—

18A, इति श्रीशैवोपनामकरङ्गभट्टसुतलक्ष्मीगर्भजनीलकण्ठभट्टकृतं सप्तशत्यङ्गकवचविवरणं समाप्तिमगमत्; 20B, इत्यर्गलाविवरणम्; 25B, इति श्रीशैवोपनामकरङ्गनाथसुतलक्ष्मीगर्भजनीलकण्ठभट्टकृतं कीलकविवरणं समाप्तम् ।

6410.

8765. *Saptaśatyaṅgaṣaṭkavyākhyāna.*

Substance, country-made paper. 13 × 6 inches. Folia, 26. Lines, 16. In Tripāṭha form. Character, Nāgara. Appearance, fresh. Complete.

The present MS also contains both the text and the commentary.

End :—

रक्ताम्बरादरुणविम्बफलाधरोष्ठा-
चन्द्रार्धबद्धमुकुटात् करुणासमुद्रात् ।
पाशाङ्कुशाभयवरादुपकारशक्तिनेत्राद्
अन्तःपुरात् पुररिपोरपरं न विद्मः ॥
श्रीमच्छैवकुलोत्पन्नो रङ्गनाथात्मजः सुधीः ।
श्रीलक्ष्मीगर्भसम्भूतो नीलकण्ठो विधानतः ॥
समस्तत्यङ्गषट्कस्य व्याख्यां यः कृतवान् शुभाम् ।
तया तुष्यतु सा लक्ष्मीस्तथा श्रीभुवनेश्वरी ॥

6411.

149. देवीकवचम् । *Devīkavaca.*

Substance, country-made paper. 17 x 3¾ inches. Folia, 1-2. Lines, 9. Extent in ślokas, 60. Character, Bengali. Appearance, old. Complete.

The present MS has been described in L. I. 459.

6412.

3781. *Devīkavaca.*

Substance, country-made paper. 14 x 3 inches. Folia, 4. Lines, 7. Extent in ślokas, 100. Character, Bengali. Appearance, discoloured and faded. Complete.

This contains the *Kīlakastotra* along with the *kavaca.*

6413.

9835. *Devīkavaca.*

Substance, country-made paper. 6½ x 3 inches. Folia, 9. Lines, 6. Extent in ślokas, 60. Character, Nāgara. Appearance, old. Complete.

The *kavaca* is followed by the *Argalāstotra* (Fol. 8B–9B) which is incomplete.

6414.

10865. *Devīkavaca.*

Substance, country-made paper. 10 × 4½ inches. Folia, 7. Lines, 9. Extent in ślokas, 126. Character, Nāgara. Appearance, fresh. Complete.

This contains besides the *kavaca* (Fol. 1–5A), the *Argalāstotra* (Fol. 5A–6A) and *Kīlakastotra* (Fol. 6A–7A).

6415.

11299. [चण्डीपूजाविधिः । *Caṇḍīpūjāvidhi.*]

Substance, country-made paper. 10 × 3½ inches. Folia, 1–21. Lines, 9. Extent in ślokas, 550. Character, Newari. Date, 899 N.S. Appearance, old. Complete.

This lays down the procedure for the worship of the deity including the daily duties of a worshipper of Caṇḍikā.

Important colophons:—

15B, इति चण्डिकाकल्पोक्त-सप्तशतीदेव्याः पद्धतिपूजाक्रमं संपूर्णम्; इति नवदुर्गापूजा; 17A, इति रेवन्तपूजा समाप्ता; 21B, इति दुर्गाया प्रतिश्लोकाहुतिविधानं समाप्तमिति।

Post-colophon Statement:—

श्रीश् चण्डिकाप्रीतिरस्तु। सं ८९९ भाद्रवदि ११ ॥ शुभम् ॥

6416.

11340. *Caṇḍīpūjāvidhi.*

Substance, country-made yellow paper. 10 × 4½ inches. Folia, one long sheet of paper with 36 folds. Lines, 7-8. Character, Nāgara. Extent in ślokas, 530. Appearance, fresh. Complete.

It lays down a detailed procedure for the worship of Caṇḍī.

6417.

8799. [सप्तशतीविधानम्। *Saptaśatīvidhāna.*]

Substance, country-made paper. 9½ x 5 inches. Folia, 17. Lines, 9. Extent in ślokas, 125. Character, Nāgara. Appearance, fresh. Complete.

This deals with the rules regarding the reading of the Saptaśatī and cognate matters and contains the following:—

रहस्यतन्त्रोक्तगुरुकीलक (Fol. 1–3B), गुरुकीलकविवरण by Bhāskararāya (3B–5A), [चण्डीपाठ]प्रयोग (5A–11A), शतचण्डीविधान (11A–12A), सहस्रचण्डीविधान (12A–13A), चण्डीपाठफल from the *Vārāhītantra* (13A–14A), चण्डीपाठस्य काम्यफलप्रयोग from the *Haragaurītantra* (14A–14B), चण्डीपाठविधान from the *Māricakalpa* (15A–16A), कात्यायनीतन्त्रोक्तसप्तशतीपाठप्रकार (16A–17B).

6418.

11101. *Saptaśatīvidhāna.*

Substance, country-made paper. 9½ x 4 inches. Folia, 5. Lines, 10. Character, Nāgara. Appearance, fresh. Incomplete.

This and the following work contain topics similar to those indicated above.

6419.

11359. *Saptaśatīvidhāna.*

Substance, country made yellow paper. 9 x 4 inches. Folia, 1–7. Lines, 7. Extent in ślokas, 70. Character, Nāgara. Appearance, fresh. Incomplete.

Headings of topics dealt with in the work:—

1, अथ पुटितविधिः; 3B, अथ शतचण्डीविधिः; 5A, अथ वाराहीतन्त्रे हरगौरीसंवादे चण्डीपाठफलम्।

(12) GĀYATRĪ.

Kāśīnātha.

6420.

6016. **गायत्र्यर्चनदीपिका ।** *Gāyatryarcanadīpikā.*

Substance, country-made paper. 9½ × 4½ inches. Folia, 1-2, 5-12. Lines, 13. Extent in ślokas, 300. Character, Nāgara. Appearance, old and discoloured. Complete.

This describes the worship of the deity beginning with the morning rites of the worshipper.

Beginning :—

श्रीगणेशाय नमः । श्रीकृष्णाय नमः ।

दक्षिणामूर्त्तिपादाब्जभ्रमरीभूतमौलिना ।
रच्यते काशीनाथेन गायत्र्यर्चनदीपिका ॥

Colophon :—

इति श्रीभडोपनामक-शिवरामभट्टात्मज-जयरामभट्टाभिधशिव-भक्तसूनुमन्त्रशास्त्रप्रवीणकाशीनाथविरचिता गायत्र्यर्चनदीपिका समाप्ता ।

Śāmba Bhaṭṭa.

6421.

2077. **गायत्रीपुरश्चरणप्रयोगः ।** *Gāyatrīpuraścaraṇa-prayoga.*

Substance, country-made paper. 8½ × 4 inches. Folia, 15. Lines, 8. Extent in ślokas, 170. Character, Nāgara. Appearance, discoloured. Complete.

It contains the first 21 verses of chapter XXI of the *Śāradātilaka*, followed by a short *paddhati* of *gāyatrī-puraścaraṇa.*

Beginning:—

अथ शारदातिलके गायत्रीपुरश्चरणविधिप्रारम्भः ।

अथो वदामि गायत्रीं तत्त्वरूपां त्रयीमयीम् ।
यया प्रकाश्यते ब्रह्म सच्चिदानन्दलक्षणम् ॥
प्रणवाद्या व्याहृतयः सप्त स्युस्तत्पदादिका[ः] ।
चतुर्विंशत्यक्षरात्मा गायत्री शिरसान्विता ॥

End:—

अभिषेकदशांशेन ब्राह्मणभोजनं कृत्वा दक्षिणां दत्त्वाशिषो गृहीत्वा मया कृतस्य चतुर्विंशतिलक्षात्मकगायत्रीपुरश्चरणसम्पूर्णमस्त्विति भवन्तो ब्रुवन्तु । तैः सम्पूर्णमस्त्विति वदेयुः ।

Colophon:—

इति शारदातिलकोक्त-भट्टशङ्करात्मजभट्टशाम्बकृत-गायत्रीपुरश्चरणप्रयोगः समाप्तः ।

Śaṅkara Dhāra.

6422.

5959. **गायत्रीपुरश्चरणपद्धतिः ।** *Gāyatrīpuraścaraṇa-paddhati.*

Substance, machine-made paper. 10 × 4½ inches. Folia, 49+49. Lines, 10. Extent in ślokas, 1,100. Character, Nāgara (in two different hands). Date, Saṃvat 1942. Appearance, fresh. Complete.

Beginning:—

श्रीगणेशाय नमः ।

हेरम्बं प्रणिपत्य सद्गुणनिधिं वत्सालसंज्ञं ततं
नानाशास्त्रविचारणैकनिपुणं ज्ञानाब्धिपूर्णं गुरुम् ।
धारेत्युपनामको वितनुते विद्वन्मुदे शङ्करः
सावित्रीं सरणीं प्रथमफलदां कल्यानुतन्वानुगां ॥

तत्र तावत् सावित्रीशब्देन परदेव[ते]त्युच्यते ।

End :—

विश्वामित्रवशिष्ठा[दी]न् कल्पानालोच्य [य]त्नतः ।
तेभ्यः सारं [स]मुद्धृत्य स्मृतितन्त्रानुसारत ॥
गायत्र्या[ः]सरणिस्त्वेषा मया कृता सदा मुदे ।
सूक्ष्मं वात्र दुरूह्मं तत् संशोध्यं कृपया बुधैः ॥

Colophon :—

इति स्मृतितन्त्रेण गायत्रीपुरश्चरणपद्धतिः समाप्ता ।

Post-colophon Statement :—

संवत् १९४२ लिखितं गणेशभट्टेन स्वार्थे परार्थे च ।
शुभं भूयात् ।

Of the works quoted or referred to, mention may be made of: (1A)—भारद्वाजीयसूत्र, नारायणोपनिषत्, गीता, संग्रह, वृद्धपराशरस्मृतिभाष्य, आग्नेय, पाद्म, and शारदा ; (3A)—तन्त्रान्तर, पारिजातोदाहृतन्यासविधान ; (3B)—शिवरामकृत सा[वि]त्रीप्रकाशिका ; (4B)—भारद्वाजीयधर्मशास्त्रव्याख्या, स्मृति ; (5B)—वैशम्पायनसंहिता ; (7A)—विश्वामित्रसंहिता ; (11A)—विश्वामित्रवशिष्ठादिकल्प । The portion beginning from 11A contains the *prayoga* proper and does not refer to any work.

Anonymous.

6423.

6010. गायत्रीपद्धतिः । *Gāyatrīpaddhati.*

Substance, country-made paper. 10 × 4¼ inches. Folia, 2–26. Lines, 12, 13. Extent in ślokas, 500. Character, Nāgara. Appearance, fair. Incomplete.

Three leaves in the beginning marked 1–3 contain a *gāyatrīkavaca* attributed to the *Rudrayāmala* but it generally agrees with the one attributed to the *Vaśiṣṭhakalpa* and described below.

The work describes the details of the worship of *gāyatrī* beginning with the morning rites to be performed by the worshipper and including rites requiring the use of wine, etc.

Colophon :—

इति श्रीरुद्रयामले तन्त्रे गायत्रीरहस्ये तत्त्वसारे गायत्रीपद्धतिः समाप्ता ।

Post-colophon Statement :—

इदं पुस्तकं लिखितं श्रीरामचन्द्र श्रीसूर्य्यचन्द्र प्रति नित्य उदया अस्त कर्त्तव्य देही सुत्पत्तिकजनकृपया स्त्रीपुरुषलोकलौकिक-भक्तिपुरःसरधनुर्वेदविद्यावनिता वलिताकृपया धनवान् मानुष-धनिकमहान् लोकदयया सुन्दरस्त्रीपुरुषसेवितसेवेन श्रीरङ्गधाम-मेन वैकुण्ठाधीश्वरश्रीरङ्गनाथस्य पुस्तकम् ।

6424.

10445. **गायत्र्यर्चनरत्नमाला ।** *Gāyatryarcanaratnamālā.*

Substance, country-made paper. $11 \times 4\frac{1}{2}$ inches. Folia, 22. Lines, 9. Extent in ślokas, 400. Character, Nāgara. Date, Saṃvat 1920. Appearance, fresh. Complete.

Though principally dealing with the daily rites of the worshippers and the नित्यपूजा of the deity, it incidentally refers to नैमित्तिकपूजा and पुरश्चरण (Fol. 21).

Beginning :—

श्रीगणेशाय नमः ।

ॐ प्रातर्निद्राविरामः प्रणाममथ हरेः स्नानं सन्ध्या प्रणामः.

पूजा जाप्यश्च होमः प्रमुदितमनसा वेदशास्त्रानुपाठः ।

भुक्तं नैवेद्यशेषः द्युतिधिसहयुतं सत्पुराणावलोकं
रात्रौ ध्यानञ्च विष्णोस्त्रिह सुकृतिनामन्वहं यान्ति काल[ा]ः ॥
प्रातः शिरसि [शुक्लाब्जे] द्विनेत्रं द्विभुजं गुरुं।
वराभययुतं शान्तं तं स्मरेन्नामपूर्व्वकम् ॥

Colophon :—

इति गायत्र्यार्च्चनरत्नमाला समाप्ता।

Post-colophon Statement :—

श्रीसंवत् १९२० मिति फाल्गुन शुक्ल ८ बुधवासरे हस्ताक्षर
गोविन्दलाल मोहरि।

6425.

The different syllables of the Vedic *gāyatrī* are here invoked for the protection of the different parts of the body. MSS of *gāyatrīkavaca* attributed to *Nīlatantra* and *Āgamasandarbha* are described in HPR. III. 74-5.

Beginning :—

अस्य श्रीगायत्रीकवचस्तोत्रमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामाथर्वाणि छन्दांसि परब्रह्मरूपिणी गायत्री शक्तिर्देवता भू[ः] बीजं भुवः शक्तिः सुवः कीलकं गायत्रीप्रसादसिद्ध्यर्थे गायत्रीमन्त्रपठनं करिष्ये ।

स्वर्णाभसर्पाङ्कितहस्तां शुद्धनिर्म्मलज्योतिषीं ।
सर्व्वतत्त्वमयीं वन्दे गायत्रीं वेदमातरम् ॥

Colophon :—

वशिष्ठकल्पे गायत्रीकवचं सम्पूर्णम् ।

6722.

5052. *Gāyatrīkavaca.*

Substance, country-made paper. 13×3 inches. Folia, 2. Lines, 7. Extent in ślokas, 30. Character, Bengali. Appearance, discoloured. Complete.

Beginning:—

पार्व्वत्युवाच ।

देवदेव महादेव संसारार्णवतारक ।
गायत्रीकवचं देव कृपया कथय प्रभो ॥

ईश्वर उवाच ।

शृणु देवेशि सावित्रीमाहात्म्यं पापनाशनम् ।
महाव्याधिभयात् पापाद् दुःखसंसारबन्धनात् ।
प्रतिग्रहान्नदोषाच्च पातकादुपपातकात् ।
अतिगोप्यं महापुण्यं त्रिकोटितीर्थसंयुतम् ॥
सर्वयज्ञमयं देव परं ब्रह्ममयं सदा ।
कवचं कथयाम्यद्य पार्वति प्राणवल्लभे ॥

Colophon:

इति श्रीरुद्रयामले शिवपार्व्वतीसम्वादे गायत्रीकवचं समाप्तम् ।

This is different from, though similar to, the *kavaca* in the MS described above.

6723.

9506. [गायत्रीस्तोत्रादि । *Gāyatrīstotrādi.*]

Substance, country-made paper. 9 × 4½ inches. Folia, 5. Lines, 14. Extent in ślokas, 150. Character, Nāgara. Appearance, good. Complete.

This contains hymns like the गायत्र्यष्टोत्तरशतदिव्यनामस्तोत्र (Fol. 1-2A) [already noticed in L. II. 882] and गायत्रीकवचस्तोत्र (Fol. 4B-5A) which agrees with the one assigned to the *Vasiṣṭhakalpa* and described above (No. 6721).

It has also sections dealing with rites for muttering the *gāyatrī* (Fol. 2Bff) and describing what is called a *gāyatrīmālāmantra* (Fol. 5A-B).

6724.

9407. गायत्रीस्तवराजस्तोत्रम् । *Gāyatrīstavarājastotra.*

Substance, country-made paper. 8×3 inches. Folia, 5. Lines, 9. Extent in ślokas, 50. Character, Nāgara. Date, Saṃvat 1789. Appearance, old. Complete.

The colophon of the present MS attributes the *stotra* to Viśvāmitra (इति विश्वामित्रविरचितं गायत्रीस्तवराजस्तोत्रं सम्पूर्णम्) । Another MS belonging to the old collection of the Society and noticed in L. II. 886 assigns it to the *Viśvāmitra-saṃhitā.*

6725.

3020. गायत्रीसहस्रनामस्तोत्रम् । *Gāyatrīsahasranāma-stotra.*

Substance, country-made paper. 5½×3 inches. Folia, 27. Lines, 7. Extent in ślokas, 100. Character, Nāgara. Appearance, old. Complete.

The present MS has been described in L. X. 4073.

Post-colophon Statement:—

शके १७१२ चैत्र शु ७। भौमवासरे संवत् १८४६ द्रष्टयो शुभनामाब्दे। तद्दिने प्रातः समाप्तिमगमत्।

The last three folia of the MS contains a description of the procedure of the rite called *gāyatrītarpaṇa.*

(13) Sarasvatī.

6726.

11069. सिद्धसरस्वतीस्तोत्रम् । *Siddhasarasvatīstotra.*

Substance, machine-made paper. 7×4½ inches. Folia, 4. Lines, 10. Extent in ślokas, 25. Character Nāgara. Appearance, fair. Complete.

The *stotra* proper begins from Fol. 2B, the earlier portion containing *mantras* and *dhyānas*. It generally agrees with a Sarasvatīstotra well known in Bengal and published in *stotra* collections like the *Stavakavacamālā* (Basumati Sahitya Mandir, Calcutta, 1334 B.S., pp. 554–6).

Beginning :—

2B,

ॐ क्लीं क्लीं हृद्यैकबीजे शशिरुचिकमले कल्पवृत्तस्थशोभे
भव्ये भव्यानुकूले कुमतिवनदवे विश्ववन्द्याङ्घ्रिपद्मे ।
पद्मे पद्मोपविष्टे प्रणतजनमनोमोदसम्पादयित्रि
प्रोत्फुल्लज्ञानकूटे हरिनिजदयिते देवि संसारसारे ॥

Colophon :—

इति श्रीसनत्कुमारसंहितायां सिद्धसरस्वतीस्तोत्रं समाप्तम् ।

(14) LAKṢMI.

6727

10866. **महालक्ष्मीहृदयस्तोत्रम् ।** *Mahālakṣmīhṛdaya-stotra.*

Substance, country-made paper. 6½ × 4½ inches. Folia, 10. Lines, 11. Extent in ślokas, 140. Character, Nāgara. Appearance, good. Complete.

Beginning :—

ॐ अस्य श्री आद्यादिमहालक्ष्मीहृदयस्तोत्रमन्त्रस्य भार्गव
ऋषिः ... ...

2B, ॐ श्रीमत्सौभाग्यजननीं स्तौमि लक्ष्मीं सनातनीम् ।
सर्व्वकामफलावाप्तिसाधनैकसुखावहाम् ॥
स्मरामि नित्यं देवेशि त्वया प्रेरितमानसः ।
त्वदाज्ञां शिरसा धृत्वा भजामि परमेश्वरीम् ॥

End :—

ध्यायेल्लक्ष्मीं प्रहसितमुखीं कोटिबालार्कभासां
विद्युद्वर्णाम्बरवरधरां भूषणाढ्यां सुशोभाम् ।
बीजापूरं सरसिजयुगलं बिभ्रतीं स्वर्णपात्रं
भर्त्रा युक्तां मुहुरभयदां मह्यमप्यच्युतश्रीः ॥

Colophon :—

इति श्रीअथर्वणरहस्ये आद्यादिश्रीमहालक्ष्मीहृदयस्तोत्रं समाप्तम् ॥

(15) MISCELLANEOUS.

6728.

9324. गङ्गाकवचम् । *Gaṅgākavaca.*

Substance, country-made paper. 10 × 4½ inches. Folia, 5. Lines, 9. Extent in ślokas, 80. Character, Nāgara. Date, Samvat 1914. Appearance, fair. Complete.

Beginning :—

श्रीदेव्युवाच ।
देवदेव महादेव भक्तानुग्रहकारक ।
गङ्गायाः कवचं ब्रूहि यद्यहं तव वल्लभा ॥ १ ॥
श्रीसदाशिव उवाच ।
लक्षवारसहस्राणि वारितानि तव प्रिये ।
स्त्रीस्वभावान्मया देवि पुनस्त्वं परिपृच्छसि ॥

End :—

सर्व्वैश्वर्य्यं भवेत् सत्यं सत्यमेव न संशयः ।
एषा सम्मोहिनी विद्या पित्रा पुत्रो न कथ्यते ॥ ४३ ॥
गोप्यं गोप्यं पुनर्गोप्यं गोप्यं गोप्यं पुनः पुनः ।
समाह्ययोनिबद्धोऽप्यं विद्धि सत्यागमा जगुः ॥ ४४ ॥

Colophon :—

इति श्रीरुद्रयामले तन्त्रे प्रत्यक्षसिद्धिकरे श्रीगङ्गादेव्या[ः] त्रैलोक्यमोहनं नाम कवचं सम्पूर्णम्

6729.

4819. योगिनीविजयस्तवः । *Yoginīvijayastava.*

Substance, country-made paper. 8½ × 3 inches. Folia, 1–45 of which Fol. 2 is missing. Lines, 6. Extent in ślokas, 500. Character, Newari. Appearance, fair. Complete.

Beginning :—

गुह्यस्तवं प्रवक्ष्यामि महाभैरवनिर्गतम् ।
भाषितं देवदेवेन भैरवेण महात्मना ॥
गुह्यपद्मक्रमेणैव साधकानां हिताय वै ।
भुक्तिमुक्तिप्रदं दिव्यं देवासुरनमस्कृतम् ॥

End :

महाकुब्जमते ख्यातं योगिनीविजयस्तवम् ।
पिप्पलादेन मुनिना पृथिव्यामवतारितम् ॥
भैरवेण पुराख्यातं देव्या नियममुत्तमम् ।
यः पठेत् परया भक्त्या सोपचारेण नित्यशः ॥
स सर्व्वशुभमाप्नोति इत्येवं भैरवोऽब्रवीत् ॥

Colophon :—

इति ब्रह्मयामलद्वासप्ततिसाहस्रे रत्नाद्ये नवाक्षरविधाने योगिनीविजयस्तवः समाप्तः ।

6730.

1870. वशीकरणस्तोत्रम् । *Vaśīkaraṇastotra.*

Substance, country-made paper. 7½ × 4 inches. Folia, 1–3. Lines, 7. Extent in ślokas, 25. Character, Nāgara. Appearance, old. Complete.

The present MS is described in L. X. 3248. The hymn is addressed to Vārāhī.

6731.

182. मातृकाकवचम् । *Mātṛkākavaca.*

Substance, country-made paper. 13 × 4½ inches. Folia, 6. Lines, 7-8. Extent in ślokas, 110. Character, Bengali. Appearance, fair. Complete.

Different letters of the alphabet are invoked here for the protection of different parts of the body. The present MS was described in L. I. 486.

Beginning:—

ईश्वर उवाच ।

शृणु कमलपत्राक्षि मातृकां ब्रह्मरूपिणीम् ।
ब्रह्मादिभिः सदा ध्येयां सूक्ष्मां पद्मवने स्थिताम् ॥
अकारादिक्षकारान्तां प्रणम्य निगदामि ते ।
सदा ब्रह्ममयीं नित्यां योगपद्मोपरिस्थिताम् ॥

End:—

एतत्त्वत्त्वं महेशानि यो जानाति नरोत्तमः ।
स एव तु महादेवि देवीपुत्र इव क्षितौ ॥
सोऽहं शिवो महादेवि देवीरूपस्य शक्तिमान् ।
स शाक्तः शिवभक्तश्च स [च] वो वैष्णवोत्तमः ॥
स एव धन्यो यस्यार्थे महेशो व्यग्रमानसः ॥

Colophon:—

इति चिन्तामणितन्त्रे देवीश्वरसंवादे मातृकाश्रीजगन्मङ्गलं नाम कवचं समाप्तम् ॥

6732.

10313. रजस्वलास्तोत्रम् । *Rajasvalāstotra.*

Substance, country-made paper. 7 × 3½ inches. Folia, 1-5. Lines, 6. Extent in ślokas, 30. Character Nāgara. Appearance, worn-out and repaired. Complete.

Beginning:—

ॐ अस्य श्रीरजस्वलास्तोत्रमन्त्रस्य ईश्वर ऋषिः............

अथ ध्यानम् ।

बालार्ककोटिवर्णाभां बालचन्द्रनिभाननाम् ।

अनन्तबालासमन्वितां ध्यायेद्देवीं रजस्वलाम् ॥

... ...

भगोद्भवं जगत् सर्व्वं त्रैलोक्यं सचराचरम् ।

भूपातालादिकं + + मत्याकाशं भगोद्भवम् ॥

Colophon:—

इति श्रीरुद्रयामले तन्त्रे उमामहेश्वरसंवादे रजस्वलास्तोत्रं संपूर्णम् ।

6733.

10316. पुष्पिणीस्तोत्रम् । *Puṣpiṇīstotra.*

Substance, machine-made paper. 7 × 4 inches. Folia 1-3. Lines, 6. Extent in ślokas, 25. Character, Nāgara. Date, Samvat 1956. Appearance, fair. Complete.

Beginning:—

रजस्वलामुखं दृष्ट्वा सर्व्वपापैः प्रमुच्यते ।

सम्भाषणाच्च कुरुते सोमयागफलं लभेत् ॥

तस्याः स्मरणमात्रेण भवेन्मुक्तिश्चतुर्विधा ।

तस्याः संसर्गमात्रेण त्रैलोक्योच्चाटनक्षमः ॥

Colophon :—

इति कालिकाप्रस्थे पुष्पिणीस्तोत्रम् ।

Post-colophon Statement (in a different hand):—

रघुनाथमालवीयस्येदं पुस्तकं । सं १९५६ आषाढ शुक्ल ९ चन्द्रवासरे ।

6734.

10317. योनिस्तोत्रम् । *Yonistotra.*

Substance, machine-made paper. 7×4 inches. Folia, 4. Lines, 6. Extent in ślokas, 30. Character, Nāgara. Date, Saṃvat 1956. Appearance, good. Complete.

Beginning :—

श्रीशिव उवाच ।

शृणु देवि सुरश्रेष्ठे सुरासुरनमस्कृते ।
इदानीं श्रोतुमिच्छामि स्तोत्रं हि सर्व्वदुर्लभम् ॥
यस्यावबोधनादेवी देवी ब्रह्ममयो भवेत् ।

श्रीदेव्युवाच ।

... ...

ममैव प्राणसर्व्वस्वं लतास्तोत्रं दिगम्बरम् ।
अस्य प्रपठनादेव जीवन्मुक्तोपि जायते ॥
भगरूपा जगन्माया सृष्टिस्थितिलयान्विता ।
दशविद्यास्वरूपात्मा योनिर्मां पातु सर्व्वदा ॥
कोणत्रययुता देवी स्तुतिनिन्दाविवर्ज्जिता ।
जगदानन्दसम्भूता योनिर्मां पातु सर्व्वदा ॥

Colophon :—

इति योगितन्त्रे योनिस्तोत्रं समाप्तम् ॥

Post-colophon Statement (in a different hand):—

प० रघुनाथमालवीयस्येदं पुस्तकम्। सं १९५६ आषाढ शुक्ल ९ चन्द्रवासरे। प० बालमुकुन्दकर्मकाण्डिमालवीयस्येदं पुस्तकम्।

6735.

4706G. योनिकवचम्। *Yonikavaca.*

Substance, country-made paper 13 × 4½ inches. Folia, 43B-44B. Lines, 8. Extent in ślokas, 10. Character, Bengali. Appearance, fair. Complete.

The *kavaca* which is assigned to the *Nīlatantra* and is called *Triloksavijayī* [*Trailokyavijaya*] is preceded by a short *Yonistava* assigned to the *Kulacūḍāmaṇitantra.*

Beginning:—

अस्य श्रीयोनिकवचस्य नारदऋषिरनुष्टुपछन्दः.........

ॐ क्लीं योनिन्या सदा पातु स्वाहा।

भुवनाध्यात्मिका योनिः सदा मां रक्ष सागरे॥

Colophon:—

इति नीलतन्त्रे उमामहेश्वरसम्वादे त्रिलोक्षविजयीकवचं समाप्तम्।

Post-colophon Statement:—

श्रीजगद्रामशर्म्मणः स्वाक्षरमिदं पुस्तके लिपिरेषा श्रावणस्य एकविंशतिदिनजेति। समाप्तश्चायं ग्रन्थः।

6736.

9499. विषयेश्वरीस्तोत्रम्। *Viṣayeśvarīstotra.*

Substance, machine-made paper. 8 × 4½ inches. Folium, 1. Lines 19 in all. Extent in ślokas, 15. Character, Nāgara. Appearance, fair. Complete.

It has been published with the title *Viṣayeśvarastotra* in the *Stavakavacamālā* (Basumati Sahitya Mandir, Calcutta, 1334 B.S., pp. 761–3).

Post-colophon Statement:—

अलेखीदं लक्ष्मीनारायणेन कविना रन्ध्रा(व)वेदाग्रचन्द्रमिते वर्षे वैक्रमे मासि पौषे स्वामितिथौ शुक्रे ।

6737.

9495. **वन्दीस्तोत्रम् ।** *Vandīstotra.*

Substance, machine-made paper. 8 × 4½ inches. Folium, 1. Lines, 11 in all. Extent in ślokas, 10. Character, Nāgara. Appearance, fair. Complete.

Beginning:—

अथ वन्दीस्तोत्रम् ।

वन्दि देवि नमस्तुभ्यं वरदाभयशोभने ।
त्वदङ्घ्रिशरणं गत्वा शीघ्रं मोक्षं ददातु मे ॥ १ ॥
वन्दि पद्मपत्राक्षि लोहशृङ्खलभञ्जिनि ।
प्रसादं कुरु मे देवि शीघ्रं मोक्षं ददातु मे ॥ २ ॥
त्वं वन्दी त्वं महामाया त्वं दुर्गा त्वं सरस्वती ।
त्वं वीरा जननी चैव शीघ्रं मोक्षं ददातु मे ॥ ३ ॥

Colophon:—

इति रुद्रयामलतन्त्रे वन्दीमोचनस्तोत्रम् ।

6738.

10396. **सङ्कटासहस्रनामाख्यानम् ।** *Saṅkaṭāsahasranāmākhyāna.*

Substance, country-made paper. 6½ × 3 inches. Folia, 19. Lines, 8-9. Extent in ślokas, 200. Character, Nāgara. Date, Saṃvat 1891. Appearance, fair. Complete.

A hymn containing eight names of the deity called *Saṅkaṭānāmāṣṭaka* which is assigned to the *Padmapurāṇa* is well known and has been published in the *Bṛhatstotra-ratnākara* (Bombay, 1932, pp. 189–91) etc.

Beginning :—

मेरुपृष्ठे सुखासीनं भैरवं परिपृच्छति ।
बद्धाञ्जलिपुटा देवी भैरवी भुवनेश्वरी ॥

श्रीभैरव्युवाच ।

यत् सूचितं त्वया नाथ नाम्नामष्टसहस्रकम् ।
तन्मे वद महाकाल यद्यहं तव वल्लभा ॥

श्रीभैरव उवाच ।

शृणु देवि महेशानि नाम्नामष्टसहस्रकम् ।
पुरा त्रिपुरनाशार्थं यन्मया लिखितं शुभे ॥

... ...

3A. अथ सहस्रनामाख्यानम् ।

सङ्कटा विजया नित्या कामदा दुःखहारिणी ।
सर्वगाव्याहतगतिः कात्यायनी महेश्वरी ॥

Colophon :—

इति श्रीमहाकालसंहितायां चतुर्थीकल्पपटले सङ्कटासहस्र-नामाख्यानं समाप्तम् ।

Post-colophon Statement :

संवत् १८६१ । लिखितं विश्वेश्वरशर्मणा पौषमासे कृष्णे १० ।

6739.

2852. अपराधभञ्जनस्तोत्रम् । *Aparādhabhañjanastotra.*

Substance, machine-made paper. 12½ × 4 inches. Folium, 1 with writing on one side only. Lines, 7. Extent in ślokas, 10. Character, Bengali. Appearance, discoloured. Complete in 5 verses.

Other hymns of the type have been described in ASB. VII. 5275, 5609–14, 5640, 5643. The present hymn is also contained in another MS containing the *Pratyaṅgirāstotra* 6712 above.

Beginning :—

न ध्यातं चरणाम्बुजं न च स्तुतं साष्टाङ्गपातं नमः
श्रोत्रेणापि गुणानुवादचरितं नैव श्रुतं त्वद्वचः ।
स्पृष्टं नापि तवानुरक्तिकुशलं त्वत्पादजं वा रजः
क्षन्तव्यो जननि त्वयाहमसिते मूढोपराधाकुलः ॥

Colophon :—

इति रुद्रयामले शिवविरचितम् अपराधभञ्जनस्तोत्रं समाप्तम् ।

6740.

2853. **अपराधभञ्जनस्तोत्रम्** । *Aparādhabhañjanastotra.*

Substance, machine-made paper. 12½ × 4 inches. Folium, 1. Lines, 16 in all. Character, Bengali. Appearance, discoloured. Complete in 12 verses.

The *stotra*, complete in 17 verses and attributed to Śaṅkarācārya, has been published under the title *Kālya-parādhabhañjanastotra* in the *Stavakavacamālā* (Basumati Sahitya Mandir edition, pp. 484–487).

Colophon :—

इति गुप्तसाधनतन्त्रे हरगौरीसंवादे अपराधभञ्जनस्तोत्रं सम्पूर्णम् ।

6741.

4706C. भगवच्छिवस्तोत्रम् । *Lhagavacchivastotra.*

Substance, country-made yellow paper. 13 × 4½ inches. Folium, 1 (marked 21). Lines, 5 in all. Extent in ślokas, 5. Character, Bengali. Appearance, old. Complete.

The *stotra* consists of an enumeration of twelve names of Śiva.

Beginning :—

प्रथमे च महादेवो द्वितीये च महेश्वरः ।
तृतीये शङ्करः प्रोक्तश्चतुर्थे वृषभध्वजः ॥

Colophon :—

इति रुद्रयामले भगवच्छिवस्तोत्रं समाप्तम् ।

6742.

9491. नीलकण्ठस्तोत्रम् । *Nīlakaṇṭhastotra.*

Substance, machine-made paper. 8 × 3 inches. Folium, 1. Lines, 17 in all. Extent in ślokas, 20. Character, Nāgara. Appearance, good. Complete.

The hymn which is assigned to the *Ḍāmareśvara Tantra* is of the type of a mālāmantra.

Beginning :—

ॐ अस्य श्रीनीलकण्ठस्तोत्रस्य ब्रह्मऋषिरनुष्टुप्छन्दः श्रीनील-
कण्ठः सदाशिवो देवता ब्रह्मबीजं पार्व्वती शक्तिः ममाभीष्टसिद्ध्यर्थे
कायजीवरक्षणार्थे श्रीनीलकण्ठस्तोत्रपाठे विनियोगः । ॐ नमो
नीलकण्ठाय श्वेतशरीराय सर्पालङ्कारभूषिताय......

6743.

2438. **शिवसहस्रनामावलिः ।** *Śivasahasranāmāvali.*

Substance, country-made paper. 5½ × 3 inches. Folia, 1–23. Lines, 7. Extent in ślokas, 150. Character, Nāgara. Date, Saṃvat 1866. Appearance, discoloured and worm-eaten. Complete.

This hymn, which is in prose, contains names in the dative case with the word *namaḥ* understood.

Beginning:—

ॐ हिरण्यबाहवे नमः सेनान्ये° दिक्पतये° ......

Colophon:—

इति श्रीरुद्रयामले शिवसहस्रनामावलिः सम्पूर्णास्तु ।

Post-colophon Statement:—

संवत् १८६६ शाके १७३१ विक्रमनामसंवत्सरे दक्षिणायने कार्त्तिककृष्णासप्तम्यां पुनर्वसुनक्षत्रे साध्ययोगे तद्दिने पुस्तकं समाप्तमस्तु । शुभं भवतु । लेखक चिमणाजी लक्ष्मण औरङ्गाबाद दक्षिणदिशा हालिवास्तव्य श्रीविश्वेश्वरचरणे तत्पदमस्तु ।

6744.

3930. **परमशिवसहस्रनामस्तोत्रम् ।** *Paramaśivasahasra-nāmastotra.*

Substance, country-made paper. 17½ × 4 inches. Folia, 1–3 (of which Fol. 3 is of a smaller size). Lines, 10, 11. Extent in ślokas, 100. Character, Bengali. Appearance, discoloured. Complete.

Beginning:—

देव्युवाच ।

ॐ देवदेव महादेव ज्ञानसिद्ध कृपामय ।
यत्ते नामानि गुह्यानि पवित्राणि शुभानि च ॥
तन्मे कथय मे देव यदि स्नेहोऽस्ति मां प्रति ॥

श्रीशिव उवाच ।

तानि ते कीर्त्तयिष्यामि भुक्तिमुक्तिकराणि च ।
गोप्यानि सर्व्वतन्त्रेषु न देयानि पृ॰॰क जने ॥

अस्य श्रीशिवनामसहस्रस्य ब्रह्मऋषिर्गायत्रीच्छन्दः परमहंसशिवो देवता सर्व्वार्थसिद्धये शिवसहस्रनामपाठे विनियोगः ।

ॐ भवो विघ्नेश्वरश्चैव विघ्नराजो विनायकः ।
शिवोत्तमो विघ्नकारी विघ्नराड् गणनायकः ॥
एकदन्तो द्विदन्तश्च गजवक्त्रो निरञ्जनः ।
कपर्द्दी दीर्घवक्त्रश्च तथा सङ्कर्षणः प्रभुः ॥

Colophon : —

इति उमायामले हरगौरीसंवादे परमशिवसहस्रनामस्तोत्रं समाप्तम् ।

6745.

1885. वटुकभैरवस्तोत्रम् । *Vaṭukabhairavastotra.*

Substance, country-made paper. 9 × 4 inches. Folia, 8. Lines, 9. Extent in ślokas, 60. Character, Nāgara. Appearance, old and worm-eaten. Complete.

Colophon : —

इति श्रीरुद्रयामले हरगौरीसंवादे आपदुद्धारवटुकभैरवस्तवराजः सम्पूर्णः ।

This is a well-known hymn, printed in various collections of *stotras*, enumerating 108 names of Bhairava. Different MSS assign it to different works, e.g., *Viśvasāra*, *Viśvasāroddhāra*, and *Rudrayāmala* which are represented sometimes as independent works while sometimes one is represented as a part of another.

6746.

5065. *Vaṭukabhairavastotra.*

Substance, country made paper. 13½ × 2½ inches. Folia, 3. Lines, 7. Extent in ślokas, 60. Character, Bengali. Appearance, old. Complete.

Colophon:—

इति विश्वसारोद्धारे आपदुद्धारकल्पे भैरवस्तवराजः समाप्तः ।

6747.

8957. *Vaṭukabhairavastotra.*

Substance, country-made paper. 9½ × 4½ inches. Folia, 7. Lines, 10. Extent in ślokas, 60. Character, Nāgara. Date, Samvat 1901. Appearance, fair. Complete.

Colophon:—

इति श्रीरुद्रयामले तन्त्रे विश्वसारोद्धारे आपदुद्धारकवटुक-भैरवस्तोत्रम् ।

Post-colophon Statement:—

सं १९०१ भाद्र वदि ५ सोमे ।

6748.

10681. *Vaṭukabhairavastotra.*

Substance, country-made paper. 17 × 4½ inches. Folia, 2. Lines, 9. Extent in ślokas, 60. Character, Bengali. Date, 1771 S.E. Appearance, fair. Complete.

Colophon:—

इति विश्वसारतन्त्रे आपदुद्धारो नाम वटुकभैरवस्तवः समाप्तः ।

Post-colophon Statement (In Nāgarī script):—

ग्रन्थाध्यक्ष श्रीमद्वेचारामद्दालदारस्य तनय श्रीराखालदास-शर्म्मणेन लिखितं। खिदिरपुर, कलिकाता।

(In Bengali script) शकाः १७७१ फाल्गुन २९ ॥

6749.

11222. *Vaṭukabhairavastotra.*

Substance, machine-made modern paper. 8×4½ inches. Folia, 11. Lines, 7. Extent in ślokas, 60. Character, Nāgara. Appearance, good. Complete.

Colophon:—

इति विश्वसारोद्धारे रुद्रयामले वटुकभै॰ वस्तोत्रं समाप्तम्।

The *stotra* is followed by the first three verses of the *Gurvaṣṭaka* of Śaṅkarācārya and three leaves containing a portion of a work in Hindi.

6750.

7861. वटुकभैरववकारादिसहस्रनामस्तोत्रम्। *Vaṭuka-bhairavavakārādisahasranāmastotra.*

Substance, country-made paper. 10½×4½ inches. Folia, 1-10. Lines, 8. Extent in ślokas, 120. Character, Nāgara. Date, Saṃvat 1895. Appearance, fair. Complete.

Beginning:

ईश्वर उवाच।

कैलासे स्थितमाविष्टं सर्व्वदा तु प्रवासकम्।

त्रैलोक्यव्यापकं देवं पार्व्वतीवरशङ्करम्॥ १॥

पार्व्वत्युवाच ।

कैलासे सुखमासीनं देवदेवं जगद्गुरुम् ।

जगतामुपकाराय पार्व्वती पृच्छते शिवं ॥ २ ॥

Colophon : --

इति श्रीविश्वसारोद्धारे रुद्रयामले तन्त्रे देवीश्वरसंवादे वटुक-

भैरववकारादिसहस्रनामस्तोत्रं समाप्तम् ।

Post-colophon Statement :

संवत् १८८५ आषाढ शुक्लतिथौ ८ शनौ सिघरौलीमध्ये राजा-

छत्रसाहिसन्निधौ विद्याधरद्विवेदेन लिखितं स्वार्थं परार्थं च ।

6751.

2441. शिवकवचम् । *Śivakavaca.*

Substance, country-made paper. $3\frac{1}{2} \times 2\frac{1}{2}$ inches. Folia, 1 15. Lines, 5-6. Extent in ślokas, 45. Character, Nāgara. Appearance, good. Incomplete.

The Kavaca has been published in *Stavakavacamālā* (Basumati Press edition, pp. 1042–51) and *Bṛhatstotra-ratnākara* (Bombay, 1932, pp. 93–100).

6752.

5209. माहेश्वरकवचम् । *Māheśvarakavaca.*

Substance, country-made paper. $13 \times 3\frac{1}{2}$ inches. Folia, 2. Lines, 8. Extent in ślokas, 35. Character, Bengali. Appearance, good. Complete.

The Kavaca has been published in the *Stavakavaca-mālā* (Basumati Press edition, pp. 1054–7).

6753.

10983. शरभेश्वरकवचम् । *Śarabheśvarakavaca.*

Substance, country-made paper. 7 × 3½ inches. Folia, 2–10. Lines, 7. Extent in ślokas, 120. Character, Nāgara. Appearance, fair. Incomplete.

The *Kavaca* agrees with that occurring in MSS described under Nos. 5895 and 6485 above.

The deity is thus described in the beginning of the *Kavaca*:—

रक्ताभं सुप्रसन्नं त्रिनयनममृतोन्मत्तभाषाभिरामं
कारुण्याम्भोधिमीशं वरदमभयदं चन्द्ररेखावतंसम् ।
शङ्खध्वानाखिलाशाप्रतिहतविधिना भासयन्नात्मभावं
सर्वेषां शात्रवेषां प्रगतभयहरं पक्षिराजं नमामि ॥

6754.

8665. अघोरकवचम् । *Aghorakavaca.*

Substance, machine-made paper. 11½ × 5½ inches. Folia, 4-5. Lines, 12. Extent in ślokas, 15. Character, Nāgara. Date, Saṃvat, 581. Appearance, good. Complete.

The earlier portion of the MS gives mantras of the deity Aghora-Rudra. This Kavaca is not found in the MS of the *Ākāśabhairavakalpa* (5895 above).

Beginning:

श्रीदेव्युवाच ।
देवदेव महादेव सच्चिदानन्द शाश्वत ।
त्वत्तः श्रुतमशेषं तु सर्वेषां कवचं पुरा ॥
अघोरेशस्य कवचं वद मे करुणानिधे ।

Colophon:—

इति श्रीआकाशभैरवकल्पे अघोरकवचं सम्पूर्णं समाप्तम् ।

Śaṅkarācārya.

6755.

9953. **कालभैरवाष्टकम् ।** *Kālabhairavāṣṭaka.*

Substance, country-made paper. 10 × 3½ inches. Folium, 1. Lines, 17 in all. Extent in ślokas, 10. Character, Nāgara. Appearance, old. Complete.

The hymn is published in popular collections of *stotras: Bṛhatstotraratnākara* (Bombay, 1932, pp. 130-1), *Stotraratnākara* (Madras, 1927, I. pp. 143-4), etc.

Post-colophon Statement (in a later hand):

शुभं भूया[त्] । सम्वत् १५५० १७५४ मासोत्तमे मासे पौषे ।

6756.

2850. **शिवभुजङ्गप्रयातम् ।** *Śivabhujaṅgaprayāta.*

Substance, country-made paper. Folium, 1. 14 × 3 inches. Lines, 10 + 11. Character, Bengali. Appearance, old and discoloured. Complete in 16 verses.

Though stated to be complete it contains a selection of 15 verses from the latter half of the hymn as published in the *Stotraratnākara* (Madras, 1927, I. 127–131). It begins from verse 19 of the printed edition and ends in verse 39 and has an additional verse (No. 15 in the MS) not found in the printed edition.

Along with the *stotra* is found a *Bhavānyaṣṭaka* attributed to Śaṅkarācārya which agrees with the

Durgāstavarāja (*Stavakavacamālā*, Basumati Press edition, pp. 610–2) assigned to the *Viśvasāvāratantra*.

6757.

2150. [मृत्युञ्जयमानसिकपूजास्तोत्रम् । *Mṛtyuñjaya-mānasikapūjāstotra.*]

Substance, machine-made paper. 6×4 inches. Folia, 1–6 Lines, 8. Character, Nāgara. Appearance, fair. Incomplete.

The present MS has been described in L. X. 4149 under the title *Mṛtyuñjayamānasapūjāvidhi*. It runs up to the middle of verse 29 of the *stotra* which has been published in the *Works of Sankaracharya* (Vanivilas Press, Srirangam, Vol. 17, pp. 105–115).

6758.

3931. विष्णुसहस्रनाम । *Viṣṇusahasranāma.*

Substance, country-made yellow paper (the first three folia being white paper of a slightly smaller size, probably written by a different hand). 16½ × 3½ inches. Folia, 1–6. Lines, 8–10. Extent in ślokas, 210. Character, Bengali. Date, Śaka 1778. Appearance, good. Complete.

This is different from the well-known *Viṣṇusahasranāma* belonging to the Mahābhārata.

Beginning:—

श्रीदेव्युवाच ।

भगवन् सर्व्वमन्त्राश्च भवता मे प्रकाशिताः ।
चतुःषष्टिश्च तन्त्राणि मातृणामुत्तमानि च ॥
कलापदं कलासारं तथान्यत् कुब्जिकामतम् ।
नामान्तरश्च बीजाख्यं तोतलं तोतलोत्तरम् ॥
पश्चामृतं रूपभेदं सिद्धयोगेश्वरीमतम् ।
सुरूपिकामतं देव रूपिकामतमेव च ॥
सर्व्ववीजमतं देव विमलामतमेव च ।
अरुणेशं मेदिनीशं विशुद्धेश्वरमेव च ॥
एवमेतानि गुह्यानि तन्त्राण्यपि च कोटिशः ।
भवतोक्तानि मे देव सर्व्वज्ञानमयानि च ।
विष्णोर्नामसहस्रञ्च मया पृष्टं मुहुर्मुहुः ॥
न कथ्यते कथं देव जगन्मोक्षप्रदायकम् ।
... ...

अस्य श्रीविष्णोर्नामसहस्रस्य निरञ्जनपरमपुरुष ऋषिर्गायत्री-
च्छन्दो भगवानाद्यो विष्णुर्देवता चतुर्वर्गसिद्धौ विनियोगः ॥ ॐ

ॐकारः कामरूपश्च श्रीँकारः कमलापतिः ।
ग्लौङ्कारः श्यामकाङ्गश्च क्ष्णाः कुवलमन्दिवः ॥

Colophon :—

इति कुलानन्दसंहितायां चत्वारिंशसाहस्र्यां भैरवभैरवीसंवादे महाप्रकृतिनिरूक्तं श्रीविष्णोर्नामसहस्रं समाप्तम् ।

Post-colophon Statement :—

लिपिरियं श्रीरामतारणदेवशर्म्मणः । वीरभूमौ सिउडिग्रामे त्वरया यत्नेन लिखितमिति । शकाब्दाः १७७८ । ज्यैष्ठस्य २२ द्वाविंशति दिवसे ।

6759.

10820. **गोपालसहस्रनामस्तोत्रम् ।** *Gopālasahasra-nāmastotra.*

Substance, country-made yellow paper. 13 × 4½ inches. Folia, 1-11 (with folia 2-3 of a smaller size inserted later on). Lines, 9. Extent in ślokas, 300. Character, Bengali. Appearance, good. Complete.

The stotra, which is assigned to the *Sammohanatantra*, agrees with the one published in the *Stotraratnākara* (Madras, 1927, Vol. I, pp. 508–528) and not with the one published in the *Stavakavacamālā* (Calcutta, B.S. 1334, pp. 1128–1143). The matter contained in Folia 2-3, constituting the beginning of the stotra proper in the present MS, is absent in the printed edition.

6760.

3948. *Gopālasahasranāmastotra.*

Substance, country-made paper. 8½ × 4 inches. Folia, 1–21. Lines, 8. Extent in ślokas, 300. Character, Nāgara. Appearance, good. Complete.

Though assigned to the same Tantra the stotra contained in the present MS has only partial agreement with

that in the previous MS. Fol. 1–12A of the present MS generally agree with Fol. 1–7A of the preceding one.

6761.

4279B. **नरसिंहसहस्रनामस्तोत्रम्।** *Narasiṃha-sahasranāmastotra.*

Substance, palm leaf. 13 × 1 inches. Folia, 84–97. Lines, 4, 5. Extent in ślokas, 280. Character, Udiya. Appearance, fair. Complete.

The stotra, assigned to the *Nṛsiṃhapurāṇa*, has been published in the *Stotraratnākara* (Madras, 1927, Vol. I, pp. 418–443).

6762.

8666C. **नृसिंहकवचम्।** *Nṛsiṃhakavaca.*

Substance, country-made paper. 12 × 7 inches. Folia, 2. Lines, 13. Extent in ślokas, 45. Character, Nāgara. Appearance, old. Complete.

This does not agree with the Kavaca popular in Bengal and assigned to the *Brahmasaṃhitā*.

Beginning :

... ...

ॐ नमस्कृत्य गणाधीशं सर्वविघ्ननिवारणम्।
नृसिंहकवचम् वक्ष्ये प्रह्लादेनोदितं पुरा॥
सर्वरक्षाकरं नृणां सर्वोपद्रवनाशनम्।
सर्वसम्पत्करं चैव स्वर्गमोक्षप्रदायकम्॥

Colophon :—

इति श्रीब्रह्माण्डपुराणे प्रह्लादविरचितं नृसिंहकवचं समाप्तम्॥

Post-colophon Statement :—

श्रीनृसिंहकवचं लिखितं जयन्तीदासेन विप्रेण ज्येष्ठे मासे शुक्ले पक्षे सप्तम्यां रविवासरे पठनार्थं नारायणदाससाधुवर्यस्य ।

6763.

9654. *Nṛsiṃhakavaca.*

Substance, country-made paper. 13 × 5 inches. Folium, 1. Lines, 7 in all. Extent in ślokas, 10. Character, Nāgara. Appearance, fair. Complete.

This is in mixed Hindi and Sanskrit. This is followed by extracts in Hindi pertaining to Tantric rituals.

Colophon :—

इति श्रीनृसिंहपुराणे ब्रह्मरुद्रनारदप्रह्लादसंवादे श्रीनृसिंहजयति सम्पूर्णम् ।

6764.

10187A. हयग्रीवसहस्रनामस्तोत्रम् । *Hayagrīva-sahasranāmastotra.*

Substance, country-made paper. 7 × 3 inches. Folia, 1–13. Lines, 10. Extent in ślokas, 175. Character, Nāgara. Appearance, old. Complete.

Another MS of the hymn is described in L. VIII. 2607. The hymn does not agree with the one of the same name published in the *Stotraratnākara* (Madras, 1927, Vol. I, pp. 305ff). The names are here arranged in alphabetical order from verse 34 (Fol. 5A).

Colophon :—

इति श्रीमहादेवरहस्ये तन्त्रे हरपार्वतीसंवादे हयग्रीवसहस्रनामस्तोत्रं संपूर्णम् ।

Post-colophon Statement :—

संवत् १८६० ।

6765.

2456. **रामसहस्रनामस्तोत्रम् ।** *Rāmasahasranāmastotra.*

Substance, country-made paper. 9½ × 4½ inches. Folia, 11. Lines, 9–11. Extent in ślokas, 250. Character, Nāgara. Appearance, fair. Complete.

The present MS has been described in L. X. 4225. The names of Rāma are here arranged in alphabetical order. The hymn, which is assigned to the *Rudrayāmala*, has been published in the *Stavakavacamālā* (Calcutta, 1334 B.S., pp. 1110–1128).

6766.

3933. *Rāmasahasranāmastotra.*

Substance, country-made paper. 10½ × 4 inches. Folia, 15. Lines, 8. Extent in ślokas, 250. Character, Bengali. Date, Śaka 1760. Appearance, fair. Complete.

Same as above.

6767.

9622. *Rāmasahasranāmastotra.*

Substance, country-made paper. 9½ × 4 inches. Folia, 1–17. Lines, 8. Extent in ślokas, 250. Character, Nāgara. Date, Saṃvat 1826. Appearance, fair. Complete.

Same as above.

Post-colophon Statement :

श्रीसंवत् १८२६ समय मार्गशीर्ष शुक्ला ९ शुक्रे ।

6768.

3934. *Rāmasahasranāmastotra.*

Substance, machine-made modern paper. 12 × 3½ inches. Folia, 9. Lines, 6–7. Extent in ślokas, 200. Character, Bengali. Date, Śaka 1759. Appearance, fair. Complete.

The stotra proper, without the introductory or concluding portions, has been published in the *Stotraratnākara* (Madras, 1927, Vol. I, pp. 455–67) which does not refer to its source. MSS of the stotra described in *Mad.* (XVII. 8964ff) assign it to the *Liṅgapurāṇa*.

Beginning:

अथ श्रीरामसहस्रनामस्तोत्रम् ।

एकदा सुखमासीनौ पार्व्वतीपरमेश्वरौ ।

अन्योन्याश्लिष्टबाहू तौ जगद्धेतू जगद्गुरू ॥

... ...

पार्वती परिपप्रच्छ तदा धर्मानिनुक्रमात् ॥

श्रीपार्व्वत्युवाच ।

मन्नाथ जगतां नाथ सर्व्वज्ञ परमेश्वर ।

त्वत्प्रसादान्मया ज्ञातं धर्मशास्त्रमनुत्तमम् ॥

प्रायश्चित्तन्तु पापानां निष्कृतिं वक्तुमर्हसि ॥

श्रीमहादेव उवाच ।

अथ वक्ष्यामि ते देवि रामनामसहस्रकम् ।

शृणुष्वैकमनाः स्तोत्रं गुह्यात् गुह्यतरं महत् ॥

Colophon:

इति लिङ्गागमतन्त्रे उमामहेश्वरसम्बादे श्रीरामसहस्रनामस्तोत्रं समाप्तम् ।

Post-colophon Statement :—

लिपिरियं श्रीरामतारणदेवशर्मणः । शकाब्दाः १७५६ ।
७ । १२ ।

6769.

1719. **रकारादिरामसहस्रनामस्तोत्रम् ।** *Rakārādirāma-sahasranāmastotra.*

Substance, country-made paper. 9 × 4 inches. Folia, 1 11. Lines, 10. Extent in ślokas, 210. Character, Nāgara. Date, Saṁvat 1884. Appearance, good. Complete.

A MS of the work is described in Oxf. No. 152.

Beginning :—

श्रीदेव्युवाच ।

देवदेव महादेव भक्तानुग्रहकारक ।
त्वत्तः श्रुतं मया पूर्व्वं मन्त्राणां शतकोटयः ॥ १ ॥

... ...

... ...

रहस्यं रामचन्द्रस्य रकाराद्यक्षरपूर्व्वकम् ।
नामसहस्रकं ब्रूहि यद्यहं तव वल्लभा ॥ ८ ॥

... ...,

Fol. 2B, ॐ रामो रमाकरो दीप्तो रक्तनेत्रो रमापतिः ।
रणभूमिविहारी च रक्तपादोऽरुणाच्छविः ॥ १४ ॥

Colophon :—

इति श्रीब्रह्मयामले सृष्टिप्रशंसायां उमामहेश्वरसंवादे रकारादि-
श्रीरामसहस्रनामस्तोत्रं संपूर्णम् ।

Post-colophon Statement :—

मीति वैशाखसुदी ८ शुक्रवार संमत् १८८४। इदं पुस्तकं स्वहस्ते लीखीतं जोसि सिबल ॰। पठनार्थं जजराम।

6770.

3276. *Rakārādirāmasahasranāmastotra.*

Substance, country-made paper. 10 × 4½ inches. Folia, 1–10. Lines, 10–12. Extent in ślokas, 210. Character, Nāgara. Appearance, discoloured. Complete.

Post-colophon Statement :—

इदं पुस्तकं धारपुरे इत्युपनामकरामोपेन लिखितम्। स्वार्थं परार्थं वा।

6771.

3928. *Rakārādirāmasahasranāmastotra.*

Substance, country-made paper. 10½ × 4 inches. Folia, 1–11. Lines, 9. Extent in ślokas, 210. Character, Bengali. Date, Śaka 1757. Appearance, fair. Complete.

Post-colophon Statement :—

लिपिरियं श्रीरामतारणदेवशर्मणः शकाब्दाः १७५७।५।१२।

6772.

9817. *Rakārādirāmasahasranāmastotra.*

Substance, country-made paper. 8½ × 5 inches. Folia, 1–14. Lines, 8–9. Extent in ślokas, 210. Character, Nāgara. Appearance, fair. Complete.

6773.

3234B. रामस्तवराजः । *Rāmastavarāja.*

Substance, country-made paper. 10½ × 4½ inches. Folia, 3A-8B. Lines, 10-12. Extent in ślokas, 100. Character, Nāgara. Appearance, fair. Complete.

The hymn which is stated to belong to the *Sanatkumārasaṃhitā* has been printed in *Bṛhatstotraratnākara* (Nirnayasagar Press, pp. 236-244) and *Stotraratnākara* (V. Ramaswamy Sastrulu & Sons, Madras, Vol. II, pp. 510-20).

Post-colophon Statement :-

इदं पुस्तकं धारपुरे इत्युपनामक काश्यां कृष्णेन लिखितम् ।

6774.

3234A. रामकवचम् । *Rāmakavaca.*

Substance, country-made paper. 10½ × 4½ inches. Folia, 1-3A. Lines, 9-12. Extent in ślokas, 40. Character, Nāgara. Appearance, fair. Complete.

Beginning :—

ॐ पार्व्वत्युवाच ।

भगवन् देवदेवेश सर्व्वदेवनमस्कृत ।
सर्व्वं मे कथितं देव राममन्त्रं विशेषतः ॥
त्रैलोक्यमोहनं नाम कवचं पूर्व्वसूचितं ।
कथयस्व महादेव यद्यहं तव वल्लभा ॥

श्रीमहादेव उवाच ।

शृणु वक्ष्यामि देवि त्वं कवचं परमाद्भुतम् ।
अत्यन्तगोपनं गुह्यं ब्रह्ममन्त्रौघविग्रहम् ॥

ॐ अस्य श्रीरामत्रैलोक्यमोहनकवचस्य ब्रह्मा ऋषिः गायत्री-च्छन्दः श्रीरामचन्द्रो देवता मम चतुर्वर्गसाधने जपे विनियोगः ।

Colophon :—

इति श्रीब्रह्मयामले गौरीतन्त्रे उमामहेश्वरसंवादे त्रैलोक्यमोहनं नाम कवचं समाप्तम् । सम्पूर्णम् ॥

Post-colophon Statement :

संवत् १८८७ शके १७५२ ।

6775.

9846. राधास्तवराजः । *Rādhāstavarāja.*

Substance, country-made paper. $7\frac{1}{2} \times 4$ inches. Folia, 5. Lines, 8. Extent in ślokas, 35. Character, Nāgara. Appearance, discoloured. Complete.

This is only a collection of names and epithets of Rādhā.

Beginning :

ध्यायेन्नीलाम्बरी श्यामा गौरवर्णा वराङ्गना ।
वेदगुह्या गुणातीता राधा कृष्णसमन्विता ॥ १ ॥
मोहिनी सुन्दरी बाला रसरूपा हरिप्रिया ।
श्रीकृष्णवल्लभा राधा पुरुषोत्तमधीमता ॥ २ ॥

End :—

पठिता कृष्णसंपुष्टा हसिता वृषभानुजा ।
राधिका राधिता राधा राधिका कृष्णदेवता ॥ ३४ ॥

Colophon :—

इति श्रीगौतमीतन्त्रे श्रीकृष्णेनोक्तः श्रीराधास्तवराजः समाप्तः ।

6776.

377. अपराजितास्तोत्रम् । *Aparājitāstotra.*

Substance, country-made paper. 13 × 2½ inches. Folia, 4. Lines, 4, 5. Extent in ślokas, 40. Character, Bengali. Appearance, good. Complete.

The stotra which is assigned to the *Viṣṇudharmottara* consists of *mālāmantras* addressed to Vaiṣṇava as well as other deities. It has been published in the *Stavakavacamālā* (Calcutta, 1334 B.S., pp. 700–5).

6777.

9316. सुदर्शनमन्त्रः । *Sudarśanamantra.*

Substance, country-made paper. 9 × 3½ inches. Folia, 3. Lines, 6. Extent in ślokas, 20. Character, Nāgara. Appearance, good. Incomplete.

This contains a mālāmantra (Fol. 1-2B) of Sudarśana, the disc of Nārāyaṇa, as also an incomplete mālāmantra (Fol. 2B–3B) of Nṛsiṃha together with a description of the preliminary rites required for the repetition of the mantras.

6778.

11255. हनुमच्छान्तिकस्तोत्रम् । *Hanūmacchāntikastotra.*

Substance, country-made paper. 9 × 3½ inches. Folia, 1–3. Lines, 5. Extent in ślokas, 12. Character, Nāgara. Appearance, good. Complete.

Beginning :—

ॐ श्रीदेव्युवाच ।

भगवन् सर्व्वधर्मज्ञ सर्व्वशास्त्रविशारद ।

हनुमच्छान्तिदं स्तोत्रं श्रोतुमिच्छामि साम्प्रतम् ॥ १ ॥

शिव उवाच ।

शृणु देवि प्रवक्ष्यामि शान्तिस्तोत्रमनुत्तमम् ।

यस्य प्रसादमात्रेण भवेच्छान्तः कपीश्वरः ॥ २ ॥

केशरिनन्दनं वीरं शक्तिधर्मपरायणम् ।

कौलमार्गप्रदातारं त्वाञ्जनेयं नमाम्यहम् ॥ ३ ॥

Colophon :—

इति श्रीफेत्कारिणीतन्त्रे हनुमच्छान्तिकं स्तोत्रं समाप्तम् ।

6779.

3084. वडवानलस्तोत्रम् । *Vaḍavānalastotra.*

Substance, machine-made paper. 8×4 inches. Folia, 1–4. Lines, 7. Extent in ślokas, 40. Character, Nāgara. Date, Saṃvat 1943. Appearance, good. Complete.

This stotra of Hanumat which is of the type of a mālāmantra is printed in *Bṛhatstotraratnākara* (Bombay, 1927, pp. 272-3) where it is attributed to Vibhīṣaṇa.

Colophon :

इति श्रीसुदर्शनसंहिता[यां] वडवानलस्तोत्रं संपूर्णम् ।

Post-colophon Statement :—

संवत् १९४३ मीः चइत वदी ९ शुक्रवार ।

6780.

9220. हनुमत्कवचम् । *Hanumatkavaca.*

Substance, country-made paper. 10½×4½ inches. Folia, 1–7. Lines, 11. Extent in ślokas, 150. Character, Nāgara. Date, Saṃvat 1912. Appearance, fair. Complete.

Beginning:—

श्रीपार्वत्युवाच ।

सदा शिवकर स्वामिन् ज्ञानद प्रियकारक ।

कवचादि मया सर्वं देवानां संश्रुतं प्रिय ॥ १ ॥

इदानीं श्रोतुमिच्छामि कवचं करुणानिधे ।

वायुसूनोर्वरं येन नान्यदन्वेषितं भवेत् ॥ २ ॥

Colophon:—

इति श्रीरुद्रयामले ईश्वरपार्व्वतीसंवादे हनूमत्कवचं सम्पूर्णम् ।

Post-colophon Statement:—

संवत् १९१२ । मार्ग सु १२ लि गौरीदत्तेन काश्याम् ।

Śaṅkarācārya.

6781.

7569. **चर्पटपञ्जरस्तोत्रम् ।** *Carpaṭapanjarastotra.*

Substance, country-made paper. 10½×4½ inches. Folia, 1. Lines, 13+12. Extent in ślokas, 20. Character, Nāgara. Appearance, fair. Complete.

This is a well-known stotra printed in various collections of stotras like the *Bṛhatstotraratnākara* (pp. 341–3).

. *Post-colophon Statement*: —

सं १८३८ मि । ज्ये । सुद १३ पनवसवास्मार्थम् ॥

6782.

5976B. **मानसपूजा ।** *Mānasapūjā.*

Substance, country-made paper. 9½×8 inches. Folium 1 (the last in the MS). Character, Nāgara. Date, Saṃvat, 1831. Appearance, old. Complete in 4 verses.

Beginning :—

रत्नैः कल्पितमासनं हिमजलैः स्नानञ्च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जातीचम्पककेतकीविरचित पुष्पञ्च धूपं तथा
देयं देव दयानिधे तव विभो संसिद्धये तुष्यताम् ॥

Colophon :—

इति शङ्कराचार्यविरचितमानसीपूजा समाप्ता ।

The colophon is followed by the following verse:—

या प्रीतिर्विदुरार्पिते मुररिपो कुन्त्यर्पिते यादृशी
या गोवर्धनमूर्धनि पृथुकिके स्तन्ये यशोदार्पिते ।
भारद्वाजसमर्पिते + + + + दत्तेधरे योषितां
या प्रीतिर्मुनिपत्नीभक्तिरचितां तत्रापि तां तां कुरु ॥

6783.

6076B. *Mānasapūjā.*

Substance, country-made paper. 8½ × 6 inches. Folium, 1 (the last in the MS). Character, Nāgara. Appearance, old. Complete in 3 verses.

Dāsadāsa.

6784.

7848. **जानकीविरहसम्भवमन्त्रराजस्तोत्रम् ।** *Jānakī-virahasambhavamantrarājastotra.*

Substance, country-made paper. 11 × 4½ inches. Folia, 1–11. In Tripāṭha form. Character, Nāgara. Date, Samvat 1919. Appearance, fair. Complete.

The stotra is accompanied by a commentary by the author himself. The stotra which is complete in 20 verses is addressed to Jānakī, consort of Rāma.

Beginning:—

श्रीरामचन्द्रहितवायुसुतं प्रणम्य
श्रीजानकीचरणकञ्जरतिप्रदश्च ।
अत्यद्भुतं विरहसम्भवमन्त्रराजं
सीतापतेः शरणदं शिवदं प्रकुर्वे ॥ १ ॥

... ...

मातर्विश्वविभूषणं सुरवरं प्रत्याफणित्वेति वा
त्वन्यं कामयतेऽर्भकोऽयममलः शान्तः त्ववांस्त्वद्य भोः ।
भुञ्जे मामनुशासनं प्रभवतः प्राप्यैव देह्याशु रे
प्राणा उत्कालयन्ति मे यदि पुनर्नायास्यसि त्वं च माम् ॥ ४ ॥

Beginning of the Commentary:—

... ... दासदासकृतं श्रीजानकीविरहशामिनोद्भवमन्त्रराजं
तत्तिलकमहं दासदासजनः करिष्ये ।

End:—

मा रोदिषि त्वं ह्यरविन्दनेत्र
क्षिप्रं मदीयं पिब वत्स दुग्धम् ।
कुर्वन् स्वकार्यं विहरस्व तावन्-
मत्वा वचो मे पुनरेहि मा त्वम् ॥ १९ ॥
श्रीजानकीविरहसम्भवमन्त्रराजम्
अज्ञाननाशनमहद्धरिरूपरूपम् ।
श्रीदासदासरचितं परिभावयन्तु
हृद्यं विचार्य च मनः खलु भावुका हे ॥ २० ॥

Colophon:—

इति [श्री]मद्दासदासविरचितं श्रीजानकीविरहसम्भवमन्त्रराज-
स्तोत्रं सम्पूर्णम् ।

Colophon of the Commentary :—

इति श्रीमद्रामदासजनकृतं श्रीजानकीविरहसम्भवमन्त्रराज-
तिलकं समाप्तम् ।

Post-colophon Statement :—

सम्बत् १९१९ । आश्विनकृष्णातिथौ षष्ठ्यां ६ रवौ विद्याधरेण
लिखितं काश्याम् ।

IV. KĀRTAVĪRYA.

6785.

9947. कार्तवीर्यकवचम् । *Kārtavīryakavaca.*

Substance, country-made paper. 12¼ × 5 inches. Folia, 1–6. Lines, 14. Extent in ślokas, 200. Character, Nāgara. Appearance, fair. Complete.

The *kavaca* which is assigned to the Uḍḍāmaratantra is printed in *Stavakavacamālā* (Calcutta, 1334 B.S., pp. 884–98). A few lines, found after the conclusion of the *kavaca*, describe the procedure of muttering the mantra of Kārtavīrya.

6786.

9151. **वज्रपञ्जरसूर्यकवचम् ।** *Vajrapañjarasūryakavaca.*

Substance, country-made paper. 12 × 5½ inches. Folia, 1–3. Extent in ślokas, 75. Character, Nāgara. Date, Saṃvat 1869. Appearance, discoloured. Complete.

This constitutes chapter 33 of the Devīrahasya section of the *Rudrayāmala* and agrees with Fol. 117A–120A of a complete MS of the latter described under No. 5880 above.

Beginning:—

श्रीश्वर उवाच ।

यो देवदेवो भगवान् भास्करो महसां निधिः ।
गायत्रीनायको भास्वान् सवितेति प्रगीयते ॥ १ ॥
तस्याहं कवचं दिव्यं वज्रपञ्जरकाभिधम् ।
सर्व्वमन्त्रमयं दिव्यं मूलविद्यारहस्यकम् ॥ २ ॥
सर्व्वपापहरं देवि दुःखदारिद्र्यनाशनम् ।
महाकुष्ठहरं पुण्यं सर्व्वरोगनिवर्हणम् ॥ ३ ॥
सर्व्वशस्त्रसमूहघ्नं संग्रामे विजयप्रदम् ।
सर्व्वतेजोमयं सर्व्वदेवदानवपूजितम् ॥ ४ ॥

End:

लक्ष्मीवान् जायते देवि सद्यः सूर्य्यप्रसादतः ।
भक्त्या य[स्तु] पठेद्देवि कवचं वज्रपञ्जरम् ॥ ४२ ॥
इह लोके श्रियं भुक्त्वा देहान्ते मुक्तिमाप्नुयात् ।

Colophon:

इति श्रीरुद्रयामले तन्त्रे देवीरहस्ये वज्रपञ्जरसूर्य्यकवचं सम्पूर्णम् ।

Post-colophon Statement:—

शुभमस्तु । संवत् १८६९ पौष १४ शुक्रदिने लिपिकृतमिदम् ।

6787.

9438. सूर्य्यकवचम् । *Sūryakavaca.*

Substance, country-made paper. 9½×4 inches. Folia, 2. Lines, 7. Extent in ślokas, 25. Character, Nāgara. Date, Samvat 1887, Śaka, 1752. Appearance, fair. Complete.

This stotra, known as *Trailokyamaṅgala,* is very popular and is found printed in many a collection of stotras.

Post-colophon statement:—

संवत् १८८७ शाके १७५२ शुक्रमासे कृष्णपक्षे लिखितं वन्दी-दीन दीक्षित ।

6788.

2010. शनैश्वरस्तोत्रम् । *Śanaiścarastotra.*

Substance, country-made paper. 8×4½ inches. Folia, 6. Lines, 8. Extent in ślokas, 60. Character, Nāgara. Date, Śaka 1774. Appearance, discoloured. Complete.

The stotra which is in the form of an interlocution between Śani and Daśaratha does not agree with the one printed in *Stotraratnākara* (Madras, 1927, Vol. II, pp. 551-2), *Bṛhatstotraratnākara* (Bombay, 1932, pp. 364-5) and *Stava-kavacamālā* (Calcutta, 1330 B.S., pp. 668-9) the last of which attributes it to Daśaratha.

Beginning :—

अस्य श्रीशनैश्वरस्तोत्रमन्त्रस्य ईश्वर ऋषिः अनुष्टुप् छन्दः शनि-
र्देवता हं बीजं स्वाहा शक्तिः मं कीलकं मम सकलपीडानिरसनार्थं
शनैश्वरस्तोत्रजपे विनियोगः ।

Colophon :—

इति श्रीविधानमालायां दशरथप्रोक्तं शनैश्वरस्तोत्रं संपूर्णम् ।

Post-colophon Statement :—

शके १७७४ परिधावीनां संवत्सरे मार्गशीर्षे वद्य प्रतिपद्यां सोम-
वासरे इदं पुस्तकं ज्योतिर्विवरवडेकरोपनाम्ना सखारामात्मज-
बालदेवज्ञेन लिखितम् ।

6789.

1957. बालग्रहस्तवः । *Bālagrahastava.*

Substance, country-made paper. 10 × 5 inches (2 fol.) and 9½ × 4 inches (1 fol.). Folia, 3. Lines, 12, 8. Extent in ślokas, 50. Character, Nāgara. Appearance, fair. Complete.

The present MS was described in L. X. 4045. The hymn invokes various gods and demi-gods for the protection of children.

6790.

8781. गुरुगीता । *Gurugītā.*

Substance, country-made paper. 9 × 4½ inches. Folia, 1–35 of which Fol. 2 is missing. Lines, 5. Extent in ślokas, 200. Character, Nāgara. Date, Saṃvat 1913. Appearance, good. Complete.

The stotra proper begins on Fol. 7B, the previous portion being occupied by a description of the worship of the guru. It is assigned to the *Skandapurāṇa* in the present MS as also in the MSS described in ASB. V. 3935–7, while according to MSS described under No. 6792 below and in CS. V. 18 it belongs either to the *Rudrayāmala* or the *Brahmayāmala.* Though introduced as a *mālāmantra* it is of the type of an ordinary hymn, speaking of the greatness of a guru.

Post-colophon Statement :—

संवत् १९१३ वैशाख शुक्ल १० ।

6791.

5621F. *Gurugītā.*

Substance, palm-leaf. 14 × 1½ inches. Folia, 109–114. Lines, 5 Extent in ślokas, 200. Character, Udiya. Appearance, good. Complete.

The phalaśruti portion (found on Fol. 27ff in the preceding MS) is not found in the present MS.

6792.

156. गुरुगीता । *Gurugītā.*

Substance, country-made yellow paper. 18½ × 3 inches. Folia, 6. Lines, 7–10 on a page. Extent in ślokas, 200. Character, Bengali. Appearance, old. Complete.

The present manuscript has been noticed in L.I. 445.

6793.

2746B. *Gurugītā.*

Substance, machine-made paper. 16 × 3½ inches. Folia, 3B 4A. Lines. 5 in all. Extent in ślokas, 9. Character, Bengali. Appearance, good Complete.

This speaks of the greatness of the Divine Mother, the supreme Guru.

॰अथ गुरुगीता ।

श्रीपार्व्वत्युवाच ।

लोकेश कथ्यतां देव गुरुगीता मयि प्रभो ।

ईश्वर उवाच ।

शृणु तारिणि वक्ष्यामि गीतां ब्रह्ममयीं पराम् ॥

Colophon :—

इति कङ्कालमालिनीतन्त्रे सार्द्धलक्षग्रन्थे श्रीस्त्रीगुरुगीता सम्पूर्णा ।

6794.

217. **गुरुसहस्रनामस्तोत्रम् ।** *Gurusahasranāmastotra.*

Substance, country-made paper. 13 × 5 inches. Folia, 1-8. Lines, 8-9. Extent in ślokas, 130. Character, Bengali. Appearance, old. Complete.

The hymn which is in the form of an interlocution between Śiva and Pārvatī is assigned to the *Sammohana-tantra*. The present MS has been described in L. I. 410. Two lines of a *Durgāsahasranāmastotra* are given after the conclusion of the present hymn.

Beginning :—

सूत उवाच ।

कैलासशिखरासीनं चन्द्रखण्डविराजितम् ।

पप्रच्छ विनया[द्] भक्त्या गौरी नत्वा वृषध्वजम् ॥

श्रीदेव्युवाच ।

भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद ।

केनोपायेन च कलौ लोकास्ता यान्ति सद्गतिम् ॥

6795.

2788. *Gurusahasranāmastotra.*

Substance, machine-made paper. 12½ × 4 inches. Folia, 1-6. Lines, 7. Extent in ślokas, 130. Character, Bengali. Appearance, fair. Complete.

Same as above. The present MS has been described in L. X. 4077.

Post-colophon Statement :—

श्रीहरिनारायणदेवशर्मणः स्वाक्षरमिदं पुस्तकञ्च ।

6796.

2780. *Gurusahasranāmastotra.*

Substance, country-made yellow paper. 13×3½ inches. Folia, 1–9, of which Nos. 3–6 are missing. Lines, 8. Character, Bengali. Appearance, good. Incomplete.

This is different from the hymn described above.

Beginning :—

श्रीमहादेव उवाच ।

अपरं श्रोतुमिच्छामि कान्ते मत्प्राणवल्लभे ।

स्तोत्रं सहस्रनामाख्यं श्रीगुरोः कुलभैरवि ॥

कृपया कथयेशानि स्तोत्रं परमदुर्लभम् ।

... ...

ॐ नमामि श्रीगुरुब्रह्मा ब्रह्मज्ञानप्रदायकः ।

ब्रह्मज्ञो ब्रह्मदो ब्रह्मा ब्रह्मपद्मोपरिस्थितः ॥

Colophon :—

इति श्रीनिगमयोगसारे सर्वागमोत्तमोत्तमे शतसाहस्र्यां संहितायां निगमशास्त्रे सहस्रारे सहस्रनामकथनं एकादशः परिच्छेदः ।

6797.

8963. गुरुस्तवराजः । *Gurustavarāja.*

Substance, country-made paper. 7½×4 inches. Folia, 3. Lines, 7. Extent in ślokas, 25. Character, Nāgara. Appearance, good. Complete.

Beginning:—

ॐ ब्रह्मस्थानसरोजमध्यविलसच्छीतांशुपीठस्थितं
स्फूर्जत्सूर्यरुचिं वराभयकरं कर्पूरकुन्दोज्ज्वलम् ।
श्वेतस्रग्वसनानुलेपनयुतं विद्युद्रुचा कान्तया
संश्लिष्टार्धतनुं प्रसन्नवदनं वन्दे गुरुं सादरम् ॥

End:—

पूर्वाशाभिमुखः कृताञ्जलिपुटः श्लोकाष्टकं यः पठेत्
पौरश्चर्यविधिं विनापि लभते मन्त्रस्य सिद्धिं पराम् ।
नो विघ्नैः परिभूयते प्रतिदिनं प्राप्नोति पूजाफलं
देहान्ते परमं पदं निविशते यद् योगिनां दुर्लभम् ॥

Colophon:—

इति श्रीवामकेश्वरतन्त्रे हरगौरीसंवादे गुरुस्तवराजः समाप्तः ॥

6797A.

9946. गुरुप्रशंसा । *Guruprasaṁsā.*

Substance, country-made paper. $8\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 3. Lines, 8 in a page. Extent in ślokas, 40. Character, Nāgara. Appearance, old. Complete.

The name is written in red ink, possibly in a later hand, at the end. It speaks of the greatness of a guru by way of describing the results of showing respect or disrespect to him.

Beginning:

शान्तिदान्त्यादिहीनाय विषयासक्तचेतसे ।
अर्थिनेऽपि न दातव्यं गुरुणापि कृपालुना ।
अपुत्रायाप्यशिष्याय वक्तव्यं नाधिकारिणे ॥ १ ॥

उक्तो सत्यपि तत्सारो वक्तव्यः सर्व्वथा न हि ।
गुरुभक्त्या विहीनाय सर्व्वदाप्यधिकारिणे ॥ २ ॥
देववद् यो गुरुं पश्येदप्रमत्तोऽधिकारभाक् ।
स एव ब्रह्मविज्ञानं फलवत्प्राप्नुयान्नरः ॥ ३ ॥

End :—

इति ते कथितं ज्ञानं यत् श्वेताश्वतरोवदत् ।
